एकः स्वलक्षणोऽध्यवसेयश्च सन्तान इति। एतेन स्वप्नप्रत्ययो मिथ्यात्वेन व्याख्यातः। यत्तु सत्यं स्वप्नदर्शनमुक्तं तत्राप्याख्याता ब्राह्मणायनेनाख्याते संवादाभावात्। प्रियव्रतस्याख्यातसंवादस्तु काकतालीयो न स्वप्नज्ञानं प्रमाणयितुमर्हति। तादृशस्यैव बहुलं विसंवाददर्शनात्। दर्शितश्च विसंवादो भाष्यकृता कार्त्स्न्येनानभिव्यक्तिं विवृण्वता रजन्यां सुप्त इति रजनीसमयेऽपि हि भारताद् वर्षान्तरे केतुमालादौ वासरो भवतीति भारते वर्षे इत्युक्तम् ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

दर्शनं सूचकं तच्च स्वरूपेण सत्, असत्तु दृश्यम्। अत एव स्त्रीदर्शनस्वरूपसाध्याश्वरमधातुविसर्गादयो जाग्रदवस्थायामनुवर्त्तन्ते। स्त्रीसाध्यास्तु माल्यविलेपनदन्तक्षतादयो नानुवर्त्तन्ते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापार इति। प्राज्ञव्यापारत्वेन पारमार्थिकत्वानुमानं प्रत्यक्षेण बाधकप्रत्ययेनाविरुध्यमानं नात्मानं लभत इति भावः। बन्धमोक्षयोरान्तरालिकं तृतीयमैश्वर्य्यमिति। ‘पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्य्ययौ’ ‘देहयोगाद्वासोऽपि’ इति सूत्रद्वयं कृतोपपादनमस्माभिः प्रथमसूत्रे। निगदव्याख्यातं चैतयोर्भाष्यमिति ॥

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

इह हि नाडीपुरीतत्परमात्मानो जीवस्य सुषुप्तावस्थायां स्थानत्वेन श्रूयन्ते। तत्र किमेषां स्थानानां विकल्प आहोस्वित्समुच्चयः। किमतः, यद्येवम्। एतदतो भवति। यदा नाड्यो वा पुरीतद्वा सुषुप्तस्थानं तदा विपरीतग्रहणनिवृत्तावपि न जीवस्य परमात्मभाव इति। अविद्यानिवृत्तावपि जीवस्य

परमात्मभावाय कारणान्तरमपेक्षितव्यं तच्च कर्मैव न तु तत्त्वज्ञानं विपरीतज्ञाननिवृत्तिमात्रेण तस्योपयोगात् विपरीतज्ञाननिवृत्तेश्च विनापि तत्त्वज्ञानं सुषुप्तावपि सम्भवात्। ततश्च कर्मणैवापवर्गो न ज्ञानेन। यथाहुः।

कर्मणैव तु संसिद्धिमास्थिता जनकादयः। इति।

अथ तु परमात्मैव नाडी पुरीतत्सुप्तिद्वारा सुषुप्तिस्थानं ततो विपरीतज्ञाननिवृत्तेरस्ति मात्रया परमात्मभावोपयोगः। तया हि तावदेष जीवस्तदवस्थानो भवति केवलम्। तत्त्वज्ञानाभावेन समूलकाषमविद्याया अकाषात् जाग्रत्स्वप्नलक्षणं जीवस्य व्युत्थानं भवति। तस्मात् प्रयोजनवत्येषा विचारणेति। किन्तावत्प्राप्तं, नाडीपुरीतत्परमात्मसु स्थानेषु सुषुप्तस्य जीवस्य निलयं प्रति विकल्पः। यथा बहुषु प्रासादेष्वेको नरेन्द्रः कदाचित् क्वचिन्निलीयते कदाचित् क्वचिदेवमेको जीवः कदाचिन्नाडीषु कदाचित् पुरीतति कदाचिद् ब्रह्मणीति। यथा निरपेक्षा व्रीहियवाः क्रतुसाधनीभूतपुरोडाशप्रकृतितया श्रुता एकार्था विकल्प्यन्ते। एवं सप्तमीश्रुत्या वाऽऽयतनश्रुत्या वैकनिलयनार्थाः परस्परानपेक्षा नाड्यादयोऽपि विकल्पमर्हन्ति। यत्रापि नाडीभिः प्रत्यवसृप्य पुरीतति शेत इति नाडीपुरीततोः समुच्चयश्रवणं तथा तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति। अथास्मिन् प्राण एवैकधा भवतीति नाडीब्रह्मणोराधारयोः समुच्चयश्रवणम्। प्राणशब्दं च ब्रह्मायास्मिन् प्राणे ब्रह्मणि स जीव एकधा भवतीति वचनात्। तथाप्यासु तदा नाडीषु सृप्तो भवतीति च पुरीतति शेत इति च निरपेक्षयोर्नाडीपुरीततोराधारत्वेन निर्देशान्निरपेक्षयोरेवाधारत्वम्। इयांस्तु विशेषः। कदाचिन्नाड्य एवाधारः कदाचिन्नाडीभिः सञ्चर-

माणस्य पुरीतदेव। एवं ताभिरेव सञ्चरमाणस्य कदाचिद्ब्रह्मै-वाधार इति सिद्धमाधारत्वे नाडीपुरीतत्परमात्मनामनपेक्षत्वम्। तथा च विकल्पो व्रीहियववद् बृहद्रथन्तरवद्वेति प्राप्तम्। एवं प्राप्तेऽभिधीयते। जीवः समुच्चयेनैवैतानि नाड्या-दीनि स्वापायोपैति न विकल्पेन। अयमभिसन्धिः। नित्य-वदाम्नातानां यत् पाक्षिकत्वं नाम तद्गत्यन्तराभावे कल्प्यते। यथाहुः।

एवमेषोऽष्टदोषोऽपि यद् व्रीहियववाक्ययोः।

विकल्प आश्रितस्तत्र गतिरन्या न विद्यते॥ इति।

प्रकृतक्रतुसाधनीभूतपुरोडाशद्रव्यप्रकृतितया हि परस्प-रानपेक्षौ व्रीहियवौ विहितौ शक्नुतश्चैतौ प्रत्येकं पुरोडा-शमभिनिर्वर्त्तयितुं, तत्र यदि मिश्राभ्यां पुरोडाशोऽभिनि-र्वर्त्त्येत परस्परानपेक्षव्रीहियवविधायके उभे अपि शास्त्रे बाध्येयाताम्। न चैतौ प्रयोगवचनः समुच्चेतुमर्हति स हि यथाविहितान्यङ्गान्यभिसमीक्ष्य प्रवर्त्तमानो नैतान्यन्यथ-यितुं शक्नोति मिश्रणे चान्यथात्वमेतेषाम्। न चाङ्गानुरोधेन प्रधानाभ्यासो गोसवे उभे कुर्य्यादितिवद्युक्तः। अश्रुतो ह्यत्र प्रधानाभ्यासोऽङ्गानुरोधेन च सोऽन्याय्यः। न चाङ्ग-भूतैन्द्रवायवादिग्रहानुरोधेन यथा प्रधानस्य सोमयागस्या-वृत्तिरेवमत्रापीति युक्तम्। सोमेन यजेतेति हि तत्रापूर्व-यागविधिः। तत्र च दशमुष्टिपरिमितस्य सोमद्रव्यस्य सोममभिषुणोति सोममभिप्लावयतीति च वाक्यान्तरानुलोच-नया रसद्वारेण यागसाधनीभूतस्यैन्द्रवायवाद्युद्देशेन प्रादेश-मात्रेषूर्ध्वपात्रेषु ग्रहणानि पृथक् प्रकल्पनानि संस्कारा विधीयन्ते न तु सोमयागोद्देशेनैन्द्रवाय्वादयो देवताश्चो-द्यन्ते येन तासां यागनिष्पत्तिलक्षणैकार्थत्वेन विकल्पः

स्यात्। न च प्रादेशमात्रमेकैकमूर्ध्वपात्रं दशमुष्टिपरिमितसोमरसग्रहणाय कल्पते येन तुल्यार्थतया ग्रहणानि विकल्प्येरन्। न च यावन्मात्रमेकमूर्ध्वपात्रं व्याप्नोति तावन्मात्रं गृहीत्वा परिशिष्टं त्यज्येतेति युज्यते। दशमुष्टिपरिमितोपादानस्यादृष्टार्थत्वप्रसङ्गात्। एवं तद्दृष्टार्थं भवेद्यदि तत्सर्वं याग उपयुज्येत। न च दृष्टे सम्भवत्यदृष्टकल्पना न्याय्या, तस्मात्सकलस्य सोमरसस्य यागशेषत्वेन संस्कारार्हत्वादेकैकेन च ग्रहणेन सकलस्य संस्कर्त्तुमशक्यत्वात्तदवयवस्यैकेन संस्कारेऽवयवान्तरस्य ग्रहणान्तरेण संस्कार इति कार्य्यभेदाद् ग्रहणानि समुच्चीयेरन्। अत एव समुच्चयदर्शनं दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णातीति। समुच्चये च सति क्रमोऽप्युपपद्यते। आश्विनो दशमो गृह्यते तृतीयो हूयते। तथैवैन्द्रवायवाग्रान् ग्रहान् गृह्णातीति। तेषां च समुच्चये सति यावद्यदुद्देशेन गृहीतं तावत्तस्यै देवतायै त्यक्तव्यमित्यर्थाद्यागस्यावृत्त्या भवितव्यम्। यदि पुनः पृथक्कृतान्यप्येकीकृत्य काञ्चन देवतामुद्दिश्य त्यजेरन् पृथक्करणानि च देवतोद्देशाश्चादृष्टार्था भवेयुः। न च दृष्टे सम्भवत्यदृष्टकल्पना न्याय्येत्युक्तम्। तस्मात्तत्र समुच्चयस्यावश्यम्भावित्वाद्गुणानुरोधेनापि प्रधानाभ्यास आश्रीयते। इह त्वभ्यासकल्पनाप्रमाणाभावात् पुरोडाशद्रव्यस्य चानियमेन प्रकृतद्रव्ये यस्मिन् कस्मिंश्चित्प्राप्ते एकैका परस्परानपेक्षा व्रीहिश्रुतिर्यवश्रुतिश्च नियामिकैकार्थतया विकल्पमर्हतः। न तु नाडीपुरीतत्परमात्मनामन्योन्यानपेक्षाणामेकनिलयनार्थसम्भवो येन विकल्पो भवेत्। नह्येकविभक्तिनिर्देशमात्रेणैकार्थता भवति समुच्चितानामप्येकविभक्तिनिर्देशदर्शनात् पर्य्यङ्के शेते प्रासादे शेत इति। तस्मादेकविभक्तिनिर्देशस्यानैकान्तिकत्वादन्यतो विनि-

गमना वक्तव्या। सा चोक्ता भाष्यकृता "यत्रापि निरपेक्षा इव नाडोः सुप्तिस्थानत्वेन श्रावयति" इत्यादिना। सापेक्षश्रुत्य-नुरोधेन निरपेक्षश्रुतिर्नेतव्येत्यर्थः। शेषमतिरोहितार्थम्। ननु यदि ब्रह्मैव निलयनस्थानं तावन्मात्रमुच्यतां कृतं नाड्यु-पन्यासेनेत्यत आह। अपि चात्रेति। अपि चेति समुच्चये न विकल्पे। एतदुपपत्तिसहिता पूर्वोपपत्तिरर्थसाधिनीति। मार्गोपदेशोपयुक्तानां नाडीनां स्तुत्यर्थमत्र नाडीसङ्कीर्तन-मित्यर्थः। पित्तेनाभिव्याप्तकरणो न बाह्यान् विषयान् वेदेति तद्द्वारा सुखदुःखाभावेन तत्कारणपाप्मास्पर्शेन नाडीस्तुतिः। यदा तु तेजो ब्रह्म तदा सुगमम्। अपि च नाड्यः पुरीतद्वा जीवस्योपाध्याधार एव भवतीत्ययमर्थः। अभ्युपेत्य जीवस्या-धेयत्वमिदमुक्तम्। परमार्थतस्तु न जीवस्याधेयत्वमस्ति। तथाहि। नाड्यः पुरीतद्वा जीवस्योपाधीनां करणानामाश्रयः। जीवस्तु ब्रह्माव्यतिरेकात् स्वमहिमप्रतिष्ठः। न चापि ब्रह्मजीवस्याधारस्तादात्म्याद्विकल्पस्तु व्यतिरेके ब्रह्मण आधा-रत्वमुच्यते जीवं प्रति। तथा च सुषुप्तावस्थायामुपाधीनाम-समुदाचाराज्जीवस्य ब्रह्मात्मत्वमेव ब्रह्माधारत्वं न तु नाडीपुरी-तदाधारत्वम् तदुपाधिकरणमात्राधारतया तु सुषुप्तदशारम्भाय जीवस्य नाडीपुरीतदाधारत्वमित्यतुल्यार्थतया न विकल्प इति। "अपि च न कदाचिज्जीवस्येति"। औत्सर्गिकं ब्रह्मस्वरूपत्वं जीवस्यास्ति जाग्रत्स्वप्नदशारूपेऽपवादे सुषुप्तावस्थायां नान्य-थयितुं शक्यमित्यर्थः। अपि च येऽपि स्थानविकल्पमा-स्थिषत तैरपि विशेषविज्ञानोपशमलक्षणा सुषुप्त्यवस्था-ङ्गीकर्त्तव्या। न चेयमात्मतादात्म्यं विना नाड्यादिषु पर-मात्मव्यतिरिक्तेषु स्थानेषूपपद्यते। तत्र हि स्थितोऽयं जीव आत्मव्यतिरेकाभिमानी सन्नवश्यं विशेषज्ञानवान् भवेत्।

तथाहि श्रुतिः। 'यत्र वान्यदिव स्यात्तत्रान्योऽन्यत् पश्येत्' इति। आत्मस्थानत्वे त्वदोषः। 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कम्पश्येद्विजानीयात्' इति श्रुतिः। तस्मादप्यात्मस्थानत्वस्य द्वारं नाड्यादीत्याह। "अपि च स्थानविकल्पाभ्युपगमेऽपि" इति। अत्र चोदयति। "ननु भेदविषयस्यापि" इति। भिद्यत इति भेदः। भिद्यमानस्यापि विषयस्येत्यर्थः। परिहरति। "बाढमेवं स्यात्" इति। न तावज्जीवस्यास्ति स्वतःपरिच्छेदस्तस्य ब्रह्मात्मत्वेन विभुत्वात्। औपाधिके तु परिच्छेदे यत्रोपाधिरसन्निहितस्तन्मात्रं न जानीयान्न तु सर्वम्। नह्यतन्निधानात् सुमेरुमविद्वान् देवदत्तः सन्निहितमपि न वेद। तस्मात्सर्वविशेषविज्ञानप्रत्यस्तमयीं सुषुप्तिं प्रसाधयता तदास्य सर्वोपाध्युपसंहारो वक्तव्यः। तथा च सिद्धमस्य तदा ब्रह्मात्मत्वमित्यर्थः। गुणप्रधानभावेन समुच्चयो न समप्रधानतयाग्नेयादिवदिति वदन् विकल्पमप्यपाकरोति। "न च वयमिह" इति। स्वाध्यायाध्ययनविध्यापादितपुरुषार्थत्वस्य वेदराशेरेकेनापि वर्णेन नापुरुषार्थेन भवितुं युक्तम्। न च सुषुप्तावस्थायां जीवस्य स्वरूपेण नाड्यादिस्थानत्वप्रतिपादने किञ्चित् प्रयोजनं ब्रह्मभूयप्रतिपादने त्वस्ति। तस्मान्न समप्रधानभावेन समुच्चयो नापि विकल्प इति भावः। नीतार्थमन्यत्॥

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः॥ ९॥

यद्यपीश्वरादभिन्नो जीवस्तथाप्युपाध्यवच्छेदेन भेदं विवक्षित्वाऽधिकरणान्तरारम्भः। स एवेति दुःसम्पादमिति स वान्यो वेति ईश्वरो वेति सम्भवमात्रेणोपन्यासः। नहि तस्य शुद्धमुक्तस्वभावस्याविद्याकृतव्युत्थानसम्भवः। अत

एव विमर्शावसरेऽस्यानुपन्यासः। यद्वि द्व्यहादिनिर्वर्त्तनीयमेकस्य पुंसश्चोदितं कर्म तस्य पूर्वेद्युरनुष्ठितस्यास्ति स्मृतिरिति वक्तव्येऽनुः प्रत्यभिज्ञानसूचनार्थः। अत एव सोऽहमस्मीत्युक्तम्। "पुनः प्रतिन्यायं प्रतियोन्या द्रवति" इति। अयनम् आयः नियमेन गमनं न्यायः। जीवः प्रतिन्यायं सम्प्रसादे सुषुप्तावस्थायां बुद्धान्ताया द्रवति आगच्छति। प्रतियोनि योऽहि व्याघ्रयोनिः सुषुप्तो बुद्धान्तमागच्छन् स व्याघ्र एव भवति न जात्यन्तरम्। तदिदमुक्तम्, "त इह व्याघ्रो वा सिंहो वा" इति। "अथ तत्र सुप्त उत्तिष्ठति" इति। यो हि जीवः सुप्तः स शरीरान्तर उत्तिष्ठति। शरीरान्तरगतस्तु सुप्तजीवसम्बन्धिनि शरीर उत्तिष्ठति। ततश्च न शरीरान्तरे व्यवहारलोप इत्यर्थः। "अपि च न जीवो नाम परस्मादन्यः" इति। यथा घटाकाशो नाम न परमाकाशादन्यः। अथ चान्य इव यावद्घटमनुवर्त्तते। न चासौ दुर्विवेचस्तदुपाधेर्घटस्य विविक्तत्वात्। एवमनाद्यनिर्वचनीयाविद्योपधानभेदोपाधिकल्पितो जीवो न वस्तुतः परमात्मनो भिद्यते तदुपाध्युद्भवाभिभवाभ्यां चोद्भूत इवाभिभूत इव प्रतीयते। ततश्च सुषुप्तादावपि अभिभूत इव जाग्रदवस्थादिषूद्भूत इव तस्य चाविद्यातद्वासनोपाधेरनादितया कार्य्यकारणभावेन प्रवहतः सुविवेचतया तदुपहितो जीवः सुविवेच इति॥

मुग्धेऽर्द्धसम्पत्तिः परिशेषात्॥ १०॥

विशेषविज्ञानाभावान्मूर्च्छा जागरस्वप्नावस्थाभ्यां भिद्यते पुनरुत्थानाच्च मरणावस्थायाः। अतः सुषुप्तिरेव मूर्च्छा विशेषज्ञानाभावाविशेषात्। चिरानुच्छासवेपथुप्रभृतयस्तु सुप्तेरवान्तरप्रभेदाः। तद्यथा। कश्चित्सुप्तोत्थितः प्राह सुखमहमस्वाप्सं

लघूनि मे गात्राणि प्रसन्नं मे मन इति, कश्चित् पुनर्दुःखम-स्वाप्सं गुरूणि मे गात्राणि भ्रमत्यनवस्थितं मे मन इति। न चैतावता सुषुप्तिर्भिद्यते। तथा विकारान्तरेऽपि मूर्च्छा न सुषुप्ते भिद्यते। तस्माल्लोकप्रसिद्धभावान्नेयं पञ्चम्यवस्थेति प्राप्तम्। एवं प्राप्ते, उच्यते। यद्यपि विशेषविज्ञानोपशमेन मोहसुषुप्तयोः साम्यं तथापि नैक्यम्। नहि विशेषविज्ञानसद्भा-वसाम्यमात्रेण स्वप्नजागरयोरभेदः। बाह्येन्द्रियव्यापारभावाभा-वाभ्यां तु भेदे तयोः सुषुप्तमोहयोरपि प्रयोजनभेदात्कारण-भेदाल्लक्षणभेदाच्च भेदः। श्रमापनुत्त्यर्था हि ब्रह्मणा सम्पत्तिः सुषुप्तम्। शरीरत्यागार्था तु ब्रह्मणा सम्पत्तिर्मोहः। यद्यपि सत्यपि मोहे न मरणं तथाप्यसति मोहे न मरणमिति मर-णार्थो मोहः। मुसलसम्पातादिनिमित्तत्वान्मोहस्य श्रमादि-निमित्तत्वाच्च सुषुप्तस्य मुखनेत्रादिविकारलक्षणत्वान्मोहस्य प्रसन्नवदनत्वादिलक्षणभेदाच्च सुषुप्तस्य सुषुप्तस्य त्ववान्तरभेदेऽपि निमित्तप्रयोजनलक्षणाभेदादेकत्वं तस्मात् सुषुप्तमोहावस्थयो-र्ब्रह्मणा सम्पत्तावपि सुषुप्ते यादृशी सम्पत्तिर्न तादृशी मोह इत्यर्द्धसम्पत्तिरुक्ता, साम्यवैषम्याभ्यामर्द्धत्वम्। यदा चैतदव-स्थान्तरं तदा भेदात् तत्प्रविलयाय यत्नान्तरमास्थेयम्। अभेदे तु न यत्नान्तरमिति चिन्ताप्रयोजनम्॥

न स्थानतोऽपि हि परस्योभयलिङ्गं सर्वत्र हि॥ ११॥

अवान्तरसङ्गतिमाह। "येन ब्रह्मणा सुषुप्तादिष्विति"। यद्यपि तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र निष्प्रपञ्चमेव ब्रह्मो-पपादितं तथापि प्रपञ्चलिङ्गानां बह्वीनां श्रुतीनां दर्शनाद्भवति पुनर्विचिकित्सातस्तन्निवारणायारम्भस्तस्य च तत्त्वज्ञानमपव-

र्गोपयणीति प्रयोजनवान् विचारः। तत्रोभयलिङ्गश्रवणा-
दुभयरूपत्वं ब्रह्मणः प्राप्तम्। तत्रापि सविशेषत्वनिर्वि-
शेषत्वयोर्विरोधात् स्वाभाविकत्वानुपपत्तेरेकं स्वतोऽपरं तु
परतः। न च यत् परतस्तदपारमार्थिकम्। नहि चक्षुरा-
दीनां स्वतःप्रमाणभूतानां दोषतोऽप्रामाण्यमपारमार्थिकम्।
विपर्य्ययज्ञानलक्षणकार्य्यानुत्पादप्रसङ्गात्। तस्मादुभयलिङ्ग-
कशास्त्रप्रामाण्यादुभयरूपता ब्रह्मणः पारमार्थिकीति प्राप्ते,
उच्यते। न स्थानत उपाधितोऽपि परस्य ब्रह्मण उभयचिह्नत्व-
सम्भवः। एकं हि पारमार्थिकमन्यदध्यारोपितं पारमार्थिकत्वे
ह्युपाधिजनितस्य रूपस्य ब्रह्मणः परिणामो भवेत्। स च
प्राक् प्रतिषिद्धस्तत्पारिशेष्यात् स्फटिकमणेरिव स्वभावस्वच्छ-
धवलस्य लाक्षारसावसेकोपाधिरक्तिमा सर्वगन्धत्वादिरौपा-
धिको ब्रह्मण्यध्यस्त इति पश्यामः, निर्विशेषताप्रतिपादना-
र्थत्वाच्छ्रुतीनाम्। सविशेषतायामपि यश्चायमस्यां पृथिव्यां
तेजोमय इत्यादीनां श्रुतीनां ब्रह्मैकत्वप्रतिपादनपरत्वाद्
एकत्वनानात्वयोश्चैकस्मिन्नसम्भवाद् एकत्वाङ्गत्वेनैव नाना-
त्वप्रतिपादनपर्य्यवसानात्। नानात्वस्य प्रमाणान्तरसिद्धत-
यानुवाद्यत्वादेकत्वस्य चानधिगतेर्विधेयत्वोपपत्तेर्भेददर्शन-
निन्दया च साक्षाद्भूयसोभिः श्रुतिभिरभेदप्रतिपादनाद्
आकारवद् ब्रह्मविषयाणां च कासाञ्चिच्छ्रुतीनामुपास-
नापरत्वमसति बाधकेऽन्यपराद्वचनात्प्रतीयमानमपि गृह्यते।
यथा देवतानां विग्रहवत्त्वम्। सन्ति चात्र साक्षाद्द्वै-
तापवादेनाद्वैतप्रतिपादनपराः शतशः श्रुतयः कासाञ्चिच्च
द्वैताभिधायिनीनां तत्प्रविलयपरत्वम्। तस्मान्निर्विशेषमेकरूपं
चैतन्यैकरसं सद्ब्रह्म परमार्थतोऽविशेषाश्च सर्वगन्धत्ववामनी-
त्वादय उपाधिवशादध्यस्ता इति सिद्धम्। शेषमतिरोहिता-

र्थम्। अत्र केचिद्द्वे अधिकरणे कल्पयन्तीति किं सल्लक्षणं च प्रकाशलक्षणञ्च ब्रह्म किं सल्लक्षणमेव ब्रह्मोत प्रकाशलक्षणमेवेति। तत्र पूर्वपक्षं गृह्णाति॥

प्रकाशवच्चावैयर्थ्यात्॥ १५॥

चकारात्सच्च। अवैयर्थ्यात्। ब्रह्मणि सच्छ्रुतेः। सिद्धान्तयति॥

आह च तन्मात्रम्॥ १६॥

प्रकाशमात्रं, नहि सत्त्वं नाम प्रकाशरूपादन्यत् यथा सर्वगन्धत्वादयोऽपि तु प्रकाशरूपमेव सदिति नोभयरूपत्वं ब्रह्मण इत्यर्थः। तदेतदनेनोपन्यस्य दूषितम्। सत्ताप्रकाशयोरेकत्वे नोभयलक्षणत्वम्। भेदेन स्थानतोपीऽति निराकृतमिति नाधिकरणान्तरं प्रयोजयति। परमार्थतस्त्वभेद एव प्रकर्षप्रकाशवदिति। सर्वेषां च साधारणे प्रविलयार्थत्वे सत्यरूपवदेव हि तत्प्रधानत्वादिति विनिगमनकारणवचनमनवकाशं स्यात्। एवं हि तस्यावकाशः स्याद् यदि काश्चिदुपासनापरतया रूपमाचक्षीरन् काश्चिन्नीरूपब्रह्मप्रतिपादनपरा भवेयुः। सर्वासां तु प्रविलयार्थत्वेन नीरूपब्रह्मप्रतिपादनार्थत्वे उक्तो विनिगमनहेतुर्न स्यादित्यर्थः। एकविनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवदित्यधिकाराभिप्रायम्। अनुबन्धभेदात्तु भिन्नोऽनयोरपि नियोग इति। "कोऽयं प्रपञ्चप्रविलयः" इति। वास्तवस्य वा प्रपञ्चस्य प्रविलयः सर्पिष इवाग्निसंयोगात्। समारोपितस्य वा रज्ज्वां सर्पभावस्येव रज्जुतत्त्वपरिज्ञानात्। न तावद्वास्तवः सर्वसाधारणः पृथिव्यादिप्रपञ्चः पुरुषमात्रेण शक्यः समुच्छेत्तुम्। अपि च प्रह्लादशुकादिभिः पुरुषधौरेयैः समूलमुन्मूलितः प्रपञ्च इति शून्यं जगद्भवेत्। न च वास्तवं तत्त्वज्ञानेन शक्यं समुच्छेत्तुम्। आरोपितरूपविरो-

धित्वात्तत्त्वज्ञानस्येत्युक्तम्। समारोपितरूपस्तु प्रपञ्चो ब्रह्मतत्त्वज्ञापनपरैरेव वाक्यैर्ब्रह्मतत्त्वमवबोधयद्भिः शक्यः समुच्छेत्तुमिति कृतमत्र विधिना। नहि विधिशतेनापि विना तत्त्वावबोधनम् प्रवर्त्त स्वात्मज्ञान इति वा कुरु प्रपञ्चप्रविलयं वेति प्रवर्त्तितः शक्नोति प्रपञ्चप्रविलयं कर्तुम्। न चास्यात्मज्ञानविधिं विना वेदान्तार्थब्रह्मतत्त्वावबोधो न भवति। मौलिकस्य स्वाध्यायाध्ययनविधेरेव विवक्षितार्थतया सकलस्य वेदराशेः फलवदर्थावबोधनपरतामापादयतो विद्यमानत्वादन्यथा कर्मविधिवाक्यान्यपि विध्यन्तरमपेक्षेरन्निति। न च चिन्तासाक्षात्कारयोर्विधिरिति तत्त्वसमीक्षायामस्माभिरुपपादितम्। विस्तरेण चायमर्थस्तत्रैव प्रपञ्चितः। तस्माज्जर्तिलयवाग्वा जुहुयादितिवद् विधिसरूपा एते आत्मा वा अरे द्रष्टव्य इत्यादयो न तु विधय इति। तदिदमुक्तं द्रष्टव्यादिशब्दा अपि तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधाना इति। अपि च ब्रह्मतत्त्वं निष्प्रपञ्चमुक्तं न तत्र नियोज्यः कश्चित् सम्भवति। जीवो हि नियोज्यो भवेत् स चेत् प्रपञ्चपक्षे वर्त्तते को नियोज्यस्तस्योच्छिन्नत्वात्। अथ ब्रह्मपक्षे, तथाप्यनियोज्यो ब्रह्मणोऽनियोज्यत्वात्। अथ ब्रह्मणोऽनन्योऽप्यविद्ययाऽन्य इवेति नियोज्यः। तदयुक्तम्। ब्रह्मभावं पारमार्थिकमवगमयतागमेनाविद्याया निरस्तत्वात्। तस्मान्नियोज्याभावादपि न नियोगः। तदिदमुक्तं "जीवो नाम प्रपञ्चपक्षस्यैव" इति। अपिच ज्ञानविधिपरत्वे तन्मात्रात्तु ज्ञानस्यानुत्पत्तेस्तत्त्वप्रतिपादनपरत्वमभ्युपगमनीयं तत्र वरं तत्त्वप्रतिपादनपरत्वमेवास्तु तस्यावश्याभ्युपगन्तव्यत्वेनोभयवादिसिद्धत्वात्। एवञ्च कृतं तत्त्वज्ञानविधिनेत्याह। "ज्ञेयाभिमुखस्यापि" इति। न च ज्ञानाधाने प्रमाणान-

पेक्षस्यास्ति कश्चिदुपयोगो विधेरेवं हि तदुपयोगो भवेद्यद्यन्यथाकारं ज्ञानमन्यथादधीत। न च तच्छक्यं वापि युक्तमित्याह। "न च प्रमाणान्तरेण" इति। किञ्चान्यन्नियोगनिष्ठतयैव च पर्य्यवस्यत्याम्नाये यदभ्युपगतं भवद्भिः शास्त्रपर्य्यालोचनयाऽनियोज्यब्रह्मात्मत्वं जीवस्येति तदेतच्छास्त्रविरोधादप्रमाणकम्। अथैतच्छास्त्रमनियोज्यब्रह्मात्मत्वं च जीवस्य प्रतिपादयति जीवञ्च नियुङ्क्ते ततोद्व्यर्थञ्च विरुद्धार्थञ्च स्यादित्याह। "अथ" इति। दर्शपौर्णमासादिवाक्येषु जीवस्यानियोज्यस्यापि वस्तुतोऽध्यस्तनियोज्यभावस्य नियोज्यता युक्ता नहि तद्वाक्यं तस्य नियोज्यतामाह। अपि तु लौकिकप्रमाणसिद्धां नियोज्यतामाश्रित्य दर्शपूर्णमासौ विधत्ते। इदन्तु नियोज्यतामपनयति च नियुङ्क्ते चेति दुर्घटमिति भावः। "नियोगपरतायाञ्च" इति। पौर्वापर्य्यालोचनया वेदान्तानां तत्त्वनिष्ठता श्रुता न श्रुता नियोगनिष्ठतेत्यर्थः। अपि च नियोगनिष्ठत्वे वाक्यस्य दर्शपौर्णमासकर्मण इवापूर्वावान्तरव्यापारादात्मज्ञानकर्मणोऽप्यपूर्वावान्तर-व्यापारादेव स्वर्गादिफलवन्मोक्षस्यानन्दरूपफलस्य सिद्धिः। तथा चानित्यत्वं सातिशयत्वं स्वर्गवद्भवेदित्याह। "कर्मफलवत्" इति। "अपि च ब्रह्मवाक्येषु" इति। सप्रपञ्चनिष्प्रपञ्चोपदेशेषु हि साध्यानुबन्धभेदादेकनियोगत्वमसिद्धं दर्शपौर्णमासप्रयाजवाक्येषु तु यद्यप्यनुबन्धभेदस्तथाप्यधिकारांशस्य साध्यस्य भेदाभावादभेद इति॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः॥ २२॥

अधिकरणविषयमाह। "द्वे वाव ब्रह्मणो रूपे" इति।

द्वे एव ब्रह्मणो रूपे ब्रह्मणः परमार्थतोऽरूपस्याध्यारोपिते द्वे एव रूपे ताभ्यां हि तद्रूप्यते। ते दर्शयति। "मूर्त्तं चैवामूर्त्तं च"। समुच्चीयमानावधारणम्। अत्र पृथिव्यप्तेजांसि त्रीणि भूतानि ब्रह्मणो रूपं मूर्त्तं मूर्च्छितावयवमितरेतरानुप्रविष्टावयवं कठिनमिति यावत्। तस्यैव विशेषणान्तराणि मर्त्यं मरणधर्मकं स्थितमव्यापि अवच्छिन्नमिति यावत्। सदन्येभ्यो विशिष्यमाणमसाधारणधर्मवदिति यावत्। गन्धस्नेहोष्णताश्चान्योन्यव्यवच्छेदहेतवोऽसाधारणधर्मास्तस्यैतस्य ब्रह्मरूपस्य तेजोऽबन्नस्य चतुर्विशेषणस्यैष रसः सारो य एष सविता तपति। अथामूर्त्तं वायुश्चान्तरिक्षं च तद्धि न कठिनमित्यमूर्त्तमेतदमृतममरणधर्मकं मूर्त्तं हि मूर्त्तान्तरेणाभिहन्यमानमवयवविश्लेषाद्ध्वंसते न तु तथाभावः सम्भवत्यमूर्त्तस्य। एतद्यदेति गच्छति व्याप्नोतीति एतत्यं नित्यपरोक्षमित्यर्थः। तस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन् सवितृमण्डले पुरुषः। करणात्मको हिरण्यगर्भप्राणाह्वयस्त्यस्य ह्येष रसः सारो नित्यपरोक्षता च साम्यमित्यधिदैवतम्। अथाध्यात्ममिदमेव मूर्त्तं यदन्यत् प्राणान्तराकाशाभ्यां भूतत्रयं शरीरारम्भकमेतन्मर्त्यमेतत् स्थितमेतत्सत्तस्यैतस्य मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रस इति। अथामूर्त्तं प्राणश्च यश्चायमन्तरात्मन्याकाशः। एतदमृतमेतद्यदेतत्यन्तस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन् पुरुषस्त्यस्यैष रसः। लिङ्गस्य हि करणात्मकस्य हिरण्यगर्भस्य दक्षिणमक्ष्यधिष्ठानं श्रुतेरधिगतम्। तदेवं ब्रह्मण औपाधिकयोर्मूर्त्तामूर्त्तयोराध्यात्मिकाधिदैविकयोः कार्य्यकारणभावेन विभागो व्याख्यातः

सत्यद्वयशब्दवाच्ययोः। अथेदानीं तस्य करणात्मनः पुरुषस्य लिङ्गस्य रूपं वक्तव्यम्। मूर्त्तामूर्त्तवासनाविज्ञानमयं विचित्रं मायामहेन्द्रजालोपमं तद्दिचित्रैर्दृष्टान्तैरादर्शयति तद्यथा "माहारजनम्" इत्यादिना। एतदुक्तं भवति। मूर्त्तामूर्त्तवासनाविज्ञानमयस्य विचित्रं रूपं लिङ्गस्येति। तदेवं निरवशेषं सवासनं सत्यरूपमुक्त्वा यत्तत्सत्यस्य सत्यमुक्तं ब्रह्म तत्स्वरूपावधारणार्थमिदमारभ्यते। यतः सत्यस्य रूपं निःशेषतुक्तमतोऽवशिष्टं सत्यस्य यत्सत्यं तस्यानन्तरं तदुक्तिहेतुकं स्वरूपं वक्तव्यमित्याह। "अथात आदेशः"। कथनम्। सत्यसत्यस्य परमात्मनस्तमाह। "नेति नेति"। एतदर्थंकथनार्थमिदमधिकरणम्। ननु किमेतावदेवादेश्यमुतेतः परमन्यदप्यस्तीत्यत आह। "नह्येतस्माद् ब्रह्मणः" इति। नेत्यादिष्टादन्यत्परमस्ति यदादेश्यं भवेत्। तस्मादेतावदेवादेश्यं नापरमस्तीत्यर्थः। अथैवमर्थनेतिना यत्सन्निहितं परामृष्टं तन्निषिध्यते नञा सन्निहितञ्च मूर्त्तामूर्त्तसवासनं रूपद्वयम्। तदवच्छेदकत्वेन च ब्रह्म। तत्रेदं विचार्य्यते। किं रूपद्वयं सवासनं ब्रह्म च सर्वमेव च प्रतिषिध्यते, उत ब्रह्मैवाथ सवासनं रूपद्वयं ब्रह्म तु परिशिष्यत इति। यद्यपि तेषु तेषु वेदान्तप्रदेशेषु ब्रह्मस्वरूपं प्रतिपादितं तदसद्भावज्ञानञ्च निन्दितम्। अस्तीत्येवोपलब्धव्य इति चास्य सत्त्वमवधारितं तथापि सद्बोधरूपं तद्ब्रह्म सवासनमूर्तामूर्त्तरूपसाधारणतया च सामान्यं तस्य चैते विशेषा मूर्त्तामूर्त्तादयो न च तत्तद्विशेषनिषेधे सामान्यमवस्थातुमर्हति निर्विशेषस्य सामान्यस्यायोगात्। यथाहुः।

'निर्विशेषं न सामान्यं भवेच्छशविषाणवत्'। इति।

तस्मात्तद्विशेषनिषेधेऽपि तत्सामान्यस्य ब्रह्मणोऽनवस्थाना-

सर्वस्यैवायं निषेधः। अतएव नह्येतस्मादिति नेत्यन्यत्पर-मस्तीति निषेधात् परं नास्तीति सर्वनिषेधमेव तत्त्वमाह श्रुतिः। अस्तीत्येवोपलब्धव्य इति चोपासनाविधानवन्नेयं, न त्वस्तित्वमेवास्य तत्त्वम्। तत्प्रशंसार्थं चासद्भाववज्ञान-निन्दा। यच्चान्यत्र ब्रह्मस्वरूपप्रतिपादनं तदपि मूर्तामूर्त-रूपप्रतिपादनवन्निषेधार्थमसन्निहितोऽपि च तत्र निषेधो योग्यत्वात् सम्भन्त्स्यते। यथाहुः।

'येन यस्याभिसम्बन्धो दूरस्थस्यापि तेन सः'। इति।

तस्मात्सर्वस्यैवाविशेषेण निषेध इति प्रथमः पक्षः। अथवा पृथिव्यादिप्रपञ्चस्य समस्तस्य प्रत्यक्षादिप्रमाणसिद्धत्वाद् ब्रह्म-णस्तु वाङ्मनसागोचरतया सकलप्रमाणविरहात् कतर-स्यास्तु निषेध इति विषये प्रपञ्चप्रतिषेधे समस्तप्रत्यक्षादि-व्याकोपप्रसङ्गाद् ब्रह्मप्रतिषेधे त्वव्याकोपाद्ब्रह्मैव प्रतिषेधेन सम्बध्यते योग्यत्वान्न प्रपञ्चस्तद्वैपरीत्यात्, वीप्सा तु तदत्यन्ता-भावसूचनायेति मध्यमः पक्षः। तत्र प्रथमं पक्षं निराक-रोति। "न तावदुभयप्रतिषेध उपपद्यते शून्यवादप्रसङ्गात्" इति। अयमभिसन्धिः। उपाधयो ह्यमी पृथिव्यादयो-ऽविद्याकल्पिता न तु शोणकर्कादय इव विशेषा अश्वत्वस्य। न चोपाधिविगमे उपहितस्याभावोऽप्रतीतिर्वा नह्युपा-धीनां दर्पणमणिकृपाणादीनामपगमे मुखस्याभावोऽप्रती-तिर्वा। तस्मादुपाधिनिषेधेऽपि नोपहितस्य शशविषाणा-यमानताऽप्रत्ययो वा। न चेतीति सन्निधानाविशेषात्स-र्वस्य प्रतिषेध्यत्वमिति युक्तम्। नहि भावमनुपाश्रित्य प्रति-षेध उपपद्यते किञ्चिद्धि क्वचिन्निषिध्यते नह्यनाश्रयः प्रति-षेधः शक्यः प्रतिपत्तुं तदिदमुक्तमपरिशिष्यमाणे चान्यस्मिन् य इतरः प्रतिषेद्धुमारभ्यते तस्य प्रतिषेद्धुमपक्यत्वात्तस्यैव परमा-

र्थत्वापत्तेः प्रतिषेधानुपपत्तिः। मध्यमं पक्षं प्रतिक्षिपति। नापि ब्रह्मनिषेध उपपद्यते। युक्तं यन्नैसर्गिकाविद्याप्राप्तः प्रपञ्चः प्रतिषिध्यते प्राप्तिपूर्वकत्वात्प्रतिषेधस्य। ब्रह्म तु नाविद्यासिद्धं नापि प्रमाणान्तरात्। तस्माच्छब्देन प्राप्तं प्रतिषेधनीयं तथा च यस्तस्य शब्दः प्रापकः स तत्पर इति स ब्रह्मणि प्रमाणमिति कथमस्य निषेधोऽपि प्रमाणवान्। न च पर्य्युदासाधिकरणपूर्वपक्षन्यायेन विकल्पः, वस्तुनि सिद्धस्वभावे तदनुपपत्तेः। न चावाङ्मनसगोचरो बुद्धावालेखितुं शक्यः। अशक्यश्च कथं निषिध्यते। प्रपञ्चस्त्वनाद्यविद्यासिद्धोऽनूद्य ब्रह्मणि प्रतिषिध्यत इति युक्तम्। तदिमामनुपपत्तिमभिप्रेत्योक्तं नापि ब्रह्मप्रतिषेध उपपद्यत इति। हेत्वन्तरमाह। "ब्रह्म ते ब्रवाणि" इति। "उपक्रमविरोधात्" इति। उपक्रमपरामर्शोपसंहारपर्य्यालोचनया हि वेदान्तानां सर्वेषामेव ब्रह्मपरत्वमुपपादितं प्रथमेऽध्याये। न चासत्यामाकाङ्क्षायां दूरतरस्थेन प्रतिषेधेनैषां सम्बन्धः सम्भवति। यच्च वाङ्मनसातीततया ब्रह्मणस्तत्प्रतिषेधस्य न प्रमाणान्तरविरोध इति तत्राह। "वाङ्मनसातीतत्वमपि" इति। प्रतिपादयन्ति वेदान्ता महता प्रयत्नेन ब्रह्म। न च निषेधाय तत्प्रतिपादनम् अनुपपत्तेरित्युक्तमधस्तात्। इदानीं तु निष्प्रयोजनमित्युक्तं प्रक्षालनाद्धि पङ्कस्येति न्यायात्। तस्माद्वेदान्तवाचा मनसि सन्निधानाद्ब्रह्मणो वाङ्मनसातीतत्वं नाञ्जसमपि तु प्रतिपादनप्रक्रियोपक्रम एषः। यथा गवादयो विषयाः साक्षाच्छृङ्गग्राहिकया प्रतिपाद्यन्ते प्रतीयन्ते च नैवं ब्रह्म। यथाहुः।

भेदप्रपञ्चविलयद्वारेण च निरूपणमिति।

ननु प्रकृतप्रतिषेधे ब्रह्मणोऽपि कस्मान्न प्रतिषेध इत्यत आह। "तद्धि प्रकृतं प्रपञ्चितं च" इति। प्रधानं प्रकृतं प्रप-

चश्च प्रधानं न ब्रह्म तस्य षष्ठ्यन्ततया प्रपञ्चावच्छेदकत्वेना-प्रधानत्वादित्यर्थः । "ततोऽन्यद्ब्रवीति" इति । नेति नेतीति प्रतिषेधादन्यद् भूयो ब्रवीतीति । तन्निर्वचनम् । नह्येतस्मा-दित्यस्य यदा नह्येतस्मादिति नेति नेत्यादिष्टाद्ब्रह्मणोऽन्यत्पर-मस्तीति व्याख्यानं तदा प्रपञ्चप्रतिषेधादन्यद्ब्रह्मैव ब्रवीतीति व्याख्येयम् । यदा तु नह्येतस्मादिति सर्वनाम्ना प्रतिषेधो ब्रह्मण आदेशः परामृश्यते तदापि प्रपञ्चप्रतिषेधमात्रं न प्रतिपत्तव्यमपि तु तेन प्रतिषेधेन भावरूपं ब्रह्मोपलक्ष्यते कस्मादित्यत आह । "ततो ब्रवीति च भूयः" इति । यस्मात्प्र-तिषेधस्य परस्तादपि ब्रवीति । अथ ब्रह्मणो नामधेयं नाम सत्यस्य सत्यमिति तद्व्याचष्टे श्रुतिः 'प्राणा वै सत्यम्' इति । माहारजनाद्युपमितं लिङ्गमुपलक्षयति । तत् खलु सत्यमितरा-पेक्षया तस्यापि परं सत्यं ब्रह्म । तदेवं यतः प्रतिषेधस्य पर-स्ताद्ब्रवीति तस्मान्न प्रपञ्चप्रतिषेधमात्रं ब्रह्माऽपि तु भावरू-पमिति । तदेवं पूर्वस्मिन् व्याख्याने निर्वचनं ब्रवीतीति व्याख्यातम् । अस्मिंस्तु सत्यस्य सत्यमिति ब्रवीतीति व्याख्ये-यम् । शेषमतिरोहितार्थम् ॥

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

अनेनाहिरूपेणाभेदः कुण्डलादिरूपेण तु भेद इत्युक्तं तेन विषयभेदाद्भेदाभेदयोरविरोध इत्येकविषयत्वेन वा सर्वदो-पलब्धेरविरोधः । विरुद्धमिति हि नः क्व संप्रत्ययो न यत्प्रमाणेनोपलभ्यते । आगमतश्च प्रमाणादेकगोचरावपि भेदा-भेदौ प्रतीयमानौ न विरोधमावहतः सवितृप्रकाशयोरिव प्रत्यक्षात्प्रमाणाद्भेदाभेदाविति । प्रकारान्तरेण भेदाभेदयो-रविरोधमाह ।

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

तदेवं परमतमुपन्यस्य स्वमतमाह।

पूर्व्ववद्वा ॥ २६ ॥

अयमभिसन्धिः। यस्य मतं वस्तुनोऽहित्वेनाभेदः कुण्डलत्वेन भेद इति। स एवं ब्रुवाणः प्रष्टव्यो जायते किमहित्वकुण्डलत्वे वस्तुनो भिन्ने उताभिन्ने इति। यदि भिन्ने अहित्वकुण्डलत्वे भिन्ने इति वक्तव्यं न तु वस्तुनस्ताभ्यां भेदाभेदौ नह्यन्यभेदाभेदाभ्यामन्यद्भिन्नमभिन्नं वा भवितुमर्हति। अतिप्रसङ्गात्। अथ वस्तुनो न भिद्येते अहित्वकुण्डलत्वे तथा सति को भेदाभेदयोर्विषयभेदस्तयोर्वस्तुनोऽनन्यत्वेनाभेदात्। न चैकविषयत्वेऽपि सदानुभूयमानत्वाद्भेदाभेदयोरविरोधः। स्वरूपविरुद्धयोरप्यविरोधे क्व नाम विरोधो व्यवतिष्ठेत। न च सदानुभूयमानं विचारासहं भाविकं भवितुमर्हति। देहात्मभावस्यापि सर्वदानुभूयमानस्य भाविकत्वप्रसङ्गात्। प्रपञ्चितं चैतदस्माभिः प्रथमसूत्र इति नेह प्रपञ्चितम्। तस्मादनाद्यविद्याविक्रीडितमेवैकस्यात्मनो जीवभावभेदो न भाविकस्तथा च तत्त्वज्ञानादविद्यानिवृत्तावपवर्गसिद्धिः। तात्त्विकत्वे त्वस्य न ज्ञानान्निवृत्तिसम्भवः। न च तत्त्वज्ञानादन्यदपवर्गसाधनमस्ति। यथाह श्रुतिः। 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति। शेषमतिरोहितार्थम् ॥

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥३१॥

यद्यपि श्रुतिप्राचुर्याद्ब्रह्मव्यतिरिक्तं तत्त्वं नास्तीत्यवधारितं तथापि सेत्वादिश्रुतीनामापाततस्तद्विरोधदर्शनात् तत्प्रतिसमाधानार्थमयमारम्भः। "जाङ्गलं" स्थलम्। प्रकाशवदन-

न्तवज्ज्योतिष्मदायतनवदिति पादा ब्रह्मणश्चत्वारस्तेषां पादानामर्द्धान्यष्टौ शफाः । तेऽष्टावस्य ब्रह्मण इत्यष्टशफं ब्रह्म । षोडश कला अस्येति षोडशकलम् । तद्यथा प्राचीप्रतीचीदक्षिणोदीचीति चतस्रः कला अवयवा इव कलाः स प्रकाशवान्नाम प्रथमः पादः । एतदुपासनायां प्रकाशवान् मुख्यो भवतीति प्रकाशवान् पादः । अथापराः पृथिव्यन्तरिक्षं द्यौः समुद्र इति चतस्रः कला एष द्वितीयः पादोऽनन्तवान्नाम सोऽयमनन्तवत्त्वेन गुणेनोपास्यमानोऽनन्तत्वमुपासकस्यावहतीति अनन्तवान् पादः । अथाग्निः सूर्य्यश्चन्द्रमा विद्युदिति चतस्रः कलाः स ज्योतिष्मान्नाम पादस्तृतीयस्तदुपासनाज्ज्योतिष्मान् भवतीति ज्योतिष्मान् पादः । अथ घ्राणश्चक्षुः श्रोत्रं वागिति चतस्रः कलाश्चतुर्थः पादः आयतनवान्नामैते घ्राणादयो हि गन्धादिविषया मन आयतनमाश्रित्य भोगसाधनं भवन्तीत्यायतनवान्नाम पादः । तदेवं चतुष्पाद् ब्रह्माष्टशफं षोडशकलमुन्मिषितं श्रुत्या । अतस्ततो ब्रह्मणः परमन्यदस्ति । स्यादेतत् । अस्ति चेत् परिसंख्यायोच्यतामेतावदित्यत आह "अमितमस्तीति" । प्रमाणसिद्धम् । न त्वेतावदित्यर्थो भेदव्यपदेशश्च त्रिःप्रकारः । आधारतश्चातिदेशतश्चावधितश्च ॥

सामान्यात्तु ॥ ३२ ॥

जगतस्तन्मर्य्यादानाच्च विधारकत्वञ्च सेतुसामान्यम् । यथा हि तन्तवः पटं विधारयन्ति तदुपादानत्वादेवं ब्रह्मापि जगद्विधारयति तदुपपादकत्वात् । तन्मर्य्यादानाच्च विधारकं ब्रह्म इतरथाऽतिचपलस्थलबलवत्कल्लोलमालाकलिलो जल-

निधिरिलापरिमण्डलमवगिलेत्। वडवानलो वा विस्फूर्जितज्वालाजटिलो जगद्भस्मसाद्भावयेत्। पवनः प्रचण्डो वाऽकाण्डमेव ब्रह्माण्डं विघटयेदिति। तथा च श्रुतिः। भीषास्माद्वातः पवते इत्यादिका। मनसो ब्रह्मप्रतीकस्य समारोपितब्रह्मभावस्य वाग्घ्राणचक्षुः श्रोत्रमिति चत्वारः पादाः। मनो हि वक्तव्यघ्रातव्यद्रष्टव्यश्रोतव्यान् गोचरान् वागादिभिः सञ्चरतीति सञ्चरणसाधारणतया मनसः पादास्तदिदमध्यात्मम्। आकाशस्य ब्रह्मप्रतीकस्याग्निर्वायुरादित्यो दिश इति चत्वारः पादाः। ते हि व्यापिनो नभस उदर इव गोः पादा विलग्ना उपलक्ष्यन्त इति पादाः। तदिदमधिदैवतम्। तदनेन पादवदिति वैदिकं निदर्शनं व्याख्याय लौकिकं चेदं निदर्शनमित्याह। "अथवा पादवदिति। "तद्वत्" इति इहापि मन्दबुद्धीनामाध्यानव्यवहारायेत्यर्थः॥

स्थानविशेषात् प्रकाशादिवत्॥ ३४॥

बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य जाग्रत्स्वप्नयोर्विशेषविज्ञानस्योपाध्युपशमेऽभिभवे सुषुप्तावस्थानमिति। तथा भेदव्यपदेशोऽपि विविधो ब्रह्मण उपाधिभेदापेक्षयेति। यथा सौधजालमार्गनिवेशिन्यः सवितृभासो जालमार्गोपाधिभेदाद्भिन्ना भासन्ते तद्विगमे तु गभस्तिमण्डलेनैकीभवन्त्यतस्तेन सम्बन्ध्यन्त एवमिहापीति। स्यादेतत्। एकीभावः कस्मादिह सम्बन्धः कथञ्चिद्व्याख्यायते न मुख्य एवेत्यत तत्सूत्रेण परिहरति॥

उपपत्तेश्च॥ ३५॥

स्वमपीत इति हि स्वरूपसम्बन्धं ब्रूते। स्वभावश्चेदनेन सम्बन्धित्वेन स्पष्टस्ततः स्वाभाविकस्तादात्म्यमात्रातिरिच्यत

इति तर्कपाद उपपादितमित्यर्थः । तथा भेदोऽपि त्रिविधो नान्यादृशः स्वाभाविक इत्यर्थः ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥

सुगमेन भाष्येण व्याख्यातम् ।

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

ब्रह्माद्वैतसिद्धावपि न सर्वगतत्वं सर्वव्यापिता सर्वस्य ब्रह्मणा स्वरूपेण रूपवत्त्वं सिध्यतीत्यत आह । "अनेन सेत्वादिनिराकरणेन" परहेतुनिराकरणेनान्यप्रतिषेधसमाश्रयणेन च स्वसाधनोपन्यासेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति । अद्वैते सिद्धे सर्वोऽयमनिर्वचनीयः प्रपञ्चावभासो ब्रह्माधिष्ठान इति सर्वस्य ब्रह्मसम्बन्धाद्ब्रह्म सर्वगतमिति सिद्धम् ॥

फलमत उपपत्तेः ॥ ३८ ॥

सिद्धान्तोपक्रममिदमधिकरणम् । स्यादेतत् । नित्यशुद्धबुद्धमुक्तस्वभावस्य ब्रह्मणः कुत ईश्वरत्वं कुतश्च फलहेतुत्वमपीत्यत आह । "तस्यैव ब्रह्मणो व्यावहारिक्याम्" इति । नास्य पारमार्थिकं रूपमाश्रित्यैतच्चिन्त्यते किन्तु सांव्यवहारिकमेतच्च तपसा चीयते ब्रह्मेति व्याचक्षाणैरस्माभिरुपपादितम् । इष्टं फलं स्वर्गः । यथाहुः ।

'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्' ॥ इति ।

अनिष्टमवीच्यादिस्थानभोग्यं व्यामिश्रं मनुष्यभोग्यम् । तच्च तावत्प्रतिपाद्यते । फलमत ईश्वरात्कर्मभिराराधिताद्भवितुमर्हति । अथ कर्मण एव फलं कस्मान्न भवतीत्यत आह । "कर्मणस्त्वनन्तरविनाशिनः प्रत्यक्षविनाशिनः" इति । चोदयति ।

"स्यादेतत् कर्म विनश्यत्" इति। उपात्तमपि फलं भोक्तुमयोग्यत्वाद्वा कर्मान्तरप्रतिबन्धाद्वा न भुज्यत इत्यर्थः। परिहरति। "तदपि न परिशुध्यति" इति। नहि स्वर्ग आत्मानं लभतामित्यधिकारिणः कामयन्ते किन्तु भोग्योऽस्माकं भवत्विति। तेन यादृशमेभिः काम्यते तादृशस्य फलत्वमिति भोग्यत्वमेव सत्फलमिति। न च तादृशं कर्मानन्तरमिति कथं फलं सदपि स्वरूपेण। अपि च स्वर्गनरकौ तीव्रतमे सुखदुःखे इति तद्विषयेणानुभवेन भोगापरनाम्नावश्यं भवितव्यम्। तस्मादनुभवयोग्ये अननुभूयमाने शशशृङ्गवन्न स्त इति निश्चीयते। चोदयति। "अथोच्येत मा भूत्कर्मानन्तरं फलोत्पादः कर्मकार्य्यादपूर्वाद्भवेत्" इति। परिहरति। "तदपि न" इति। यद्यदचेतनं तत्तत्सर्वं चेतनाधिष्ठितं प्रवर्त्तत इति प्रत्यक्षागमाभ्यामवधारितम्। तस्मादपूर्वेणाप्यचेतनेन चेतनाधिष्ठितेनैव प्रवर्त्तितव्यं नान्यथेत्यर्थः। न चापूर्वं प्रामाणिकमपीत्याह। "तदस्ति च" इति॥

श्रुतत्वाच्च ॥ ३९ ॥

"अन्नादः" अन्नप्रदः। सिद्धान्तेनोपक्रम्य पूर्वपक्षं गृह्णाति॥

धर्मं जैमिनिरत एव ॥ ४० ॥

श्रुतिमाह। "श्रूयते तावत्" इति। ननु स्वर्गकामो यजेतेत्यादयः श्रुतयः फलं प्रति न साधनतया यागं विदधति। तथाहि। यदि यागादय एव क्रिया न तदतिरिक्ता भावना तथापि त एव स्वपदेभ्यः पूर्वापरीभूताः साध्यस्वभावा अवगम्यन्त इति न साध्यान्तरमपेक्षन्त इति न स्वर्गेण साध्यान्तरेण सम्बन्धुमर्हन्ति। अथापि तदतिरेकिणी भावनास्ति तथाप्यसौ भाव्यापेक्षापि स्वपदोपात्तं पूर्वावगतं च भाव्यं धात्वर्थमपहाय

न भिन्नपदोपात्तं पुरुषविशेषणं च स्वर्गादि भाव्यतया स्वीकर्त्तुमर्हति न चैकस्मिन् वाक्ये साध्यद्वयसम्बन्धसम्भवः । वाक्यभेदप्रसङ्गात् । न केवलं शब्दतो वस्तुतश्च पुरुषप्रयत्नस्य भावनायाः साक्षाद्धात्वर्थ एव साध्यो न तु स्वर्गादिस्तस्य तदव्याप्यत्वात् । स्वर्गादेस्तु नामपदाभिधेयतया सिद्धरूपस्याख्यातवाच्यं साध्यं धात्वर्थं प्रति भूतं भव्यायोपदिश्यत इति न्यायात्साधनतया गुणत्वेनाभिसम्बन्धः । तथाच पारमर्षं सूत्रम् । 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः' इति । तथा च कर्मणो यागादेर्दुःखत्वेन पुरुषेणासमीहितत्वात् समीहितस्य च स्वर्गादेरसाध्यत्वान्न यागादयः पुरुषस्योपकुर्वन्त्यनुपकारिणां चैषां न पुरुष ईष्टे 'अनीशानश्च न तेषु सम्भवत्यधिकारीत्यधिकाराभावप्रतिपादितानर्थक्यपरिहाराय कृत्स्नस्यैवाम्नायस्य निर्मृष्टनिखिलदुःखानुषङ्गनित्यसुखमयब्रह्मज्ञानपरत्वं भेदप्रपञ्चविलयनद्वारेण । तथाहि । सर्वत्रैवाम्नाये क्वचित्कस्यचिद्भेदस्य प्रविलयो गम्यते यथा स्वर्गकामो यजेतेति शरीरात्मभावप्रविलयः । इह खल्वापाततो देहातिरिक्त आमुष्मिकफलोपभोगसमर्थोऽधिकारी गम्यते । तत्राधिकारस्योक्तेन क्रमेण निराकरणात् असतोऽपि प्रतीयमानस्य विचारासहस्योपायतामात्रेणावस्थानादनेन वाक्येन देहात्मभावप्रविलयस्तत्परेण क्रियते । गोदोहनेन पशुकामस्य प्रणयेदित्यत्राप्यापाततोऽधिकृताधिकारावगमादधिकारिभेदप्रविलयः । निषेधवाक्यानि च साक्षादेव प्रवृत्तिनिषेधेन विधिवाक्यानि चान्यानि सांग्रहण्या यजेत ग्रामकाम इत्यादीनि न सांग्रहण्यादिप्रवृत्तिपराण्यपि तूपायान्तरोपदेशेन सेवादिदृष्टोपायप्रतिषेधार्थानि । यथा विषं भुङ्क्ष्व माऽस्य गृहे भुङ्क्ष्व इति । तथा च रागाद्याचितप्रवृत्तिप्रतिषेधेन शास्त्रस्य

शास्त्रत्वमप्युपपद्यते रागनिबन्धनां तूपायोपदेशद्वारेण प्रवृत्तिमनुजानतो रागसंवर्द्धनादशास्त्रत्वप्रसङ्गः। तन्निषेधेन तु ब्रह्मणि प्रणिधानमादधत् शास्त्रं शास्त्रं भवेत्। तस्मात्कर्मफल-सम्बन्धस्याप्रमाणिकत्वादनादिविचित्राविद्या-सहकारिण ईश्वरादेव कर्मानपेक्षाद्विचित्रफलोत्पत्तिरिति। कथं तर्हि विधिः किमत्र कथं प्रवर्त्तनामात्रत्वाद्विधेस्तस्य चाधिकारमन्तरेणाप्युपपत्तेः। नहि योयः प्रवर्त्तयति स सर्वोऽधिकृतमपेक्षते। पवनादेः प्रवर्त्तकस्य तदनपेक्षत्वादिति शङ्कामपाचिकीर्षुराह। "तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते"। अन्यथा ह्यननुष्ठातृको याग आपद्येत। अयमभिसन्धिः। उपदेशो हि विधिः। यथोक्तं तस्य ज्ञानमुपदेश इति। उपदेशश्च नियोज्यप्रयोजने कर्मणि लोकशास्त्रयोः प्रसिद्धः। तद्यथाऽऽरोग्यकामो जीर्णे भुञ्जीत। एष सुपन्था गच्छतु भवाननेनेति। न त्वाज्ञादिरिव नियोक्तृप्रयोजनस्तत्राभिप्रायस्य प्रवर्त्तकत्वात् तस्य चापौरुषेयेऽसम्भवात्। अस्य चोपदेशस्य नियोज्यप्रयोजनव्यापारविषयत्वमनुष्ठात्रपेक्षितानुकूलव्यापारगोचरत्वमस्माभिरुपपादितं न्यायकणिकायाम्। तथाच स्वर्गकामो यजेतेत्यादिषु स्वर्गकामादेः समीहितोपाया गम्यन्ते यागादयः। इतरथा तु न साधयितारमनुगच्छेयुः। तदुक्तमृषिणा। असाधकन्तु तादर्थ्यादिति। अनुष्ठात्रपेक्षितोपायतारहित-प्रवर्त्तनामात्रार्थत्वे यजेतेत्यादीनामसाधकं कर्म यागादि स्यात् साधयितारं नाधिगच्छेदित्यर्थः। न चैते साक्षाद्भावनाभाव्या अपि कर्त्रपेक्षितसाधनताविध्युपहितमर्य्यादा भावनोद्देश्या भवितुमर्हन्ति। येन पुंसामनुपकारकाः सन्तो नाधिकारभाजो भवेयुः। दुःखत्वेन कर्मणां चेतनसमीहानास्पदत्वात्।

स्वर्गादीनान्तु भावनापूर्वरूपकामनोपधानाच्च। प्रीत्यात्मकत्वाच्च। नामपदाभिधेयानामपि पुरुषविशेषणानामपि भावनोद्देश्यतालक्षणभाव्यत्वप्रतीतेः। फलार्थप्रवृत्तभावनाभाव्यत्वलक्षणेन च यागादिसाध्यत्वेन फलार्थप्रवृत्तभावनाभाव्यत्वरूपस्य फलसाध्यत्वस्य समप्रधानत्वाभावेनैकवाक्यसमवायसम्भवात् भावनाभाव्यत्वमात्रस्य च यागादिसाध्यत्वस्य करणेऽप्यविरोधात्। अन्यथा सर्वत्र तदुच्छेदात्। पश्वादेरपि छिदादिषु तथाभावात् फलस्य साक्षाद्भावनाव्याप्यत्वविरहिणोऽपि तदुद्देश्यतया सर्वत्र व्यापितया व्यवस्थानात् स्वर्गसाधने यागादौ स्वर्गकामादेरधिकार इति सिद्धम्। न चाप्राप्तार्थविषयाः सांग्रहण्यादियागविधयः परिसंख्यायका नियामका वा भवितुमर्हन्ति। न चाधिकाराभावे देहात्मप्रविलयो वाधिकारिभेदप्रविलयो वा शक्य उपपादयितुम्। आपाततः प्रतिभाने चास्य तत्परत्वमेव नार्थायातपरत्वं स्वरसतः प्रतीयमानेऽर्थे वाक्यस्य तादर्थ्ये सम्भवति न सम्पातायातपरत्वमुचितम्। न चैतावता शास्त्रत्वव्याघातः। तस्य स्वर्गाद्युपायशासनेऽपि शास्त्रत्वोपपत्तेः। पुरुषश्रेयोऽभिधायकत्वं हि शास्त्रत्वं सरागवीतरागपुरुषश्रेयोऽभिधायकत्वेन सर्वपारिषदतया न तत्त्वव्याघातः। तस्माद्विधिविषयभावोपगमाद् यागः स्वर्गस्योत्पादक इति सिद्धम्। "कर्मणो वा काचिदवस्था" इति। कर्मणोऽवान्तरव्यापारः। एतदुक्तं भवति। कर्मणो हि फलं प्रति तत्साधनत्वं श्रुतं तन्निर्वाहयितुं तस्यैवावान्तरव्यापारो भवति। न च व्यापारवति सत्येव व्यापारो नास्तीति युक्तम्। असत्स्वप्याग्नेयादिषु तदुत्पत्त्यपूर्वाणां परमापूर्वं जनयितव्ये तदवान्तरव्यापारत्वात्। असत्यपि च तैलपानकर्मणि तेन पुष्टौ कर्त्तव्यायामन्तरा

तैलपरिणामभेदानां तदवान्तरव्यापारत्वात्। तस्मात् कर्म-कार्य्यमपूर्वं कर्मणा फले कर्त्तव्ये तदवान्तरव्यापार इति युक्तम्। यदा पुनः फलोपजननान्यथानुपपत्त्या किञ्चित् कल्प्यते तदा फलस्य वा पूर्वावस्था। "अविचित्रस्य कारणस्येति"। यदीश्वरादेव केवलादिति शेषः। कर्मभिर्वा शुभाशुभैः कार्य्यद्वैधोत्पादे रागादिमत्त्वप्रसङ्ग इत्याशयः॥

पूर्वं तु बादरायणो हेतुव्यपदेशात्॥ ४१॥

दृष्टानुसारिणी हि कल्पना युक्ता नान्यथा। नहि जातु मृत्पिण्डदण्डादयः कुम्भकाराद्यनधिष्ठिताः कुम्भाद्यारम्भाय विभववन्तो दृष्टाः। न च विद्युत्पवनादिभिरप्रयत्नपूर्वैर्व्यभिचारः, तेषामपि कल्पनास्पदतया व्यभिचारनिदर्शनत्वानुपपत्तेः। तस्मादचेतनं कर्म वाऽपूर्वं वा न चेतनानधिष्ठितं स्वतन्त्रं स्वकार्य्यं प्रवर्त्तितुमुत्सहते। न च चैतन्यमात्रं कर्मस्वरूपसामान्यविनियोगादिविशेषविज्ञानशून्यमुपयुज्यते येन तद्रहितचैतन्यमात्राधिष्ठानेन सिद्धसाध्यत्वमुद्भाव्येत, तस्मात् तत्तत्प्रासादाट्टालगोपुरतोरणाद्युपजननिदर्शनसहस्रैः सुपरिनिश्चितं यथा चेतनाधिष्ठानादचेतनानां कार्य्यारम्भकत्वमिति तथा चेतन्यं देवताया असति बाधके श्रुतिस्मृतीतिहासपुराणप्रसिद्धं न शक्यं प्रतिषेद्धुमित्यपि स्पष्टं निरटङ्कि देवताधिकरणे। लौकिकश्चेश्वरा दानपरिचरणप्रणामाञ्जलिकरणस्तुतिमयीभिरतिश्रद्धागर्भाभिर्भक्तिभिराराधितः प्रसन्नः स्वानुरूपमाराधकाय फलं प्रयच्छति विरोधितश्चापक्रियाभिर्विरोधकायाहितमित्यपि सुप्रसिद्धं, तदिह केवलं कर्म वाऽपूर्वं वा चेतनानधिष्ठितमचेतनं फलं प्रसूत इति दृष्टविरुद्धम्। यथा विनष्टं कर्म न फलं प्रसूत इति कल्प्यते दृष्टविरोधादेवमिहा-

पीति। तथा देवपूजात्मको यागो देवतां न प्रसादयन् फलं प्रसूत इत्यपि दृष्टविरुद्धम्। न हि राजपूजात्मकमाराधनं राजानमप्रसाद्य फलाय कल्पते। तस्मात् दृष्टानुगुण्याय यागादिभिरपि देवताप्रसत्तिरुत्पाद्यते। तथाच देवताप्रसादादेव स्थायिनः फलोत्पत्तेरुपपत्तेः कृतमपूर्वेण। एवमशुभेनापि कर्मणा देवताविरोधनं श्रुतिस्मृतिप्रसिद्धम्। ततः स्थायिनोऽनिष्टफलप्रसवः। न च शुभाशुभकारिणां तदनुरूपं फलं प्रसुवाना देवता द्वेषपक्षपातवतीति युज्यते। नहि राजा साधुकारिणमनुगृह्णन्निगृह्णन् वा पापकारिणं भवति द्विष्टो रक्तो वा तद्वदलौकिकोऽपीश्वरः। यथा च परमापूर्वे कर्त्तव्ये उत्पत्त्यपूर्वाणामङ्गापूर्वाणां चोपयोगः। एवं प्रधानाराधनेऽङ्गाराधनानामुत्पत्त्याराधनानां चोपयोगः। स्वाम्याराधन इव तदमात्यतत्प्रणयिजनाराधनानामिति सर्वं समानमन्यत्राभिनिवेशात्। तस्मात् दृष्टाविरोधेन देवताराधनात् फलं न त्वपूर्वात्कर्मणो वा केवलाद्विरोधतो हेतुव्यपदेशश्च श्रौतः स्मार्त्तश्च व्याख्यातः। ये पुनरन्तर्यामिव्यापाराया फलोत्पादनाया नित्यत्वं सर्वसाधारणत्वमिति मन्यमाना भाष्यकारीयमधिकरणं दूषयाम्बभूवुः। तेभ्यो व्यावहारिक्यामौशित्रीशितव्यविभागावस्थायामिति भाष्यं व्याचक्षीत ॥

इति श्रीवाचस्पतिमिश्रविरचिते भाष्यविभागे भामत्यां

तृतीयस्याध्यायस्य द्वितीयः पादः ॥

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

पूर्वेण सङ्गतिमाह। "व्याख्यातं विज्ञेयस्य ब्रह्मणः" इति। निरुपाधिब्रह्मतत्त्वगोचरं विज्ञानं मन्वान आक्षिपति। "ननु विज्ञेयं ब्रह्म" इति। सावयवस्य ह्यवयवानां भेदात्तदव-

यवविशिष्टब्रह्मगोचराणि विज्ञानानि गोचरभेदाद्भिद्येरन्नित्यवयवा ब्रह्मणो निराकृताः पूर्वापरादीत्यनेन । न च नानास्वभावं ब्रह्म यतः स्वभावभेदाद् भिन्नानि ज्ञानानीत्युक्तमेकरसमिति । "घनं" कठिनम् । नन्वेकमप्यनेकरूपं लोके दृष्टं यथा सोमशर्म्मैकोऽप्याचार्य्यो मातुलः पिता पुत्रो भ्राता भर्त्ता जामाता द्विजोत्तम इत्यनेकरूप इत्यत उक्तं "एकरूपत्वाच्च"। एकस्मिन् गोचरे सम्भवन्ति बहूनि विज्ञानानि न त्वनेकाकाराणीत्युक्तम् । "अनेकरूपाणि" । रूपमाकारः । समाधत्ते । "उच्यते । सगुणेति" । तत्तद्गुणोपाधानब्रह्मविषया उपासनाः प्राणादिविषयाश्च दृष्टादृष्टक्रममुक्तिफला विषयभेदाद्भिद्यन्त इत्यर्थः । तत उपपन्नो विमर्श इत्याह । "तेष्वेषा चिन्ता" । पूर्वपक्षं गृह्णाति । "तत्र" इति । "नाम्नस्तावत्" इति । अस्त्यथैष ज्योति रेतेन सहस्रदक्षिणेन यजेतेति । तत्र संशयः । किं यजेतेति सन्निहितज्योतिष्टोमानुवादेन सहस्रदक्षिणालक्षणगुणविधानम्, उतैतद्गुणविशिष्टकर्मान्तरविधानमिति । किं तावत् प्राप्तं, ज्योतिष्टोमस्य प्रक्रान्तत्वाद्यजेतेति तदनुवादाज्ज्योतिरिति प्रातिपदिकमात्रं पठित्वा एतेनेत्यनुकृष्य कर्मसामानाधिकरण्येन कर्मनामव्यवस्थापनात् कर्मणश्चानुवाद्यत्वेन तत्सम्बन्धस्य नाम्नोऽपि तथैव व्यवस्थापनात् ज्योतिःशब्दस्य वसन्ते वसन्ते ज्योतिषेति च ज्योतिष्टोमे योगदर्शनात् नामैकदेशेन च नामोपलक्षणस्य लोकसिद्धत्वात् भीमसेनोपलक्षणभीमपदवद् अथशब्दस्य चानन्तर्य्यार्थस्यासम्बन्धित्वेऽनुपपत्तेर्गुणविशिष्टकर्मान्तरविधेश्च गुणमात्रविधानस्य लाघवाद् द्वादशशतदक्षिणायाश्चोत्पत्त्यशिष्टतया समशिष्टतया सहस्रदक्षिणया सह विकल्पोपपत्तेः प्रकृतस्यैव ज्योतिष्टोमस्य सहस्रदक्षिणालक्षणगुणविधानार्थमयमनुवादो न तु कर्मान्त-

रमिति प्राप्तम् । एवं प्राप्त उच्यते । भवेत् पूर्वस्मिन् गुणविधिर्यदि तदेव प्रकरणं स्यात् । विच्छिन्नं तु तत् तथाहि । सन्निधावपि पूर्वासम्बद्धार्थं संज्ञान्तरं प्रतीयमानमन्यायश्चानेकार्थत्वमिति न्यायाद् उत्सर्गतोऽर्थान्तरार्थत्वात् पूर्वबुद्धिं व्यवच्छिनत्त्यपूर्वबुद्धिं च प्रसूत इति लोकसिद्धम् । न जातु देहि देवदत्ताय गामथ देवाय वाजिनमिति देवशब्दाद् देवदत्तं वाजिभाजमवस्यति लौकिकाः । तथा चोपरिष्टाद् यजेतेति श्रूयमाणमसम्बद्धार्थपदव्यवायात् तत्कर्मबुद्धिमनादधत् तत्र गुणविधानमात्रासमर्थं कर्मान्तरमेव विधत्ते । न चैकत्वानुपपत्त्या लक्षणया ज्योतिःशब्दो ज्योतिष्टोमे प्रवृत्त इत्यसत्यामनुपपत्तौ लाक्षणिको युक्तः । नहि गङ्गायां घोष इत्यत्र गङ्गापदं लाक्षणिकमिति मीनो गङ्गायामित्यत्रापि लाक्षणिकं भवति । भेदेऽपि च प्रथमं संज्ञान्तरेणोल्लिखिते यजिशब्दसामानाधिकरण्यं कर्मनामधेयतामात्रतामावहति न तु संज्ञान्तरोपजनितां भेदधियमपनेतुमुत्सहते । तथा चाथशब्दोऽधिकारार्थः प्रकरणान्तरतामवद्योतयति । एषशब्दश्चाधिक्रियमाणपरामर्शक इति सोऽयं संज्ञान्तराद्भेद इति । भवतु संज्ञान्तरात्कर्मभेदः प्रस्तुते तु किमायातमित्यत आह । "अस्ति चात्र वेदान्तान्तरविहितेषु" इति । यथैव काठकादिसमाख्याग्रन्थे प्रयुज्यत एवं ज्ञानेऽपि लौकिकाः । न चास्ति विशेषो यतो ग्रन्थे मुख्या विज्ञाने गौणी भवेत् । प्रणयनं च ग्रन्थज्ञानयोरभिन्नं प्रवृत्तिनिमित्तं तस्माज्ज्ञानस्यापि वाचिका समाख्या । तथा च यदा ज्योतिष्टोमसन्निधौ श्रूयमाणं समाख्यान्तरं तत्प्रतीकमपि कर्मणो भेदकं तदा कैव कथा शाखान्तरीये विप्रकृष्टतमेऽतत्प्रतीकभूतसमाख्यान्तराभिधेये ज्ञान इति । तथा रूपभेदोऽपि कर्मभेदस्य प्रतिपा-

दकः प्रसिद्धो यथा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येव-मादिषु। इदमाम्नायते। तप्ते पयसि दध्यानयति सा वैश्व-देव्यामिक्षेति। अत्र हि द्रव्यदेवतासम्बन्धानुमितो यागो विधीयते तदनन्तरं चेदमाम्नायते। वाजिभ्यो वाजिनमिति। अत्रेदं सन्दिह्यते। किं पूर्वस्मिन्नेव कर्मणि वाजिनं गुणो विधीयते, उत कर्मान्तरं द्रव्यदेवतान्तरविशिष्टमपूर्वं विधीयत इति। किं तावत् प्राप्तं, द्रव्यदेवतान्तरविशिष्टकर्मान्तरविधौ विधिगौरवप्रसङ्गात् कर्मान्तरापूर्वान्तरकल्पनागौरवप्रसङ्गाच्च न कर्मान्तरविधानमपि तु पूर्वस्मिन्नेव कर्मणि वाजिनद्रव्य-विधिः। न चोत्पत्तिशिष्टामिक्षागुणावरोधात्तत्र वाजिनम-लब्धावकाशं कर्मान्तरं गोचरयतीति युक्तम्। उभयोरपि वाक्ययोः समसमयप्रवृत्तेरामिक्षावाजिनयोरुत्पत्तौ समं शिष्य-माणत्वेन नामिक्षायाः शिष्टत्वम्। तत्कथमनयावरुद्धं कर्म न वाजिनं निविशेत्। न च वैश्वदेवीत्यत्र श्रौत आमिक्षा-सम्बन्धो विश्वेषां देवानां येन वाजिनसम्बन्धात् वाक्यगम्या-द्बलवान् भवेदुभयोरपि पदान्तरापेक्षप्रतीतितया वाक्यगम्य-त्वाविशेषात्। नो खलु वैश्वदेवीत्युक्ते आमिक्षापदानपेक्षा-मामिक्षामध्यवस्यामः। अस्तु वा श्रौतत्वं तथापि वाजिभ्य इति पदं वाजमन्नमामिक्षा तदेषामस्तीति व्युत्पत्त्या तत्-सम्बन्धिनो विश्वान्देवानुपलक्षयति। यद्यपि विश्वेदेवशब्दा-द्वाजिपदं भिन्नं येन च शब्देन चोदना तेनैवोद्देशे देवतात्वं न शब्दान्तरेण। अन्यथाऽर्थैकत्वेन सूर्यादित्यपदयोः सूर्या-दित्यचर्वोरेकदैवत्यप्रसङ्गात्। तथापि वाजिन्नितीनेः सर्व-नामार्थे स्मरणात् सन्निहितस्य च सर्वनामार्थत्वाद्विश्वेषां देवानां च विश्वदेवपदेन सन्निधापनात्तत् पदपुरःसरा एवैते वाजिपदेनोपस्थाप्या न तु सूर्यादित्यपदवत्स्वतन्त्रास्तथा

च तदुपलक्षणार्थं वाजिपदं विश्वदेवोपहितामेव देवतामुपलक्षयतीति न शब्दान्तराद्देवताभेदस्ततश्चामिक्षासम्बन्धोपजीवनेन विश्वेभ्यो वाजिनं विधीयमानं नामिक्षया बाध्यते किन्तु तया सह समुच्चीयत इति न कर्मान्तरमपि तु वाक्याभ्यां द्रव्ययुक्तमेकं कर्म विधीयत इति प्राप्ते। उच्यते। स्यादेतदेवं यदि वैश्वदेवीति तद्धितश्रुत्यामिक्षा नोच्येत। तद्धितस्य त्वस्येति सर्वनामार्थे स्मरणात् सन्निहितस्य च विशेषस्य सर्वनामार्थत्वात् तत्रैव तद्धितस्यापि वृत्तिः। न तु विश्वेषु देवेषु न तत्सम्बन्धेनापि तत्सम्बन्धिमात्रे। नन्वेवं सति कस्माद्वैश्वदेवीशब्दमात्रादेव नामिक्षां प्रतीमः किमिति चामिक्षापदमपेक्षामहे। तद्धितान्तस्य पदस्याभिधानापर्य्यवसानान्न प्रतीमस्तत्पर्य्यवसानाय चापेक्षामहे। अवसिताभिधानं हि पदं समर्थमर्थधियमाधातुमिदन्तु सन्निहितविशेषाभिधायि तत्सन्निधिमपेक्षमाणं सन्निधापकमामिक्षापदमपेक्षत इति कुत आमिक्षापदानपेक्ष आमिक्षाप्रत्ययप्रसङ्गः। कुतो वा तत्रानपेक्षा। अतश्च सत्यामपि पदान्तरापेक्षायां यत्पदं पदान्तरापेक्षमभिधत्ते तत्प्रमाणभूतप्रथमभाविपदावगम्यत्वात् श्रौतं बलीयश्च। यत्तु पर्य्यवसिताभिधानपदाभिहितपदार्थावगमगम्यं तत्तच्चरमप्रतीतिवाक्यगम्यं दुर्बलञ्चेति तद्धितश्रुत्यवगतामिक्षालक्षणगुणावरोधात् पूर्वकर्मासंयोगिवाजिनद्रव्यं सत्सम्बन्धि पूर्वस्माद् भिनत्ति। एवं च सति नित्यवदवगतानपेक्षसाधनभावामिक्षा न वाजिनद्रव्येण सह विकल्पसमुच्चयौ प्राप्नुतः। न चाश्वत्वे निरूढत्वादनपेक्षवृत्ति वाजिपदं कथञ्चिद्यौगिकं सापेक्षवृत्ति विश्वेदेवशब्दां देवतां वैश्वदेवीपदादामिक्षाद्रव्यं प्रत्युपसर्जनीभूतामवगतामुपलक्षयिष्यति। प्रकृतं हि सर्वनामपदगोचरः प्रधानञ्च

प्रकृतमुच्यते नोपसर्जनम्। प्रामाणिके च विधिकल्पनागौरवेऽभ्युपेतव्य एव प्रमाणस्य तत्त्वविषयत्वात्तस्माद्यथेह पूर्वकर्मासम्भविनो गुणात्कर्मभेद एवमिहापि पञ्चाग्निविद्यायाः षडग्निविद्या भिन्ना एवं प्राणसंवादेषूनाधिकभावेन विद्याभेद इति। तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक इति। तथाहि। कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नाचरन्त्यन्ये। तथाग्निमधीयानाः केचिदुपाध्यायस्योदकुम्भमाहरन्ति नाहरन्त्यन्ये। तथाश्वमेधमधीयानाः केचिदश्वस्य घासमानयन्ति नानयन्त्यन्ये। केचित्त्वाचरन्त्यन्यमेव धर्मम्। न च तान्येव कर्माणि भूमिभोजनादिजनितमुपकारमाकाङ्क्षन्ति नाकाङ्क्षन्ति चेति युज्यते। अतोऽवगम्यते भिन्नानि तासु तासु शाखासु कर्माणीति। अस्तु प्रस्तुते किमायातमित्यत आह। "अस्ति चात्र" इति। अन्येषां शाखिनां नास्तीति शेषः। "एवं पुनरुक्तादयोऽपि" इति। समिधो यजतीत्यादिषु पञ्चकृत्वोऽभ्यस्तो यजतिशब्दः। तत्र किमेका कर्मभावना किंवा पञ्चैवेति। किन्तावत्प्राप्तं, धात्वर्थानुबन्धभेदेन शब्दान्तराधिकरणे भावनाभेदाभिधानाद्धात्वर्थस्य च धातुभेदमन्तरेण भेदानुपपत्तेः समिधो यजतीति प्रथमभाविना वाक्येन विहिता कर्मभावना विपरिवर्त्तमानोपरितनैर्वाक्यैरनूद्यते। न च प्रयोजनभावादननुवादः प्रमाणसिद्धस्याप्रयोजनस्याननुयोज्यत्वात् कर्मभावनाभेदे चानेकापूर्वकल्पनाप्रसङ्गादेकापूर्वावान्तरव्यापारमेकं कर्मेति प्राप्तम्। एवं प्राप्त उच्यते। परस्परानपेक्षाणि हि समिदादिवाक्यानीति सर्वाण्येव प्राथम्यार्हाण्यपि युगपदध्ययनानुपपत्तेः क्रमेणाधीतानीति। न त्वयमेषां प्रयोजकः क्रमः। परस्परापेक्षाणामेकवाक्यत्वे हि प्रयोजकः स्यात् तेन प्राथम्याभावात् प्राप्त

मित्येव नास्तीति कस्य कोऽनुवादः। कथञ्चिद्विपरिवृत्तिमात्र-
स्यौत्सर्गिकाप्रवृत्तप्रवर्त्तनालक्षणविधित्वापवादसामर्थ्याभावात्।
गुणश्रवणे हि गुणविशिष्टकर्मविधाने विधिगौरवभिया गुण-
मात्रविधानलाघवाय कर्मानुवादापेक्षायां विपरिवृत्तेरुप-
कारो यथा दध्ना जुहोतीति दधिविधिपरे वाक्ये विपरिवृत्त्य-
पेक्षायामग्निहोत्रं जुहोतीति विहितस्य होमस्य विपरिवर्त्त-
मानस्यानुवादः। न चात्र गुणाद्भेदः समिदादिपदानां कर्म-
नामधेयानां गुणवचनत्वाभावात्। अगृह्यमाणविशेषतया
च किं वचनविहितं किं कर्मानुवादेन कस्य गुणविधित्वमिति
न विनिगम्यते। न चापूर्वं नाम ज्योतिरादिवद्विधानासम्बन्धं
प्रथममवगतं यतः पूर्वबुद्धिविच्छेदेन विधीयमानं कर्म पूर्व-
स्मात् संज्ञातो व्यवच्छिन्द्यात्। किन्तु प्रथमत एव कर्मसामा-
नाधिकरण्येनावगताः समिदादयस्तद्दशात् कर्मनामधेयतां
प्रतिपद्यमाना आख्यातस्यानुवादत्वेऽनुवादा विधित्वे विधयो
न तु स्वातन्त्र्येण कस्यचिदीशते। तस्मात् स्वरससिद्धाप्राप्त-
कर्मविधिपरत्वात् कर्मण्ययमभ्यासो भावनानुबन्धभूतानि
भिन्दानो भावनां भिनत्ति यथा तथा शाखान्तरविहिता अपि
विद्याः शाखान्तरविहिताभ्यो विद्याभ्योऽभ्यासो भेत्स्यतीति।
अशक्तेश्च। नह्येकः पुरुषः सर्ववेदान्तप्रत्ययात्मिकामुपासना-
मुपसंहर्त्तुं शक्नोति सर्ववेदान्ताध्ययनासामर्थ्यादनधीतार्थोप-
संहारेऽध्ययनविधानवैयर्थ्यप्रसङ्गात्। प्रतिशाखं भेदे तूपा-
सनानां नायं दोषः। समाप्तिभेदाच्च। केषाञ्चित् शाखिना-
मोङ्कारसार्वात्म्यकथने समाप्तिः। केषाञ्चिदन्यत्र तस्मादप्यु-
पासनाभेदः। अन्यार्थदर्शनादपि भेदः। तथाहि। नैतदचो-
र्णव्रतोऽधीत इति अचीर्णव्रतस्याध्ययनाभावदर्शनादुपासना-
भावः। क्वचिदचीर्णव्रतस्याध्ययनदर्शनादुपासनावगम्यते।

तस्मादुपासनाभेद इति। अत्र सिद्धान्तमाह। सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्। तद्व्याचष्टे। सर्ववेदान्तप्रत्ययानि सर्ववेदान्तप्रमणानि विज्ञानानि तस्मिंस्तस्मिन् वेदान्ते तानि तान्येव भवितुमर्हन्ति। यान्येकस्मिन् वेदान्ते तान्येव वेदान्तान्तरेष्वपीत्यर्थः। चोदनाद्यविशेषात् आदिशब्देन संयोगरूपाख्याः संगृह्यन्ते। अत्र च चोद्यत इति चोदना पुरुषप्रयत्नः। स हि पुरुषस्य व्यापारः। तत्र खल्वयं होमादिधात्वर्थावच्छिन्ने प्रवर्त्तते। तस्य देवतोद्देशेन त्यागस्यासेचनादिकस्यावच्छेद्यः पुरुषप्रयत्नः स एव शाखान्तरे यथैवमिहापि प्राणज्यैष्ठत्वश्रैष्ठत्ववेदनविषयः पुरुषप्रयत्नः स एव शाखान्तरेष्वपीति। एवं फलसंयोगोऽपि ज्यैष्ठश्रेष्ठभवनलक्षणः स एव। रूपमपि तदेव। यथा यागस्य यदेकस्यां शाखायां द्रव्यदेवतारूपं तदेव शाखान्तरेष्वपीति। एवं वेदनस्यापि यदेकत्र प्राणज्यैष्ठत्वश्रैष्ठत्वरूपं विषयस्तच्छाखान्तरेष्वपीति। "कञ्चिद्विशेषम्" इति। युक्तं यदग्नीषोमीयस्योत्पन्नस्य पश्चादेकादशकपालत्वादिसम्बन्धेऽप्यभेद इति। यथोत्पन्नस्य तस्य सर्वत्र प्रत्यभिज्ञायमानत्वादिह त्वग्निपूत्पत्तिगत एव गुणभेद इति कथं वैश्वदेवीवन्न भेदक इति विशेषस्तमिमं विशेषमभिप्रेत्याशङ्कते सूत्रकारः। "भेदान्नेति चेत्" इति। परिहारः सूत्रावयवः। "न एकस्यामपीति"। पञ्चैव साम्पादिका अग्नयो वाजसनेयिनामपि छान्दोग्यानामिव विधीयन्ते। षष्ठस्त्वग्निः सम्पद्व्यतिरेकायानूद्यते न तु विधीयते वैश्वदेव्यां तूत्पत्तौ गुणो विधीयत इति भवतु भेदः। अथवा छान्दोग्यानामपि षष्ठोऽग्निः पठ्यत एव। अथ वा भवतु वाजसनेयिनां षष्ठाग्निविधानं मा च भूच्छान्दोग्यानां तथापि पञ्चत्वसंख्याया अविधानान्नोत्पत्तिशिष्टत्वं संख्यायाः किन्तूत्पन्नेष्वग्निषु

प्रचयशिष्टा संख्याऽनूद्यते साम्यादिकानग्नीनवच्छेत्तुं तेन येषामुत्पत्तिस्तेषां प्रत्यभिज्ञानात् अप्रत्यभिज्ञायमानायाश्च संख्याया अनुवाद्यत्वेनानुत्पत्तेर्विधीयमानस्य चाधिकस्य षोडशिग्रहणवद्विकल्पसम्भवान्न शाखान्तरे ज्ञानभेदः। उत्पत्तिशिष्टत्वेऽसिद्धे प्राणसंवादादयोऽपि भवन्ति प्रत्यभिज्ञानादभिन्नास्तासु तासु शाखास्विति ॥

स्वाध्यायस्य तथात्वे नहि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

यैराथर्वणिकग्रन्थोपाया विद्या वेदितव्या तेषामेव शिरोव्रतपूर्वाध्ययनप्राप्तग्रन्थबोधिता फलं प्रच्छयति नान्यथा। अन्येषां तु छान्दोग्यादीनां सैव विद्या नाचीर्णशिरोव्रतानां फलदेत्याथर्वणग्रन्थाध्ययनसम्बन्धादवगम्यते । तत्सम्बन्धश्च वेदव्रतेनेति नैतदचीर्णव्रतोऽधीत इति समाम्नानादवगम्यते। तेषामेवैतां ब्रह्मविद्यां वदेतेति विद्यासंयोगेऽप्येतामिति प्रकृतपरामर्शिना सर्वनाम्नाऽध्ययनसम्बन्धाविरोधायाथर्वविहितैव विद्योच्यत इति। सर्वा होमाः सप्त सौर्यादयः शतौदनान्ता आथर्वणिकानां त एकस्मिन्नेवाथर्वणिकेऽग्नौ क्रियन्ते न त्रेतायां विद्यैकत्वम् ॥

दर्शयति च ॥ ४ ॥

भूयोभूयो विद्यैकत्वस्य वेददर्शनात्। यत्रापि सगुणब्रह्मविद्यानां न साक्षाद्वेद एकत्वमाह तासामपि तत्रायपठितानां तद्विधानां प्रायदर्शनादेकत्वमेव तथाह्यग्रप्राये लिखितं दृष्ट्वा भवेदयमग्र इति बुद्धिरिति। यच्च काठकादिसमाख्ययोपासनाभेद इति। तदयुक्तम्। एता हि पौरुषेय्यः समाख्याः काठकादिप्रवचनयोगात्तासां शाखानां न

तूपासनानाम्। नह्येताः कठादिभिः प्रोक्ताः। न च कठाद्यनुष्ठानमासामितरानुष्ठानेभ्यो विशेष्यते। न च कठप्रोक्ततानिमित्तमात्रेण ग्रन्थे प्रवृत्तौ तद्योगाच्च कथञ्चिल्लक्षणयोपासनासु प्रवृत्तौ सम्भवन्त्यामुपासनाभिधानमप्यासां शक्यं कल्पयितुम्। न च तद्भेदाभेदौ ज्ञानभेदाभेदप्रयोजकौ मा भूद्यथास्वमासामभेदाज्ज्ञानानामेकशाखागतानामैक्यम्। कठादिपुरुषप्रवचननिमित्ताश्चैताः समाख्याः कठादिभ्यः प्राक् नासन्निति तन्निबन्धनो ज्ञानभेदो नासीदिदानीं चास्तीति दुर्घटमापद्येत। तस्मान्न समाख्यातो भेदः। अभ्यासोऽपि नात्र भेदको युक्तं यदेकशाखागतो यजत्यभ्यासः समिदादीनां भेदक इति तत्र हि विधित्वमौत्सर्गिकमज्ञातज्ञापनमप्रवृत्तप्रवर्त्तनञ्च कुप्येयाताम्। शाखान्तरे त्वध्येतृपुरुषभेदादेकत्वेऽपि नौत्सर्गिकविधित्वव्याकोप इति। अशक्तिरपि न भेदहेतुः स्वाध्यायोऽध्येतव्य इति स्वशाखायामध्ययननियमः। ततश्च शाखान्तरीयानर्थानन्येभ्यस्तद्विद्भ्योऽधिगम्योपसंहरिष्यति। समाप्तिश्चैकस्मिन्नपि तत्सम्बन्धिनि समाप्ते तस्य व्यपदिश्यते। यथाऽऽध्वर्य्यवे कर्मणि ज्योतिष्टोमस्य समाप्तिं व्यपदिशन्ति ज्योतिष्टोमः समाप्त इति। तस्मात्समाप्तिभेदोऽपि न साधनमुपासनाभेदस्य। तदेवमसति बाधके चोदनाद्यविशेषात्सर्ववेदान्तप्रत्ययानि कर्माणि तानि तान्येवेति सिद्धम्।

कञ्चिद्विशेषमाशङ्क्य पूर्वतन्त्रप्रसाधितम्।
वक्ष्यमाणार्थसिद्ध्यर्थमर्थमाह स्म सूत्रकृत्॥
चिन्ताप्रयोजनप्रदर्शनार्थं सूत्रम्।

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च॥ ५॥

स्वेदमाशङ्कते। भवतु सर्वशाखाप्रत्ययमेकं विज्ञानं

तथापि शाखान्तरोक्तानां तदङ्गान्तराणां न शाखान्तरोक्ते तस्मिन्नुपसंहारो भवितुमर्हति। तस्यैकस्य कर्मणो यावन्मात्रमङ्गजातमेकस्यां शाखायां विहितं तावन्मात्रेणैवोपकारसिद्धेरधिकारानपेक्षणात् अपेक्षणे चाधिकमपि तत्र विधीयेत न च विहितं तस्माद्यथा नैमित्तिकं कर्म सकलाङ्गवद्विहितमपि अशक्तौ यावच्छक्यमङ्गमनुष्ठातुं तावन्मात्रजन्येनोपकारेणोपकृतं भवत्येवमिहाप्यङ्गान्तराविधानादेव भविष्यतीति। एवं प्राप्ते उच्यते। सर्वत्रैकत्वे कर्मणः स्थिते गृहमेधीयन्यायेन नोपकारावच्छेदो युज्यते। नहि तदेव कर्म सत्तदङ्गमपेक्षते नापेक्षते चेति युज्यते नैमित्तिके तु निमित्तानुरोधादवश्यकर्त्तव्ये सर्वाङ्गोपसंहारस्य सदातनत्वासम्भवादुपकारावच्छेदः कल्प्यते। प्रकृतोपकारपिण्डे चोदकप्राप्ते आज्यभागविधानात्। गृहमेधीयेऽप्युपकारावच्छेदः स्यादिह तु शाखान्तरे कतिपयाङ्गविधानं तानि विधत्ते नेतराणि परिसञ्चष्टे। न च तदुपकारपिण्डे चोदकप्राप्ते आज्यभागवत्तन्मात्रविधानम्। तस्मात्तत्त्वेन कर्मणां सर्वाङ्गसङ्गम औत्सर्गिकोऽसति बलवति बाधके नापवदितुं युक्त इति॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥ ६॥

द्वया द्विप्रकाराः प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुराः शास्त्रजन्यया सात्त्विक्या बुद्ध्या सम्पन्ना देवास्ते हि दीव्यन्त इति देवाः शास्त्रयुक्त्यपरिकल्पितमतयः। तामसवृत्तिप्रधाना असुरा असुभिः प्राणैरनिन्द्रियैरगृहीतैस्तेषु तेषु विषयेषु रमन्त इत्यसुरा अतएव ते ज्यायांसो यतोऽमी तत्त्वज्ञानवन्तः कानीनसास्तु देवाः।

अज्ञानपूर्वकत्वात्तत्त्वज्ञानस्य। प्राणस्य प्रजापतेः सात्त्विकवृत्त्युद्भवस्तामसवृत्त्यभिभवः कदाचित्। कदाचित्तामसवृत्त्युद्भवोऽभिभवश्च सात्त्विक्या वृत्तेः सेयं स्पर्द्धा। ते ह देवा ऊचुः। हन्तासुरान् यज्ञ उद्गीथेनात्ययाम असुरान् तयामास्मिन्नाभिचारिके यज्ञे उद्गीथलक्षणसामभक्त्युपलक्षितेनौद्गात्रेण कर्मणेति। ते ह वाचमूचुरित्यादिना सन्दर्भेण वाक्प्राणचक्षुःश्रोत्रमनसामासुरपाप्मविद्धतया निन्दित्वा अथ हेममासन्यमास्ये भवमासन्यं मुखान्तर्बिलस्थं मुख्यं प्राणं प्राणाभिमानवतीं देवतामूचुस्त्वन्न उद्गायेति। तथेत्यभ्युपगम्य तेभ्य एव प्राण उदगायत् ते सुरा विदुरनेन प्राणेनोद्गात्रा नोऽस्मान् देवा अत्येष्यन्तीति। तमभिद्रुत्य पाप्मनाऽविध्यन्नसुराः। यथाश्मानमृत्वा प्राप्य मृद्धा लोष्टो वा विध्वंसत एवं विध्वंसमाना विष्वञ्चोऽसुरा विनेशुः। तदेतत् संक्षिप्याह। "वाजसनेयके" इति। तथा छान्दोग्येऽप्येतदुक्तमित्याह। "तथा छान्दोग्येऽपि" इति। विषयं दर्शयित्वा विमृशति "तत्र संशयः" इति पूर्वपक्षं गृह्णाति "विद्यैकत्वमिति" पूर्वपक्षमाक्षिपति "ननु न युक्तमिति" एकत्रोद्गातृत्वेनोच्यते प्राणः एकत्र चोद्गानत्वेन क्रियाकर्त्रोश्च स्फुटो भेद इत्यर्थः। समाधत्ते "नैष दोषः" इति। बहुतररूपप्रत्यभिज्ञानादप्रत्यभिज्ञायमानं किञ्चिल्लक्षणया नेतव्यम् न केवलं शाखान्तरे। एकस्यामपि शाखायां दृष्टमेतन्न च तत्र विद्याभेद इत्याह। "वाजसनेयकेऽपि च" इति। बहुतररूपप्रत्यभिज्ञानानुग्रहाय चोमित्यनेनापि उद्गीथावयवेन उद्गीथ एव लक्षणीय इति पूर्वपक्षः॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥७॥

बहुतरप्रत्यभिज्ञानेऽपि उपक्रमभेदात्तदनुरोधेन चोपसंहा-

रवर्णनादेकस्मिन्वाक्ये तस्यैव चोद्गीयस्य पुनःपुनः सङ्कीर्त्तनात् लक्षणायाश्च छान्दोग्ये वाजसनेयके प्रमाणाभावाद् विद्याभेद इति राद्धान्तः। ॐकारस्योपास्यत्वं प्रस्तुत्य रसतमादि गुणोपव्याख्यानमोङ्कारस्य। तथाहि। भूतपृथिव्योषधिपुरुषवाकृक्सान्नां पूर्वस्योत्तरमुत्तरं रसतया सारतयोक्तम्। तेषां सर्वेषां रसतम ओंकार उक्तः छान्दोग्ये। "न च विवक्षितार्थभेदः" इति। एकत्वोद्गीथोद्गातारावुपास्यत्वेन विवक्षिता-वेकत्र तदवयव ओङ्कार इति। तथा त्वभ्युदयवाक्ये" इति। एवं हि श्रूयतेऽवि वा एतं प्रजया पशुभिरर्द्धयति वर्द्धयति अस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं ये चोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति। तत्र सन्देहः किं कालापराधे यागान्तरमिदं चोद्यते उत तेष्वेव कर्मसु प्रकृतेषु कालापराधे निमित्ते देवतापनय इति। एष तावदत्र विषयः। अमावास्यायामेव दर्शकर्मार्थं वेदिक्रियाग्निप्रणयनक्रिया व्रतादिश्च यजमानसंस्कारः। दध्यर्थश्च दोहः। प्रतिपदि च दर्शकर्मप्रवृत्तिरित्यनुष्ठानक्रमस्तात्त्विकः। यस्य तु यजमानस्य कुतश्चिद्भ्रमनिबन्धनाच्चतुर्दश्यामेवामावास्याबुद्धी प्रवृत्तप्रयोगस्य चन्द्रमा अभ्युदीयते। तत्रेदं श्रूयते यस्य हविर्निरुप्तमिति, तेन यजमानेनाभ्युदितेनामावास्यायामेव निमित्ताधिकारं परिसमाप्य पुनस्तदहरेव वेद्युद्धरणादिकर्म कृत्वा प्रतिपदि दर्शः प्रवर्त्तयितव्यः। तत्राभ्युदये किं नैमित्तिकमिदं कर्मान्तरं दर्शाच्चोद्यते उत तस्मिन्नेव दर्शकर्मणि पूर्वदेवतापनयनेन देवतान्तरं विधीयत इति। तत्र हविर्भागमात्रस्य वाच्चरुविधानसामर्थ्याच्च कर्मान्तरम्। यदि हि पूर्वदेवताभ्यो

हवींषि विभजेदिति श्रूयेत ततस्तान्येव हवींषि देवतान्तरेण युज्यमानानि न कर्मान्तरं गमयितुमर्हन्ति, किन्तु प्रकृतमेव कर्म तद्विरुद्धमपनीतपूर्वदेवताकं देवतान्तरयुक्तं स्यात्। अत्र पुनस्त्रेधा तण्डुलान् विभजेदिति हविष एव मध्यमादिक्रमेण विभागश्रवणात्। अनपनीता हविषि पूर्वदेवता इति पूर्वदेवतावरुद्धे हविषि देवतान्तरमलब्धावकाशं श्रूयमाणं कर्मान्तरमेव गोचरयेत्। अपि च प्राप्ते पूर्वस्मिन् कर्मणि दध्नस्तण्डुलानां पयसस्तण्डुलानां चेन्द्रादिदेवतासम्बन्धश्च विधातव्यः। चरुत्वं चात्र विहितं नास्तीति तदपि विधातव्यम्। तथाप्राप्ते कर्मणि अनेकगुणविधानात् वाक्यं भिद्येत। कर्मान्तरं त्वपूर्वं शक्यमेकेनैव प्रयत्नेनानेकगुणविशिष्टं विधातुमिति निमित्ते कर्मान्तरमेव विधीयते। दर्शस्तु लुप्यते कालापराधादिति प्राप्त उच्यते, न कर्मान्तरम्। पूर्वदेवतातो हविषो विभागपूर्वं निमित्ते देवतान्तरविधानात्। चरुत्वस्य चार्थप्राप्तेः। भवेदेतदेवं यदा त्रेधा तण्डुलान् विभजेदिति तण्डुलानां त्रेधा विभागविधानपरमेतद्वाक्यं स्यादपि तु वाक्यान्तरप्राप्तन्तण्डुलानां त्रेधात्वमनूद्य विभजेदित्येतावद्विधत्ते तत्र वाक्यान्तरालोचनया पूर्वदेवताभ्य इति गम्यते। तण्डुलानिति त्वविवक्षितं हविरुभयत्ववत्तथा च ये मध्यमा इत्यादीनि वाक्यान्यपनीते पूर्ववत् देवतासम्बन्धे हविषस्तस्मिन्नेव कर्मणि अप्रत्यूहं देवतान्तरसम्बन्धं विधातुं शक्नुवन्ति। तथाच द्रव्यमुखेन प्रकृतमुखप्रत्यभिज्ञानात् देवतान्तरसम्बन्धेऽपि न कर्मान्तरकल्पना भवितुमर्हति। ततश्च समाप्तेऽपि नैमित्तिकाधिकारे नित्याधिकारसिद्धयर्थं तान्येव पुनः कर्माण्यनुष्ठेयानि। न च दध्नि चरुमिति चरुसम्पत्त्यर्थयोर्विधानं तयोरप्यर्थप्राप्तत्वात्। प्रकृते हि कर्मणि तण्डुलपेषण-

प्रथनं पुरोडाशपाकादि दधिपयसी च प्राप्तानि तत्राभ्युदयनिमित्ते दधियुक्तानां पयोयुक्तानाञ्च तण्डुलानां विभजेदिति वाक्येन पूर्वदेवतापनयं कृत्वा ये मध्यमा इत्यादिभिर्वाक्यैर्देवतान्तरसम्बन्धः कृतः। न च प्रभूतदधिपयःसंसक्तैरल्पैस्तण्डुलैः पुरोडाशक्रिया सम्भवति। इति पुरोडाशनिवृत्तौ तदर्थस्य प्रथनस्यापि निवृत्तिरनिवृत्तस्तु पाकोऽपवादभावात्तथा चार्थप्राप्तश्चोद्यते। भवतु वा अनेकवाक्यकल्पनम्। प्रकृताधिकारावगमबलादस्यापि न्याय्यत्वादिति। तस्मात्तदेवेदं कर्म न तु कर्मान्तरमिति सिद्धं, पशुकामवाक्ये त्वपूर्वकर्मविधिरभ्युदयवाक्यसारूप्येऽपि यः पशुकामः स्यात्सोऽमावास्यायामिष्ट्वा वत्सानपाकुर्यात्, ये स्थविष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुम्। ये चोदिष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुमिति। अत्र हि अमावास्यायामिष्ट्वेति समाप्ते यागे पशुकामेष्टिविधानं नात्र पूर्वस्य कर्मणोऽनुवृत्तेर्यागान्तरविधिरिति युक्तम्। परोवरीयस्त्वादिवत्, यथोद्गीथोपासनासाम्येऽपि आदित्यगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनातः परोवरीयस्त्वगुणविशिष्टोद्गीथोपासना भिन्ना तद्वदिदमपीति। परस्मात् परश्च वराच्च वरीयानिति परोवरीयानुद्गीथः परमात्मरूपः सम्पन्नः। अत एव अनन्तः परमात्मदृष्टिमुद्गीथे भावयितुमाकाशो ह्येवैभ्यो भूतेभ्यो ज्यायानित्याकाशशब्देन परमात्मानं निर्दिशति॥

सञ्ज्ञातश्चेत्तदुक्तमस्ति तु तदपि॥ ८॥

स्फुटतरे भेदावगमे सञ्ज्ञैकत्वं नाभेदसाधनमतिप्रसङ्गापातात्। अपिच श्रुत्यक्षरालोचनयाभेदप्रत्ययोऽन्तरङ्गस्तान-

पेक्षत्व। संज्ञैकत्वन्तु श्रुतिबाह्यतया वहिरङ्गत्व पौरुषेयतया सापेक्षत्व। तस्माद् दुर्बलं नाभेदसाधनायालमिति॥

व्याप्तेश्च समञ्जसम्॥ ९॥

"अध्यासो नाम" इति। गौणी बुद्धिरध्यासः। यथा माणवकेऽनिवृत्तायामेव माणवकबुद्धिव्यपदेशवृत्तौ सिंहबुद्धिव्यपदेशवृत्तिः सिंहो माणवक इति। एवं प्रतिमायां वासुदेवबुद्धिनाम्नि च ब्रह्मबुद्धिस्तथोङ्कार उद्गीथबुद्धिव्यपदेशाविति। अपवादैकत्वं विशेषणानि चोक्तानि। एकार्थेऽपि च शब्दद्वयप्रयोगो दृश्यते। यथा वैश्वदेव्यामिक्षा विन्दं स्नानमानव्याख्यायाञ्च पर्यायाणामपि सहप्रयोगो यथा सिन्धुरः करी पिकः कोकिल इति। विश्वस्यानध्यवसायलक्षणं पक्ष गृह्णाति। "तत्रान्यतमः" इति। सिद्धान्तमाह। "इदमुच्यते व्याप्तेश्च"। प्रत्यनुवाकम्प्रत्यृचमुपक्रमे च समाप्तौ चोंकारः सर्ववेदव्यापीति किन्तोऽयमोंकारस्तत्तदाप्त्यादिगुणविशिष्टस्तस्मै तस्मै कामावाप्त्यादिफलायोपास्यत्वेनाधिक्रियत इत्यपेक्षायामुद्गीथपदे नेति विशिष्यते। उद्गीथपदेनोंकाराद्यवयवघटितसामभक्तिमिदाभिधायिना समुदायस्यावयवभावानुपपत्तेस्तत्सम्बन्ध्यवयव ओंकारो लक्ष्यते, न पुनरोंकारेणावयविन उद्गीथस्य लक्षणा। ओंकारस्यैवोपरिष्टात्तु तत्तद्गुणविशिष्टस्य तत्तत्फलविशिष्टस्य चोपव्याख्यास्यमानत्वात्। दृष्टश्च समुदायशब्दोऽवयवे लक्षणया यथा ग्रामो दग्धः पटो दग्ध इति तदेकदेशदाहे अध्यासे तु लक्षणा फलकल्पना च। तथा ह्याप्त्यादि गुणकत्वतोपासनादिदमुद्गीथतोपासनम्प्रत्यस्यान्यत्रचाव्राप्त्यादि उपासनेष्विव फलं श्रूयते। तस्मात् कल्पनीयम्। उद्गीथसम्बन्धिप्रणवोपासनाधिकारपरे वाक्ये

परार्थे नायं दोषः। अपि च गौण्या वृत्तेर्लक्षणावृत्तिर्बलीयसी लाघवात्। लक्षणया हि लक्षणीयपरत्वं पदस्य तस्यैव वाक्यार्थान्तरभावात्। यथा गङ्गायां घोष इति लक्ष्यमाणस्य तीरस्य वाक्यार्थेऽन्तर्भावोऽधिकरणतया। गौर्वाहीक इत्यत्र तु गोसम्बन्धितिष्ठन्मूत्रपुरीषादिलक्षणया न तत्परत्वं गोशब्दस्य। अपितु तल्लक्षाध्यवसिततद्गुणयुक्तवाहीकपरत्वमिति गौण्या वृत्तेर्दुर्बलत्वं तदिदमुक्तं "लक्षणायामपि तु" इति गौण्यपिवृत्तिर्लक्षणावयवत्वाल्लक्षणोक्ता। यद्यपि वैश्वदेवीपदमामिक्षायाम्प्रवर्त्तते तथाप्यर्थभेदः स्फुटतरः। आमिक्षापदं हि रूपेणामिक्षायाम्प्रवर्त्तते। वैश्वदेवीपदन्तु तस्यामेव विश्वदेवविशिष्टायाम्। एवं हि विज्ञानानन्दयोरपि स्फुटतरः प्रवृत्तिनिमित्तभेदः सत्यपि ब्रह्मण्येकार्थ्ये। न च व्याख्यानमुभयोरपि प्रसिद्धार्थत्वाद्भिन्नार्थत्वाच्च। शेषमतिरोहितार्थम्॥

सर्वाभेदादन्यत्रेमे॥ १०॥

एवं शब्दस्य सन्निहितप्रकारभेदपरामर्शार्थत्वाल्लाक्षाच्छब्दोपस्थापितस्य च सन्निधानात् शाखान्तरगतस्य चानुक्रमतया सन्निधानाभावान्न कौषीतकिप्राणसंवादवाक्ये प्राणस्य वसिष्ठत्वादिभिर्गुणैरुपास्यत्वमपि तु ज्येष्ठश्रेष्ठत्वमात्रेणेति पूर्वः पक्षः। सिद्धान्तस्तु सत्यं सन्निहितं परामृशति एवङ्कारो न तु शब्दोपात्तमात्रं सन्निहितम्। किन्तु यच्छब्दाभिहितार्थनान्तरीकतया प्राप्तं तदपि हि बुद्धौ सन्निहितं सन्निहिततमेव। यथा यस्य पर्णमयी जुहूर्भवति इत्यव्यभिचारितक्रतुसमन्वया जुह्वोपस्थापितः क्रतुः। तस्मादुपास्यफलप्रत्यभिज्ञानात्तदव्यभिचारिणः प्रकारभेदस्येहानुक्तस्यापि बुद्धौ सन्निधा-

नाव्यक्तपरामर्शिनैवंकारेण परामर्शो युक्त इति सिद्धं कौषीतकिब्राह्मणगतेन तावदेवंकारेण शक्यते परामृष्टुम्। तथाप्यभ्युपेत्यापि ब्रूम इत्याशयवता भाष्यकृतोक्तं "तथापि तस्मिन्नेव विज्ञाने वाजसनेयेऽपि ब्राह्मणगतेनेति श्रुतहानिः" इति। केवलस्य श्रुतस्य हानिरितरसहितस्य चाश्रुतस्य कल्पना न चेत्यर्थः। अतिरोहितमन्यत्।

आनन्दादयः प्रधानस्य ॥ ११ ॥

गुणवदुपासनाविधानस्य वास्तवगुणव्याख्यानाद्विवेकार्थमिदमधिकरणम्। यथैकस्य ब्रह्मणः सम्पद्वामत्वादयः सत्यकामादयश्च गुणा न सङ्कीर्य्येरन्। एवमानन्दविज्ञानत्वादयो विभुत्वनित्यत्वादिभिर्गुणैः प्रदेशान्तरोक्तैर्न सङ्कीर्य्येरन्। तत्सङ्करेर्वा सम्पद्वामत्वादयोऽपि सत्यकामादिभिः सङ्कीर्य्येरन्। नहि ब्रह्मणो धर्मिणः सत्वे कश्चिद्विशेष इति पूर्वः पक्षः। राद्धान्तस्तु वास्तवविधेययोर्वस्तुधर्मतया चानुष्ठेयतया चाव्यवस्थाव्यवस्थे व्यवतिष्ठेते। वस्तुधर्मो हि यावद्वस्तु व्यवतिष्ठते। नासावेकत्रोक्तोऽन्यत्रानुक्तो नास्तीति शक्यं वक्तुम्। विधेयस्तु पुरुषप्रयत्नतन्त्रः पुरुषप्रयत्नश्च यत्र यावद्गुणविशिष्टे ब्राह्मणि चोदितः स तावत्येवावतिष्ठते नाविहितमपि गुणं गोचरीकर्तुमर्हति। तस्य विधितन्त्रत्वाद्विधेयव्यवस्थानात्। तस्मादानन्दविज्ञानादयो ब्रह्मतत्त्वात्मतयोक्ता यत्र यत्र ब्रह्म श्रूयते तत्र तत्रानुक्ता अपि लभ्यन्ते। सम्पद्वामादयश्चोपासनाप्रयत्नविधिविषया यथाविध्यवतिष्ठन्ते न तु यथावस्थितिं सिद्धम्। प्रियशिरस्त्वादीनां तूपास्यत्वमारोप्य न्यायो दर्शितः। तस्य तु सम्पद्वामादिरुक्तः। मोदन-

मात्रं मोदः प्रमोदः प्रकृष्टो मोदः ताविमौ परस्परापेक्षावुपचयापचयौ ॥

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

इन्द्रियेभ्यः परा ह्यर्था इति किमत्र सर्वेषामेवार्थादीनां परत्वं प्रतिपिपादयिषितम्, आहो पुरुषस्यैव तत्प्रतिपादनार्थं चेतरेषां परत्वप्रतिपादनम्। तत्र प्रत्येकमर्थादिपरत्वप्रतिपादनश्रुतेः श्रूयमाणतत्तत्परत्वे च सम्भवति न तत्तदतिक्रमे सर्वेषामेकपरत्वाध्यवसानं न्याय्यम्। न च प्रयोजनाभावादसम्भवः। सर्वेषामेव प्रत्येकं परत्वाभिधानस्याध्यानप्रयोजनत्वात्। तत्तदाध्यानानां च प्रयोजनवत्त्वस्मृतेः। तथाहि स्मृतिः ॥

दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः॥
बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः॥
पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते। इति।

प्रामाणिकस्य वाक्यभेदस्याभ्युपेयत्वात् प्रत्येकं तेषामर्थादीनां परत्वपराण्येतानि वाक्यानीति प्राप्ते, उच्यते। इन्द्रियेभ्यः परा ह्यर्था इत्येष तावत्संदर्भो वस्तुतत्त्वप्रतिपादनपरः प्रतीयते नाध्यानविधिपरः। तदश्रुतेः। तदत्र यत्प्रत्ययस्य साक्षात्प्रयोजनवत्त्वं दृश्यते तत्प्रत्ययपरत्वं सर्वेषाम्। दृष्टं च विष्णोः परमपदज्ञानस्य निखिलानर्थसंसारकारणाविद्योपशमः। तत्त्वज्ञानोदयस्य विपर्य्यासोपशमलक्षणत्वेन तत्र तत्र दर्शनात्। अर्थादिपरत्वप्रत्ययस्य तु न दृष्टमस्ति प्रयोजनम्। न च दृष्टे सम्भवति अदृष्टकल्पना न्याय्या। न च परमपुरुषा-

र्थहेतुपरत्वे सम्भवति अवान्तरपुरुषार्थतोचिता। तस्माद् दृष्टप्रयोजनवत्त्वात् पुरुषपरत्वप्रतिपादनार्थोऽयं सन्दर्भ इति गम्यते। किञ्चादरादप्ययमेवास्यार्थ इत्याह। "अपि च परप्रतिषेधेन" इति। नन्वत्राध्यानविधिर्नास्ति तत्कथमुच्यते आध्यानायेत्यत आह। "आध्यानाय" इति।

आत्मशब्दाच्च ॥ १५ ॥

अनधिगतार्थप्रतिपादनस्वभावत्वात् प्रमाणानां विशेषतश्च आगमस्य पुरुषशब्दवाच्यस्य चात्मनः स्वयं श्रुत्यैव दुरधिगमत्वावधारणात्। वस्तुतश्च दुरधिगमत्वात्। अर्थादीनां च सुगमत्वात् तत्परत्वमेवार्थादिपरत्वाभिधानस्येत्यर्थः। श्रुतेराशयातिशय इवाशयातिशयः। तत्तात्पर्य्यतेति यावत्। किञ्च श्रुत्यन्तरापेक्षिताभिधानादप्येवमेवार्थादिपरत्वे तु स्वरूपेण विवक्षितेनापेक्षितं श्रुतिराचष्ट इत्याह। "अपि च सोऽध्वनः पारमाप्नोति" इति॥

आत्मगृहीतिरितरवदुत्तरात्॥ १६ ॥

श्रुतिस्मृत्योर्हि लोकसृष्टिः परमेश्वराधिष्ठिता। परमेश्वरहिरण्यगर्भकर्तृकोपलब्धा सेयमिह महाभूतसर्गमनभिधाय प्राथमिकी लोकसृष्टिरुपलभ्यमानावान्तरेश्वरकार्य्या प्रागुत्पत्तेरात्मैकत्वावधारणं चावान्तरेश्वरसम्बन्धितया गमयति। पारमेश्वरसर्गस्य महाभूताकाशादित्वादस्य च तद्वैपरीत्यात्। अस्ति हि तस्यैवैकस्य विकारान्तरापेक्षयाऽऽत्वमस्ति चेक्षणम्। अपि चैतस्मिन्नैतरेयके पूर्वस्मिन् प्रकरणे प्रजापतिकर्तृकैव लोकसृष्टिरुक्ता। तदनुसारादप्येतदेव विज्ञायते अपि च ताभ्यो गामानयेदित्यादयश्च व्यवहाराः श्रुत्योक्ता विशेषवत्त्वपरमात्मसु प्रसिद्धाः। ततोऽप्यवान्तरेश्वर

एव विज्ञायते। आत्मशब्दप्रयोगश्चात्रापि दृष्टस्तस्मादपरात्माभिलापोऽयमिति प्राप्त उच्यते। परमात्मनो गृहीतिरिह यथा इतरेषु सृष्टिश्रवणेषु एतस्मादात्मन आकाशः सम्भूत इत्यादिषु। तस्मादुत्तरात्त ऐक्षतेतीक्षणपूर्वकस्रष्टृत्वश्रवणादात्मेत्यवधारणाच्च। एतदभिसंहितम्। मुख्यं तावत् सर्गात् प्राक् केवलत्वमात्मपदत्वं स्रष्टृत्वं च परमेश्वरस्यात्र भवतः। तदसत्यामनुपपत्तौ नान्यत्र व्याख्यातुमुचितम्। न च महाभूतसृष्ट्यनभिधानेन लोकसृष्ट्यभिधानमनुपपत्तिबीजम्। आकाशपूर्विकायां वस्तुतो ब्रह्मणः सृष्टौ यथा क्वचित्तेजःपूर्वकसृष्ट्यभिधानं न विरुध्यते एतस्मादात्मन आकाशः सम्भूत इति दर्शनात्। आकाशं वायुं सृष्ट्वेति हि तत्र पूरयितव्यमेवमिहापि महाभूतानि सृष्ट्वेति कल्पनीयम्। सर्वशाखाप्रत्ययत्वेन ज्ञानस्य श्रुतिसिद्धार्थमश्रुतोपलब्धौ यत्नवता भवितव्यं न पुनः श्रुते महाभूतादित्वे सर्गस्य शैथिल्यमादरणीयम्। अपि च स्वाध्यायविध्यधीनग्रहणो वेदराशिरध्ययनविध्यापादितप्रयोजनवदर्थाभिधानो यथा यथा प्रयोजनाधिक्यमाप्नोति तथा तथानुमन्यततराम्। यथा चास्य ब्रह्मगोचरत्वे परमपुरुषार्थौपयिकत्वं नैवमन्यगोचरत्वे तदिदमुक्तम्। "योऽप्ययं व्यापारविशेषानुगमः" इति। न लोकसर्गोऽपि हिरण्यगर्भव्यापारोऽपि तु तदनुप्रविष्टस्य परमात्मन इत्यत्रैवोक्तम्। तस्मादात्मैवाग्र इत्युपक्रमात्तद्व्यापारेण चेक्षणेन मध्ये परामर्शादुपरिष्टाच्च भेदजातं महाभूतैः सहानुक्रम्य ब्रह्मप्रतिष्ठत्वेन ब्रह्मण उपसंहाराद्ब्रह्माभिलापत्वमेवास्येति निश्चीयते। यत्र तु पुरुषविद्यादिश्रवणं तस्य भवेत्त्वन्यपरत्वं गत्यन्तराभावादिति सर्वमवदातम्। अपरः कल्पः। सदुपक्रमस्य सन्दर्भस्यात्मोपक्रमस्य च किमैकार्थ्य-

माहोस्विदर्थभेदः। तत्र सच्छब्दस्याविशेषेणात्मनि चात्मनि च प्रवृत्तेनात्मार्थत्वं किन्तु समस्तवस्त्वनुगतसत्तासामान्यार्थत्वं तथा चोपक्रमभेदाद्भिन्नार्थत्वम्। स आत्मा तत्त्वमसीति चोपसंहार उपक्रमानुरोधेन सम्पत्त्यर्थतया व्याख्येयः। तद्धि सत्तासामान्यं परमात्मतया सम्पादनीयम्। तद्विज्ञानेन च सर्वविज्ञानं महासामान्यस्य सत्तायाः समस्तवस्तुविस्तारव्यापित्वादित्येवं प्राप्त उच्यते। आत्मेत्येवोतिर्वाजसनेयिनामिव छान्दोग्यानामप्युत्तरात्स आत्मा तत्त्वमसीति तादात्म्योपदेशात्। अस्तु तावदात्मव्यतिरिक्तस्य प्रपञ्चस्य सदसत्त्वाभ्यामनिर्वाच्यतया न सत्त्वं सत्त्वं त्वात्मधातोरिव तत्त्वेन निर्वाच्यत्वात्तस्मादात्मैव सदिति। अभ्युपेत्याह सच्छब्दस्य सत्तासामान्याभिधायित्वात् प्रतिव्यक्ति च तस्य प्रवृत्तेरात्मनि चान्यत्र च सच्छब्दप्रवृत्तेः संशये सत्युपसंहारानुरोधेन सदेवेत्यात्मन्येवावस्थाप्यते। निर्णीतार्थोपक्रमानुरोधेन ह्युपसंहारवर्णना न पुनः सन्दिग्धार्थेनोपक्रमेणोपसंहारो वर्णनीयः। अपि च सम्पत्तौ फलं कल्पनीयम्। न च सामान्यमात्रे ज्ञाते विशेषज्ञानसम्भवः। न खल्वारादृचे ज्ञाते शिंशपादयस्तद्विशेषा ज्ञाता भवन्ति। तदेवमवधारणादि सर्वमनात्मार्थत्वे स्यादनुपपन्नमिति छान्दोग्यस्यात्मार्थत्वमेवेति सिद्धम्। अत्र च पूर्वस्मिन् पूर्वपक्षे हिरण्यगर्भोपासना सिद्धान्ते तु ब्रह्मभावनेति॥

कार्य्याख्यानादपूर्वम्॥ १८॥

विषयमाह "छन्दोगा वाजसनेयिनश्च" इति। अननं प्राणनं अनः प्राणः तं प्राणमनग्नं कुर्वन्तः अनग्नताचिन्तनमिति मन्यन्त इति मननं ज्ञानं तद्ध्यानपर्य्यन्तमिति चिन्तन-

मुक्तम्। संशयमाह "तत्किम्" इति। ख़ुरख़माचेणापातत उभयविधानपक्षं गृहीत्वा मध्यमं पक्षमालम्बते पूर्वपक्षी। "अथवाचमनमेव" इति। यद्येवमनग्नतासङ्कीर्त्तनस्य किं प्रयोजनमित्यत आह। "तस्यैव तु स्तुत्यर्थम्" इति। अयमभिसन्धिः। यद्यपि स्मार्त्तं प्रायत्यार्थमाचमनमस्ति तथापि प्राणोपासनप्रकरणे विधानात्तदङ्गत्वेनाप्राप्तमिति विधानमर्थवद्भवति अनृतवदनप्रतिषेध इव स्मार्त्ते ज्योतिष्टोमप्रकरणे समाम्नातो नानृतं वदेदिति प्रतिषेधो ज्योतिष्टोमाङ्गतयार्थवानिति। राद्धान्तमाह "एवं प्राप्ते" इति। चोदयति। "नन्वियं श्रुतिः" इति। परिहरति। "न" इति। तुल्यार्थयोर्मूलमूलिभावो नातुल्यार्थयोरित्यर्थः। अभिप्रायस्थं पूर्वपक्षवीजं निराकरोति। "न चेयं श्रुतिः" इति। क्रत्वर्थपुरुषार्थयोरनृतवदनप्रतिषेधयोर्युक्तमपौनरुक्त्यम्। इह तु स्मार्त्तमाचमनं सकलकर्माङ्गतया विहितं प्राणोपासनाङ्गमपीति व्यापकेन स्मार्त्तेनाचमनविधिना पुनरुक्तत्वादनर्थकम्। न च स्मार्त्तस्यानेन पौनरुक्त्यं तस्य च व्यापकत्वादेतस्य च प्रतिनियतविषयत्वादिति। मध्यमं पक्षमपाकृत्य प्रथमपक्षमपाकरोति। "अत एव नोभयविधानम्"। युक्त्यन्तरमाह। "उभयविधाने च" इति। उपसंहरति। "तस्मात् प्राप्तमेव" इति। "न चायमनग्नतावादः" इति। स्तोतव्याभावे स्तुतिर्नोपपद्यत इत्यर्थः। अपि च मानान्तरप्राप्तेनाप्राप्तं विधेयं श्रूयते। न चानग्नतासङ्कल्पोऽन्यतः प्राप्तो यतः स्तावको भवेत्। न चाचमनमन्यतोऽप्राप्तं येन विधेयं सत् स्तूयेतेत्याह। "स्वयं चानग्नतासङ्कल्पस्य" इति। अपि चैकस्य कर्मण एकार्थतैवेत्युचितं तस्य बलवत्प्रमाणवशादनन्यगतित्वे सत्यनेकार्थता कल्पते। सङ्कल्पे तु कर्मान्तरे विधीयमाने नायं दोष इत्याह। "न

चैवं सत्येकस्याचमनस्य” इति। अपि च दृष्टिचोदनासाहचर्य्याद् दृष्टिचोदनैव न्याय्या न चाचमनचोदनेत्याह। “अपिच यदिदं किञ्च” इति। यथा हि श्वादिमर्य्यादस्यान्नस्याशुमशक्यत्वादन्नदृष्टिश्चोद्यते एवमिहाप्यपां परिधानासम्भवाद् दृष्टिरेव चोद्यत इत्यन्नदृष्टिविधिसाहचर्य्याद्गम्यते। अशब्दत्वञ्च यद्यपि दृष्ट्यभ्यवहारयोस्तुल्यं तथापि दृष्टिः शाब्ददृश्यनान्तरीयकतया साक्षाच्छब्देन क्रियमाणोपलभ्यते। अभ्यवहारस्त्वध्याहरणीयः कथञ्चिद्योग्यतामात्रेणेति विशेषः। किञ्च छान्दोग्यानां वाजसनेयिनां चाचमने प्रायेणाचामन्तीति वर्त्तमानापदेशः। एवं यत्रापि विधिविभक्तिस्तत्रापि जर्तिलयवाग्वा वा जुहुयादितिवद्विधित्वमविवक्षितम्। मन्यन्त इति त्वप्राप्तार्थत्वात्समिधो यजतीत्यादिवद्विधिरेवेत्याह। “अपि चाचमन्ति” इति। शेषमतिरोहितार्थम्॥

समान एवं चाभेदात्॥ १९॥

इहाभ्यासाधिकरणन्यायेन पूर्वः पक्षः। द्वयोर्विद्याविध्योरेकशाखागतयोरगृह्यमाणविशेषतया कस्य को मुख्योऽनुवाद इति विनिश्चयाभावादज्ञातज्ञापनाप्रवृत्तप्रवर्त्तनारूपस्य च विधित्वस्य स्वरससिद्धेरुभयत्रोपासनाभेदः। न च गुणान्तरविधानायैकत्रानुवाद उभयत्रापि गुणान्तरविधानोपलब्धेर्विनिगमनाहेत्वभावात्समानगुणानभिधानप्रसङ्गाच्च। तस्मात्समिधो यजतीत्यादिवदभ्यासादुपासनाभेद इति प्राप्ते, उच्यते। नैककर्म्यमेकत्वेन प्रत्यभिज्ञानात्। न चागृह्यमाणविशेषता यत्र भूयांसो गुणा यस्य कर्मणो विधीयन्ते तत्र तस्य प्रधानस्य विधिरितरत्र तु तदनुवादेन कतिपयगुणविधिः। यथा यत्र छत्रचामरपताकाहास्तिकाश्वीयशातीक-

याष्टीकधानुष्ककापाणिकप्रासिकपदातिप्रचयस्तत्रास्ति राजेति गम्यते न तु कतिपयगजवाजिपदातिभाजि तदमात्ये, तथेहापि। न चैकत्र विहितानां गुणानामितरत्रोक्तिरनर्थिका प्रत्यभिज्ञानदार्ढ्यार्थत्वात्। अस्तु वाऽस्मिन्नित्यानुवादो नह्यनुवादानामवश्यं सर्वत्र प्रयोजनवत्त्वम्। अनुवादमात्रस्यापि तत्र तत्रोपलब्धेः। तस्मात्तदेव बृहदारण्यकेऽप्युपासनं तद्गुणेनोपसंहारादिवदिति सिद्धम् ॥

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

यद्येकस्यामपि शाखायां तत्त्वेन प्रत्यभिज्ञानादुपासनस्य तत्र विहितानां धर्माणां सङ्करः तथा सति सत्यस्यैकस्याभेदान्मण्डलहृदयवर्त्तिन उपनिषदोरपि सङ्करप्रसङ्गात्तस्येति च प्रकृतपरामर्शत्वाद्येदः सत्यस्य च प्रधानस्य प्रकृतत्वात् अधिदैवमित्यस्य विशेषणतयोपसर्जनत्वेनाप्रस्तुतत्वात् प्रस्तुतस्य च सत्यस्याभेदात् पूर्ववद्गुणसङ्कर इति प्राप्त उच्यते।

न वा विशेषात् ॥ २१ ॥

सत्यं यत्र स्वरूपमात्रसम्बन्धो धर्माणां श्रूयते तत्रैवं स्वरूपस्य सर्वत्र प्रत्यभिज्ञायमानत्वात्तन्मात्रसम्बन्धित्वाच्च धर्माणाम्। यत्र तु सविशेषणं प्रधानमवगम्यते तत्र सविशेषणस्यैव तस्य धर्माभिसम्बन्धो न निर्विशेषणस्य नाप्यन्यविशेषणसहितस्य। न हि दण्डिनं पुरुषमानयेत्युक्ते दण्डरहितः कमण्डलुमानानीयते। तस्मादधिदैवं सत्यस्योपनिषदुक्ता न तस्यैवाध्यात्मं भवितुमर्हति। यथा चाचार्य्यस्य गच्छतोऽनुगमनं विहितं न तिष्ठतो भवति तस्मान्नोपनिषदोः सङ्करः किन्तु व्यवस्थितिः। तदिदमुक्तं स्वरूपानपायादिति ॥

दर्शयति च ॥ २२ ॥

अतिदेशादप्येवमेव तत्त्वे हि नातिदेशः स्यादिति ॥

संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

ब्रह्मज्येष्ठा वीर्य्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान।
ब्रह्मभूतानां प्रथमं तु जज्ञे तेनार्हति ब्रह्मणा स्पर्द्धितुं कः॥

ब्रह्म ज्येष्ठं येषां तानि ब्रह्मज्येष्ठा जज्ञे आस यद्यपि तासु तासु शाण्डिल्यादिविद्यास्वायतनभेदपरिग्रहेणाध्यात्मिकायतनत्वं सम्भृत्यादीनां गुणानामाधिदैविकत्वमित्यायतनभेदः प्रतिभाति। तथापि ज्यायान् दिव इत्यादिना सन्दर्भेणाधिदैविकविभूतिप्रत्यभिज्ञानात् षोडशकलाद्यासु च विद्यास्वायतनाश्रवणाद् अन्ततो ब्रह्माश्रयतया साम्येन प्रत्यभिज्ञासम्भवात्। सम्भृत्यादीनां गुणानां शाण्डिल्यादिविद्यासु षोडशकलादिविद्यासु चोपसंहार इति पूर्वः पक्षः। राद्धान्तस्तु। मिथः समानगुणश्रवणं प्रत्यभिज्ञाय यद्विद्या अपूर्वानपि तत्राश्रुतान् गुणानुपसंहारयति न त्विह सम्भृत्यादिगुणकब्रह्मविद्यायां शाण्डिल्यादिविद्यागतगुणश्रवणमस्ति। या तु काचदाधिदैविकी विभूतिः शाण्डिल्यादिविद्यायां श्रूयते, तस्यास्तत्प्रकरणाधीनत्वात्तावन्मात्रं ग्रहीष्यते नैतावन्मात्रेण सम्भृत्यादीननुक्रष्टुमर्हति। तत्रैतत् प्रत्यभिज्ञानाभावादित्युक्तम्। ब्रह्माश्रयत्वेन तु प्रत्यभिज्ञानसमर्थनमतिप्रसक्तम्। भूयसीनामैक्यप्रसङ्गात्। तदिदमुक्तं "सम्भृत्यादयस्तु शाण्डिल्यादिवाक्यगोचराश्च" इति। तस्मात्सम्भृतिश्च द्युव्याप्तिश्च तदिदं सम्भृतिद्युव्याप्त्यपि चातः प्रत्यभिज्ञानाभावान्न शाण्डिल्यादिविद्यासूपसंक्रियत इति सिद्धम्॥

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥

पुरुषयज्ञत्वमुभयत्राप्यविशिष्टम्। न च विदुषो यज्ञ-

स्येति न सामानाधिकरण्यसम्भवः। यज्ञस्यात्मेत्यात्मशब्दस्य स्वरूपवचनत्वात्। यज्ञस्य स्वरूपं यजमानस्तस्य च चेतनत्वाद् विदुष इति सामानाधिकरण्यसम्भवः। तस्मात् पुरुषयज्ञत्वाविशेषान्मरणावभृथत्वादिसामान्याच्चैकविद्याध्यवसाने उभयत्र उभयधर्मोपसंहार इति प्राप्तम्। एवं प्राप्त उच्यते। यादृशं ताण्डिनां पैङ्गिनाञ्च पुरुषयज्ञसम्पादनं तदायुषश्च त्रेधा व्यवस्थितस्य सवनत्रयसम्पादनम्। अशिशिषाद्दीनाञ्च दीक्षादिभावसम्पादनं नैवं तैत्तिरीयाणाम्। तेषां न तावत् पुरुषे यज्ञसम्पत्तिः। नह्यात्मा यजमान इत्यत्रायमात्मशब्दः स्वरूपवचनः नहि यज्ञस्वरूपं यजमानो भवति। कर्तृकर्मणोरभेदाभावात्। चेतनाचेतनयोश्चैक्यानुपपत्तेः यज्ञकर्मणोश्चाचेतनत्वात्। यजमानस्य चेतनत्वात्। आत्मनस्तु चेतनस्य यजमानत्वञ्च विद्वत्त्वञ्चोपपद्यते। तथा चायमर्थः। एवं विदुषः पुरुषस्य यः सम्बन्धी यज्ञः तस्य सम्बन्धितया यजमान आत्मा तथा चात्मनो यजमानत्वञ्च विद्वत्सम्बन्धिता च यज्ञस्य मुख्ये स्यातामितरथात्मशब्दस्य स्वरूपवाचित्वे विदुषो यज्ञस्येति च यजमानो यज्ञस्वरूपमिति च गौणे स्याताम्। न च सत्यां गतौ तद्युक्तम्। तस्मात् पुरुषयज्ञता तैत्तिरीये नास्तीति तया तावन्न साम्यम्। न च पत्नीयजमानवेदविद्यादिसम्पादनं तैत्तिरीयाणामिव ताण्डिनां पैङ्गिनां वा विद्यते सवनसम्पत्तिरप्येषां विलक्षणैव। तस्माद्भूयो वैलक्षण्ये सति न किञ्चिन्मात्रसालक्षण्यादिद्यैकत्वमुचितमतिप्रसङ्गात्। अपि च तस्यैवं विदुष इत्यनुवादश्रुतौ सत्यामनेकार्थविधाने वाक्यभेददोषप्रसक्तेरित्यर्थः। अपि चेयं पैङ्गिनां ताण्डिनां च पुरुषयज्ञविद्या फलान्तरयुक्ता स्वतन्त्रा प्रतीयते। तैत्तिरीयाणां तु एवं विदुष इति अव-

णात् पूर्वोक्तपरामर्शात् तत्फलत्वश्रुतेश्च पारतन्त्र्यम्। न च स्वतन्त्रपरतन्त्रयोरैक्यमुचितमित्याह। "अपि च समन्यासासात्मविद्याम्" इति। उपसंहरति। "तस्मात्" इति॥

वेधाद्यर्थभेदात्॥ २५॥

विचारविषयं दर्शयति। "आथर्वणिकानाम्" इति। आथर्वणिकाद्युपनिषदारम्भे ते ते मन्त्रास्तानि तानि च प्रवर्ग्यादीनि कर्माणि समाम्नातानि। संशयमाह। "किमिम" इति। पूर्वपक्षं गृह्णाति। "उपसंहार एषां विद्यासु" इति। सफला हि सर्वा विद्या आम्नातास्तत्सन्निधौ मन्त्राः कर्माणि च समाम्नातानि फलवत्सन्निधावफलं तदङ्गमिति न्यायाद्विद्याङ्गभावेन विज्ञायन्ते। चोदयति। "नन्वेषाम्" इति। नह्यत्र श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानानि सन्ति विनियोजकानि प्रमाणानि, नहि यथा दर्शपूर्णमासावारभ्य समिदादयः समाम्नातास्तथा काञ्चिद्विद्यामारभ्य मन्त्रा वा कर्माणि वा समाम्नातानि। न चासति सामान्यसम्बन्धे सम्बन्धिसन्निधानमात्रात्तादर्थ्यसम्भवः। न च श्रुतस्वाङ्गपरिपूर्णा विद्या एतानाकाङ्क्षितुमर्हति येन प्रकरणप्रादितसामान्यसम्बन्धानां सन्निधिर्विशेषसम्बन्धाय भवेदित्यर्थः। समाधत्ते। "वाढमनुपलभमाना अपि" इति। मा नाम भूत् फलवतीनां विद्यानां परिपूर्णाङ्गानामाकाङ्क्षा। मन्त्राणां तु स्वाध्यायविद्यापादितपुरुषार्थभावानां कर्मणां च प्रवर्ग्यादीनां स्वविध्यापादितपुरुषार्थभावानां पुरुषाभिलषितमाकाङ्क्षतां सन्निधानादन्यतराकाङ्क्षानिबन्धनो रक्तपटन्यायेन सम्बन्धः। तत्रापि च विद्यानां फलवत्त्वात्तादर्थ्यमफलानां मन्त्राणां कर्मणाञ्च। न च प्रवर्ग्यादीनां पिण्डपितृयज्ञ-

वत् स्वर्गः कल्पनास्पदं फलवत् सन्निधानेन तदवरोहात्। "अनुमास्यामहे सन्निधिसामर्थ्यात्" इति। इदं खलु निवृत्ताकाङ्क्षाया विद्यायाः सन्निधाने श्रुतमनाकाङ्क्ष्या साकाङ्क्षस्यापि सम्बन्धुमसामर्थ्यात्। तस्या अप्याकाङ्क्षामुत्थापयति। उत्थाप्य चैकवाक्यतामुपैति। असमर्थस्य चोपकारकत्वानुपपत्तेः। प्रकरणिनं प्रति उपकारसामर्थ्यमात्मनः कल्पयति। न च सत्यपि सामर्थ्ये तत्र श्रुत्या अविनियुक्तं तदङ्गतामुपगन्तुमर्हतीत्यनया परम्परया सन्निधिः श्रुतिमर्थापत्त्या कल्पयति। आक्षिपति। "ननु नैषां मन्त्राणाम्" इति। प्रयोगसमवेतार्थप्रकाशनेन हि मन्त्राणामुपयोगो वर्णितोऽविशिष्टस्तु वाक्यार्थ इत्यत्र। न च विद्यासम्बद्धं कञ्चनार्थं मन्त्रेषु प्रतीमः। यद्यपि च प्रवर्ग्यो न किञ्चिदारभ्य श्रूयते। तथापि वाक्यसंयोगेन क्रतुसम्बन्धं प्रतिपद्यते। पुरस्तादुपसदां प्रवर्ग्येण प्रचरन्तीति। उपसदां जुह्वदव्यभिचरितक्रतुसम्बन्धत्वात्। यद्यपि ज्योतिष्टोमविकृतावपि सन्त्युपसदः। तथापि तत्रानुमानिक्यो ज्योतिष्टोमे तु प्रत्यक्षविहितास्तेन शीघ्रप्रवृत्तितया ज्योतिष्टोमाङ्गतैव वाक्येनावगम्यते। अपि च प्रकृतौ विहितस्य प्रवर्ग्यस्य चोदकेनोपसद्वत्तद्विकृतावपि प्राप्तिः। प्रकृतौ वा अविकृतत्वादिति न्यायाज्ज्योतिष्टोमे एव विधानमुपसदा सह युक्तं, तदेतदाह। "कथं च प्रवर्ग्यादीनि" इति। सन्निधानादर्थविप्रकर्षेण वाक्यं बलीय इति भावः। समाधत्ते। "नैष दोषः, सामर्थ्यं तावत्" इति। यथा अग्नये त्वा जुष्टं निर्वपामीति मन्त्रे अग्नयेनिर्वपामिपदे परं कर्मसमवेतार्थप्रकाशके शिष्टानां तु पदानां तदेकवाक्य-

तया यथाकथञ्चिद्व्याख्यानमेवमिहाऽपि हृदयपदस्योपासनायां समवेतार्थत्वात्तदनुसारेण तदेकवाक्यतापन्नानि पदान्तराणि गौण्या लक्षणया च वृत्त्या कथञ्चिन्नेयानीति नासमवेतार्थता मन्त्राणाम्। न च मन्त्रविनियोगो नोपासनेषु दृष्टो येनात्यन्तादृष्टं कल्प्यत इत्याह। "दृष्टश्चोपासनेषु" इति। यद्यपि वाक्येन बलीयसा सन्निधिर्दुर्बलो बाध्यते तथापि विरोधे सति। न चेहाऽस्ति विरोधः। वाक्येन विनियुक्तस्यापि ज्योतिष्टोमे प्रवर्ग्यस्य सन्निधिना विद्यायामपि विनियोगसम्भवात्। यथा ब्रह्मवर्चसकामो बृहस्पतिसवेन यजेतेति ब्रह्मवर्चसफलोऽपि बृहस्पतिसवो वाजपेयाङ्गत्वेन चोद्यते। वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति। अत्र हि क्त्वः समानकर्तृकत्वमवगम्यते धातुसम्बन्धे प्रत्ययविधानात्। धात्वर्थान्तरसम्बन्धश्च कथं च समानः कर्त्ता स्यात्। यद्येकः प्रयोगो भवेत्। प्रयोगाविष्टं हि कर्तृत्वम्। तच्च प्रयोगभेदे कथमेकम्। तस्मात्समानकर्तृकत्वादेकप्रयोगत्वं वाजपेयबृहस्पतिसवयोर्धात्वर्थान्तरसम्बन्धाच्च। न च गुणप्रधानभावमन्तरेणैकप्रयोगता सम्बन्धश्च। तत्रापि वाजपेयस्य प्रकरणे समाम्नानाद्वाजपेयः प्रधानम्। अङ्गं बृहस्पतिसवः। न च दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्राङ्गप्रधानभावप्रसङ्गः। नह्येतद्वचनं कस्यचिद्दर्शपूर्णमासस्य सोमस्य वा प्रकरणे समाम्नातम्। तथा च द्वयोः साधिकारतया अश्रूयमाणविशेषतया गुणप्रधानभावं प्रति विनिगमनाभावेनाधिष्ठानमात्रविवक्षया लाक्षणिकं समानकर्तृकत्वमित्यदोषः। यदि तु कस्याञ्चिच्छाखायामारभ्याधीतं दर्शपूर्णमासाभ्यामिष्ट्वेति। तथाप्यनारभ्याधीतस्यैवारभ्याधीते प्रत्यभिज्ञानमिति युक्तम्। तथा सति द्वयोरपि पृथगधिकारतया

प्रतीतं समप्रधानत्वमत्युक्तं भवेदितरथा तु गुणप्रधानभावेन तत्त्यागो भवेत्। तस्मात्कालार्थोऽयं संयोग इति सिद्धम्। सिद्धान्तमुपक्रमते "एवं प्राप्ते" इति। हृदयं प्रविध्येत्ययं मन्त्रः स्वरसतस्तावदाभिचारिककर्मसमवेतं सकलैरेव पदैरर्थमभिदधदुपलभ्यते। तदस्याभिधानसामर्थ्यलक्षणं लिङ्गं वाक्यप्रकरणाभ्यां क्रमाद्बलीयोभ्यामपि बलवत् किमङ्ग पुनः क्रमात्, तस्माल्लिङ्गेन सन्निधिमपोह्याभिचारिककर्मशेषत्वमेवापाद्यते। यद्यपि चोपासनासु हृदयपदमात्रस्य समवेतार्थत्वम्। तथापि तदितरेषां सर्वेषामेव पदानामसमवेतार्थत्वम्। आभिचारिके तु कर्मणि सर्वेषामर्थसमवाय इति किमेकपदसमवेतार्थता करिष्यति। न च सन्निध्युपष्टम्भीतासूपासनासु मन्त्रमवस्थापयतीति युक्तम्। हृदयपदस्याभिचारेऽपि समवेतार्थस्येतरपदैकवाक्यतापन्नस्य वाक्यप्रमाणसहितस्याभिचारिकात्कर्मणः सन्निधिना चालयितुमशक्यत्वादेवं देवसवितः प्रसवयज्ञमित्यादेरपि यज्ञप्रसवलिङ्गस्य यज्ञाङ्गत्वे सिद्धे जघन्यो विद्यासन्निधिः किं करिष्यति। एवमन्येषामपि श्वेताश्व इत्येवमादीनां केषाञ्चिल्लिङ्गेन केषाञ्चिच्छ्रुत्या केषाञ्चित्प्रमाणान्तरेण प्रकरणेनेति कस्मात्पुनः सन्निधिर्लिङ्गादिभिर्बाध्यते इत्यत आह। "दुर्बलो हि सन्निधिः" इति। प्रथमतन्त्रगतोऽर्थः स्मार्यते। तत्र तु श्रुतिलिङ्गयोः समवाये समानविषयत्वलक्षणे विरोधे किं बलीय इति चिन्ता। अत्रोदाहरणम् अस्त्यैन्द्री ऋक् कदाचनस्तरीरसि नेन्द्र इत्यादिका। श्रुतिविनियोक्त्री ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति। अत्र हि सामर्थ्यलक्षणाल्लिङ्गादिन्द्रे विनियोगः प्रतिभाति। श्रुतेश्च गार्हपत्यमिति द्वितीयातो गार्हपत्यस्य शेषित्वं ऐन्द्र्येति च तृतीयाश्रुतेरैन्द्र्या ऋचः शेषत्वमवगम्यते। यद्यपि गार्हपत्यमिति द्वितीयाश्रुते-

राग्नेयीमृचं प्रति गार्हपत्यस्य शेषित्वेनोपपत्तेः। यद्यपि चैन्द्रेति च तृतीयाश्रुतेरैन्द्र्या इन्द्रं प्रति शेषत्वेनोपपत्तेरविरोधः। पदान्तरसम्बन्धे तु वाक्यस्यैव लिङ्गेन विरोधो न तु श्रुतेः। तत्र च विपरीतं बलाबलम्। तथापि श्रुतिवाक्ययो रूपतो व्यापारभेदाददोषः द्वितीयातृतीयाश्रुती हि कारकविभक्तितया क्रियां प्रति प्रकृत्यर्थस्य कर्मकरणभावमवगमयत इति विनियोजिके क्रियां प्रति हि कर्मणः शेषित्वं करणस्य च शेषत्वमिति हि विनियोगः पदान्तरानपेक्षे च क्रियां प्रति शेषशेषित्वे श्रुतिमात्रात् प्रतीयेते इति श्रौते। सोऽयं श्रुतितः सामान्यावगतो विनियोगः पदान्तरवशाद्विशेषेऽवस्थाप्यते। सोऽयं विशेषणविशेष्यभावलक्षणः सम्बन्धो वाक्यगोचरः शेषशेषिभावस्तु श्रौतः, तस्माद्वाक्यलभ्यं विशेषमपेक्ष्य श्रौतः शेषशेषिभावो लिङ्गेन विरुध्यत इति श्रुतिलिङ्गविरोधे किं लिङ्गानुगुणेन गार्हपत्यमिति द्वितीयाश्रुतिः सप्तम्यर्थे व्याख्यायतां गार्हपत्यसमीपे ऐन्द्र्येन्द्र उपस्थेय इति। आहो श्रुत्यनुगुणतया लिङ्गं व्याख्यायताम्। प्रभवति हि स्वोचितायां क्रियायां गार्हपत्य इतीन्द्र इन्दतेरैश्वर्य्यवचनत्वादिति, किन्तावत्प्राप्तं श्रुतेर्लिङ्गं बलीय इति। नो खलु यत्रासमर्थं तच्छ्रुतिसहस्रेणापि तत्र विनियोक्तुं शक्यते। यथा वह्निना सिञ्चेत् पाथसा दहेदिति। तस्मात्सामर्थ्यं पुरोधाय श्रुत्या विनियोक्तव्यम्। सद्धास्या ऋचः प्रमाणान्तरतः शब्दतश्च इन्द्रे प्रतीयते। तथाहि। विदितपदतदर्थः कदाचनेत्यृचः स्पष्टमिन्द्रमवगच्छति। शब्दाच्चैन्द्र्येत्यतः, तस्माद्दारुदहनस्येव दहनस्य सलिलदहने विनियोगे गार्हपत्ये विनियोग ऐन्द्र्याः। न च श्रुत्यनुरोधाज्जघन्यामास्थाय वृत्तिं सामर्थ्यकल्पनेति साम्प्रतम्। सामर्थ्यस्य पूर्वभावितया तदनुरोधेनैव श्रुतिव्यव-

स्थापनात्। तस्मादैन्द्रेयेन्द्र एव गार्हपत्यसमीप उपस्थातव्य इति प्राप्ते अभिधीयते।

लिङ्गज्ञानं पुरोधाय न श्रुतेर्विनियोक्तृता।

श्रुतिज्ञानं पुरोधाय लिङ्गन्तु विनियोजकम्॥

यदि हि सामर्थ्यमवगम्य श्रुतेर्विनियोगमवधारयेत् प्रमाता। ततः श्रुतेर्विनियोगं प्रति लिङ्गज्ञानापेक्षत्वात् दुर्बलत्वं भवेत्, न त्वेतदस्ति। श्रुतिर्विनियोगाय सामर्थ्य-मपेक्षते नापेक्षते सामर्थ्यविज्ञानम्। अवगते तु ततो विनि-योगे नासमर्थस्य स इति तन्निर्वाहाय सामर्थ्यं कल्प्यते। तच्छ्रुतिविनियोगात् पूर्वमस्ति सामर्थ्यम्। न तु पूर्वमव-गम्यते। विनियोगे तु सिद्धे तदन्यथानुपपत्त्या पश्चात् प्रती-यत इति श्रुतिविनियोगात् पराचीना सामर्थ्यप्रतीतिस्तदनु-रोधेनावस्थापनीया। लिङ्गं तु न स्वतो विनियोजकमपि तु विनियोक्त्रीं कल्पयित्वा श्रुतिम्। तथाहि। न स्वरसतो लिङ्गादनेनेन्द्र उपस्थातव्य इति प्रतीयते, किन्त्वीड्गिन्द्र इति तस्य तु प्रकरणाम्नानसामर्थ्यात् सामान्यतः प्रकरणापादितैद-मर्थ्यस्य तदन्यथानुपपत्त्या विनियोगकल्पनायामपि श्रौता-द्विनियोगात् कल्पनीयस्य विनियोगस्यार्थविप्रकर्षाच्छ्रुतिरेव कल्पयितुमुचिता न तु तदर्थो विनियोगः। नहि श्रुतमनुपपन्नं वाक्यमर्थेनोपपादयितुम्। नहि त्रयोऽत्र ब्राह्मणाः काठकौ-ण्डिन्याविति वाक्यं प्रमाणान्तरोपस्थापितेन माठरेणोपपाद-यन्ति उपपादयतो वा नानोपहसन्ति शाब्दाः माठरश्चेति तु श्रावयन्तमनुमन्यन्ते। तस्माच्छ्रुतार्थसमुत्थानानुपपत्तिः श्रुते-नैवार्थान्तरेणोपपादनीया, नार्थान्तरमात्रेण प्रमाणान्तरो-पनीतेनेति लोकसिद्धम्। न च लोकसिद्धस्य नियोगानु-योगौ युज्येते शब्दार्थज्ञानोपायभूतलोकविरोधात्। तस्मा-

द्विनियोजिका श्रुतिः कल्पनीया। तथाच यावल्लिङ्गाद्विनियोजिकां श्रुतिं कल्पयितुं प्रक्रान्तव्यापारस्तावत् प्रत्यक्षया श्रुत्या गार्हपत्ये विनियोगः सिद्ध इति निवृत्ताकाङ्क्षं प्रकरणमिति कस्यानुपपत्त्या लिङ्गं विनियोक्त्रीं श्रुतिमुपकल्पयेत्। मन्त्रसमाम्नानस्य प्रत्यक्षयैव विनियोगश्रुत्योपपादितत्वात्। यथाहुः।

यावदज्ञातसन्दिग्धं ज्ञेयं तावत् प्रमित्स्यते।

प्रमिते तु प्रमातॄणां प्रमीत्सुक्यं विहन्यते॥ इति।

तस्मात्प्रतीतश्रौतविनियोगोपपत्त्यै मन्त्रस्य सामर्थ्यं तदनुगुणत्वेन नीयमानं प्रथमां वृत्तिमजहज्जघन्ययाऽपि नेयमिति सिद्धम्। लिङ्गवाक्ययोस्तु विरोधः, यथा 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेधसुमनस्यमाने' इति। किमयं कृत्स्न एव मन्त्रः सदनकरणे पुरोडाशासादने च प्रयोक्तव्यः, उत कल्पयाम्यन्त उपस्तरणे तस्मिन् सीदेत्येवमादिस्तु पुरोडाशासादन इति। यदि वाक्यं बलीयः कृत्स्नो मन्त्र उभयत्र सुशेवं कल्पयामीत्येतदपेक्षो हि तस्मिन् सीदेत्यादिः पूर्वेणैकवाक्यतामुपैति यत्तत् कल्पयामि तस्मिन् सीदेति। अथ लिङ्गं बलीयस्ततः कल्पयाम्यन्तः सदनकरणे तत्प्रकाशने हि तत्समर्थं तस्मिन् सीदेति पुरोडाशासादने तत्र हि तत्समर्थमिति, किं तावत् प्राप्तम्। लिङ्गाद्वाक्यं बलीय इति, उभयत्र कृत्स्नस्य विनियोग इति। इह हि यत्तत्पदसमभिव्याहारेण विभज्यमानसाकाङ्क्षत्वात् एकवाक्यतायां सिद्धायां तदनुरोधेन पश्चात्तदभिधानसामर्थ्यं कल्पनीयम्। यथा देवस्यत्वेतिमन्त्रेऽग्नये निर्वपामीति पदयोः समवेतार्थत्वेन तदेकवाक्यतया पदान्तराणां तत्परत्वेन तत्र सामर्थ्य-

कल्पना। तदेवं प्रतीतैकवाक्यता निर्वाहाय तदनुगुणतया सामर्थ्यं क्लृप्तं सन्न तद्व्यापादयितुमर्हति, अपि तु विनियोजिकां श्रुतिं कल्पयत्तदनुगुणमेव कल्पयेत्। तथा च वाक्यस्य लिङ्गतो बलीयस्त्वात्सदनकरणे च पुरोडाशासादने च कृत्स्न एव मन्त्रः प्रयोक्तव्य इति प्राप्तम्। एवं प्राप्त उच्यते। भवेदेतदेवं यद्येकवाक्यतावगमपूर्वं सामर्थ्यावधारणमपि तु अवष्टतसामर्थ्यानां पदानां प्रश्लिष्टपठितानां सामर्थ्यवशेन प्रयोजनैकत्वेनैकवाक्यत्वावधारणम्। यावन्ति पदानि प्रधानमेकमर्थमवगमयितुं समर्थानि विभागे साकाङ्क्षाणि तान्येकं वाक्यम्। अनुष्ठेयस्यार्थो मन्त्रेषु प्रकाश्यमानः प्रधानं सदनकरणपुरोडाशासादने चानुष्ठेयतया प्रधाने तयोश्च सदनकरणं कल्पयाम्यन्तो मन्त्रः समर्थः प्रकाशयितुं पुरोडाशासादनं च तस्मिन्सीदेत्यादिः। ततश्च यावदेकवाक्यतावशेन सामर्थ्यमनुमीयते। तावत्प्रतीतं सामर्थ्यमेकैकस्य भागस्यैकैकस्मिन्नर्थे विनियोजिकां श्रुतिं कल्पयति। तथाच श्रुत्यैवैकैकस्य भागस्यैकत्र विनियोगे सति प्रकरणपाठोपपत्तौ न वाक्यकल्पितं लिङ्गं विनियोजिकां श्रुतिमपरां कल्पयितुमर्हतीत्येकवाक्यताबुद्धिरुत्पन्नाप्याभासीभवति लिङ्गेन बाधनात्। यत्र तु विरोधकं लिङ्गं नास्ति तत्र समवेतार्थैकद्वित्रिपदैकवाक्यता पदान्तराणामपि सामर्थ्यं कल्पयतीति भवति वाक्यस्य विनियोजकत्वम्। यथाऽत्रैव स्योनन्त इत्यादीनाम्। तस्माद्वाक्याल्लिङ्गं बलीय इति सिद्धम्॥

वाक्यप्रकरणयोर्विरोधोदाहरणम्। अत्र च पदानां परस्परापेक्षावशात्कस्मिंश्चिद्विशिष्टे एकस्मिन्नर्थे पर्य्यवसितानां वाक्यत्वं, लब्धवाक्यभावानां च पुनः कार्य्यान्तरापेक्षावशेन वाक्यान्तरेण सम्बन्धः प्रकरणम्। कर्त्तव्यायाः खलु फलभाव-

नाया लब्धधात्वर्थकरणाया इतिकर्त्तव्यताकाङ्गाया वचनं प्रकरणमाचक्षते वृद्धाः। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। एतद्धि वचनं प्रकरणम्। तदेतस्मिन् स्वपदगणेन क्रियत्यप्यर्थे पर्य्यवसिते करणोपकारलक्षणकार्य्यान्तरापेक्षायां समिधो यजतीत्यादिवाक्यान्तरसम्बन्धः। समिदादिभावना हि स्वविध्युपहिताः पुरुषे हितं भाव्यमपेक्ष्यमाणा विश्वजिन्न्यायेन वानुषङ्गतो वा अर्थवादतो वा फलान्तरप्रतिलम्भेन दर्शपूर्णमासभावनां निर्वारयितुमीशते। तस्मात्तदाकाङ्क्षायामुपनिपतितान्येतानि वाक्यानि स्वकार्य्यापेक्षाणि तदपेक्षितकरणोपकारलक्षणं कार्य्यमासाद्य निर्वृंहन्ति च निर्वारयन्ति च प्रधानम्। सोऽयमनयोर्नष्टाश्वदग्धरथवत्संयोगः। तदेवं लक्षणयोर्वाक्यप्रकरणयोर्विरोधोदाहरणं सूत्रवाकनिगदः। तत्र हि पौर्णमासीदेवताः अमावास्यादेवताः समाम्नाताः। ताश्च न मिथ एकवाक्यतां गन्तुमर्हन्तीति लिङ्गेन पौर्णमासीयागादिन्द्राग्नीशब्द उत्क्रष्टव्यः अमावास्यायां च समवेतार्थत्वात् प्रयोक्तव्यः। अथेदानीं सन्दिह्यते किं यदिन्द्राग्निपदैकवाक्यतया प्रतीयते अवीवृधेथां महोज्यायोऽक्रातामिति तस्योत्क्रष्टव्यमुतेन्द्राग्निशब्दाभ्यां सहोत्क्रष्टव्यमिति। तत्र यदि प्रकरणं बलीयस्ततोऽपनीतदेवताकोऽपि शेषः प्रयोक्तव्योऽथ वाक्यं ततो यत्र देवताशब्दस्तत्रैव प्रयोक्तव्यः। किं तावत्प्राप्तमपनीतदेवताकोऽपि शेषः प्रयोक्तव्यः प्रकरणस्यैवाङ्गसम्बन्धप्रतिपादकत्वात्। फलवती हि भावना प्रधानेतिकर्त्तव्यतात्वमापादयति श्रुत्यादुपजीवनेन श्रुत्यादीनां विशेषसम्बन्धापादकत्वात् तावतः प्रधानभावनावचनलक्षणप्रकरणविरोधे तदुपजीविवाक्यं बाध्यत इति प्राप्तम्। एवं प्राप्त उच्यते। भवेदेतदेवं यदि विनियोज्यस्व-

रूपसामर्थ्यमनपेक्ष्य प्रकरणं विनियोजयेत्। अपि तु विनियोगाय तदपेक्षतेऽन्यथा पूषाद्यनुमन्त्रणमन्त्रस्य द्वादशोपसत्तायाञ्च नोत्कर्ष: स्यात् तद्रूपालोचनायाञ्च यद्यदेव शीघ्रं प्रतीयते तत्तद्बलवद्विप्रकृष्टं तु दुर्बलम्। तत्र यदि तद्रूपं श्रुत्या लिङ्गेन वाक्येन वाऽन्यत्र विनियुक्तं तत: प्रकरणं भङ्क्त्वोत्कृष्यते परिशिष्टैस्तु प्रकरणस्येतिकर्त्तव्यतापेक्षा पूर्य्यते। अथ स्वस्य शीघ्रप्रवृत्तं श्रुत्यादि नास्ति तत: प्रकरणं विनियोजकम्। यथा समिदादे:। तदिह प्रकरणाद्वाक्यस्य शीघ्रप्रवृत्तत्वमुच्यते। प्रकरणे हि स्वार्थपूर्णानां वाक्यानामुपकार्य्योपकारकाकाङ्क्षामात्रं दृश्यते। वाक्ये तु पदानां प्रत्यक्षसम्बन्ध:। ततश्च सह प्रस्थितयोर्वाक्यप्रकरणयोर्यावत्प्रकरणेनैकवाक्यता कल्प्यते तावद्वाक्येनाभिधानसामर्थ्यं, यावदितरत्र वाक्येन सामर्थ्यं तावदितरत्र सामर्थ्येन श्रुतिर्यावदितरत्र सामर्थ्येन श्रुतिस्तावदिह श्रुत्या विनियोगस्तावता च विच्छिन्नायामाकाङ्क्षायां श्रुत्यनुमाने विहते प्रकरणेनान्तरा कल्पिते विलीयन्त इति वाक्यबलीयस्त्वात्तद्देवताशेषाणामपकर्ष एवेति सिद्धम्॥ क्रमप्रकरणविरोधोदाहरणम्। राजसूयप्रकरणे प्रधानस्यैवाभिषेचनीयस्य सन्निधौ शौन:शेफोपाख्यानाद्याम्नातं तत् किं समस्तस्य राजसूयस्याङ्गमुताभिषेचनीयस्य। यदि प्रकरणं बलीयस्तत:समस्तस्य राजसूयस्य, अथ क्रमस्ततोऽभिषेचनीयस्येति, किं तावत् प्राप्तम्। नाकाङ्क्षामात्रं हि सम्बन्धहेतु:। गामानय प्रासादं पश्येति गामित्यस्य क्रियामात्रापेक्षिण: पश्येत्यनेनापि सम्बन्धसम्भवाद्विनिगमनाभावप्रसङ्गात्। तस्मात् सन्निधानं सम्बन्धकारणम्। तथा चानयेत्यनेनैव गामित्यस्य सम्बन्धो विनिगम्यते। न च सन्निधानमपि सम्बन्धकारणम्।

अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यतामित्यत्र राज्ञ इत्यस्य पुत्रपुरुषपदसन्निधानाविशेषान्मा भूदविनिगमना। तस्मादाकाङ्क्षा निश्चयहेतुर्वक्तव्या। अत्र पुत्रशब्दस्य सम्बन्धिवचनतया समुत्थिताकाङ्क्षस्यान्तिके यदुपनिपतितं सम्बन्ध्यन्तराकाङ्क्षं पदं तस्य तेनैवाकाङ्क्षापरिपूर्त्तेः पुरुषपदेन पुरुषरूपमात्राभिधायिना स्वतन्त्रेणैव न सम्बन्धः किन्तु परेणापसार्य्यतामित्यनेनापसरणीयापेक्षिणेति। सत्यपि सन्निधाने आकाङ्क्षाभावादसम्बन्धः। तथा चाभाणकः। 'तप्तं तप्तेन सम्बध्यते' इति। तथा चाकाङ्क्षितमपि न यावत्सन्निधाप्यते तावन्न सम्बध्यते। तथा सन्निहितमपि यावन्नाकाङ्क्ष्यते न तावत्सम्बध्यत इति द्वयोः सम्बन्धं प्रति समानबलत्वात् क्रमप्रकरणयोः समुच्चयासम्भवाच्च विकल्पेन राजसूयाभिषेचनीययोर्विनियोगः शौनःशेफोपाख्यानादीनामिति प्राप्तम्। एवं प्राप्त उच्यते। राजसूयस्य कथम्भावापेक्षा हि पवित्रादारभ्य चत्रस्य धृतिं यावदनुवर्त्तते तथा च अविच्छिन्ने कथम्भावे यदप्रधानस्य पठ्यते अनिर्ज्ञातफलं कर्म तस्य प्रकरणाङ्गतेति न्यायात् राजसूयाङ्गता शौनःशेफोपाख्यानादीनाम्। अभिषेचनीयस्य तु स्ववाक्योपात्तपदार्थनिराकाङ्क्षस्य सन्निधिपाठेनाकाङ्क्षोत्थापनीया यावत्तावत्सिद्धाकाङ्क्षेण राजसूयेनैकवाक्यता कल्पते। यावच्चाभिषेचनीयाकाङ्क्षया तदेकवाक्यता कल्पते तावत् क्लृप्तया राजसूयैकवाक्यतया तदुपकारकतया सामर्थ्यलक्षणं लिङ्गं यावच्चाभिषेचनीयैकवाक्यतया लिङ्गं कल्पते तावत् क्लृप्तलिङ्गे विनियोक्त्रीं श्रुतिं कल्पयति यावद्वाक्यकल्पितेन लिङ्गेन श्रुतिरितरत्र कल्पते तावत् क्लृप्तया श्रुत्या विनियोगे सति प्रकरणपाठोपपत्तौ सन्निधानपरिकल्पितमन्तरा विलीयते। प्रमाणाभावेऽप्रतिभत्वात्। प्रकरणिनश्च

राजसूयस्य सर्वदा बुद्धिसान्निध्येन तत्सन्निधेरकल्पनीयत्वात्। तस्मात्प्रकरणविरोधे क्रमस्य बाध एव न च विकल्पो दुर्बलत्वादिति सिद्धम्॥ क्रमसमाख्ययोर्विरोधोदाहरणम्। पौरोडाशिक इति समाख्याते काण्डे सान्नाय्यक्रमे च शुन्धध्वं दैव्याय कर्मण इति शुन्धनार्थो मन्त्रः समाम्नातः, तत्र सन्दिह्यते किं समाख्यानस्य बलीयस्त्वात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्य, आहो सान्नाय्यपात्राणां शुन्धने क्रमो बलीयानिति, किन्तावत् प्राप्तम्। समाख्यानं बलीय इति। पौरोडाशिकशब्देन हि पुरोडाशसम्बन्धिनीत्युच्यन्ते तान्यधिकृत्य प्रवृत्तं काण्डं पौरोडाशिकम्। ततश्च यावत्क्रमेण प्रकरणाद्यनुमानपरम्परया सम्बन्धः प्रतिपादनीयः तावत्समाख्यया श्रुत्यैव साक्षादेव स प्रतिपादित इति अर्थविप्रकर्षेण क्रमात्समाख्यैव बलीयसीति पुरोडाशपात्रशुन्धने मन्त्रः प्रयोक्तव्यः न सान्नाय्यपात्रशुन्धन इति प्राप्तम्। एवं प्राप्तेऽभिधीयते। समाख्यानात् क्रमो बलवानर्थविप्रकर्षादिति। तथाहि। समाख्या न तावत्सम्बन्धस्य वाचिका किन्तु पौरोडाशविशिष्टं काण्डमाह। तद्विशिष्टत्वान्यथानुपपत्त्या तु सम्बन्धः काण्डस्यानुमीयते न तु साक्षान्मन्त्रभेदस्य। तद्द्वारेण च तन्मध्यपातिनो मन्त्रभेदस्यापि तदनुमानम्। न चासौ सम्बन्धोऽपि श्रुत्यैव शेषशेषिभावः प्रतीयते अपि तु सम्बन्धमात्रम्। तस्माच्छ्रुतिसादृश्यमस्य दूरापेतमिति क्रमेण नास्य स्पर्द्धोचिता। तत्रापि च सामान्यतो दर्शपूर्णमासप्रकरणापादितेदमर्थ्यस्य शौनःशेपोपाख्यानादिवच्चारादुपकारकतया प्रकृतमात्रसम्बन्धानुपपत्तिः। मन्त्रस्य प्रयोगसमवेतार्थस्मारणेन सामवायिकाङ्गत्वात्। तथा च यं कञ्चित्प्रकृतप्रयोगगतमर्थं प्रकाशयतोऽस्य प्रकरणाङ्गत्वमविरुद्धमिति विशे-

षापेक्षायां सान्नाय्यक्रमः सान्नाय्यं प्रति प्रकरणाद्यनुमानद्वारेण विनियोगं कल्पयितुमुत्सहते न तु समाख्यानम्। तस्य दुर्बलत्वात्। तथाहि। समाख्यासम्बन्धनिबन्धना सती तत्सिद्ध्यर्थं सन्निधिमुपकल्पयति यावत्तावद्वैदिकेन प्रत्यक्षदृष्टेन सन्निधानेनाकाङ्क्षा कल्प्यते। यावच्च क्लृप्तेन सन्निधानेनाकाङ्क्षा कल्प्यते। तावदितरत्र क्लृप्तयाकाङ्क्षयैकवाक्यता यावच्च क्लृप्तयाकाङ्क्षयैकवाक्यता तावदितरत्रैकवाक्यतया क्लृप्तयोपकारसामर्थ्यम्। यावच्चात्रैकवाक्यतयोपकारसामर्थ्यं तावदितरत्र लिङ्गेन विनियोजिका श्रुतिः। यावदत्र लिङ्गेन विनियोजिका श्रुतिस्तावदितरत्र क्लृप्तया श्रुत्या विनियोग इति तावतैव प्रकरणपाठोपपत्तेः सर्वं समाख्यानकल्पितं विच्छिन्नमूलत्वात् लूयमानग्रस्यमिव निर्बीजं भवति पुरोडाशाभिधायकमन्त्रबाहुल्यात् काण्डस्य पौरोडाशिकसमाख्येति मन्तव्यम्।

एकद्वित्रिचतुष्पञ्चवस्त्वन्तरयकारितम्।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनां प्रतीयते॥

इत्यर्थविप्रकर्ष उक्तः। तत्रापि च

बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा।
मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया॥

इति विशेष उक्तो वृद्धैः। तदयं विस्तराद्भिभ्यतोऽपि प्रथमतन्त्रानभिज्ञानुकम्पया निम्नाविस्तरे पतिताः स्म इत्युपरम्यते। तस्माद्यथानुज्ञापनानुज्ञयोः प्रज्ञातक्रमयोरुपह्वत उपह्वयस्वेत्येवं मन्त्रावाम्नातौ देशसामान्यात्तथैवाङ्गतया प्राप्नुतः। उपह्वत इति लिङ्गतोऽनुज्ञामन्त्रो नानुज्ञापने उपह्वयस्वेति च लिङ्गतोऽनुज्ञापने च मन्त्रो नानुज्ञायाम्। तदिह लिङ्गेन क्रमं बाधित्वा विपरीतं शेषत्वमापाद्यते। यद्वहि स्थानेन

प्रकरणमुत्थाप्यैकवाक्यत्वं कल्पयते तावल्लिङ्गेन श्रुतिं कल्पयित्वा साधितो विनियोग इति अकल्पितलिङ्गश्रुतेः क्रमस्य बाधः। तद्वदिहापि विनियोगे प्रत्यक्षान्तरितेन लिङ्गेन चतुरन्तरितस्य विद्याक्रमस्य बाध इति। यद्यपि प्रथमतन्त्र एवायमर्थ उपपादितस्तथापि विरोधे तदुपपादनमिह त्वविरोधो नहि लिङ्गनाभिचारिककर्मसम्बन्धो विद्यासम्बन्धेन क्रमकृतेन विरुध्यते। न च विनियुक्तविनियोगलक्षणोऽत्र विरोधो बृहस्पतिसवेऽपि तत्प्रसङ्गात्। अथैष प्रतीतिविरोधो न च वस्तुविरोधः सविद्यायां विनियोगेऽपि तुल्यः। तस्मादविरोधाद्वेधादिमन्त्रस्योपासनाङ्गत्वमित्यस्याभ्यधिका शङ्का। तत्रोच्यते। नहि लिङ्गविरोधेन क्रमबाधोऽभिधीयते, किन्तु लिङ्गपरिच्छिन्नेन क्रमः कल्पनाक्षमः। प्रकरणपाठोपपत्त्या हि श्रुतिलिङ्गवाक्यप्रकरणैरविनियुक्तः क्रमेण प्रकरणवाक्यलिङ्गश्रुतिकल्पनाप्रणालिकया विनियुज्यते। तदविनियुक्तस्य प्रकरणपाठानर्थक्यप्रसङ्गात्। उपपादिते तु श्रुत्यादिभिः प्रकरणपाठे क्षीणत्वादर्थापत्तेः क्रमो न स्वोचितां प्रमामुत्पादयितुमर्हति प्रमित्साभावादिति। बृहस्पतिसवस्य तु क्वाश्रुतिरिव धातुसम्बन्धाधिकारात्समानकर्तृकतायां विहितासंयोगपृथक्त्वेन विनियुक्तमपि विनियोजयन्ती न शक्या श्रुत्यन्तरेण निरोद्धुं स्वप्रमामिति वैषम्यम्। तदिदमुक्तम्। "वाजपेये तु बृहस्पतिसवस्य स्पष्टं विनियोगान्तरम्" इति। "अपि चैकोऽयं प्रवर्ग्यः" इति। तुल्यबलतया बृहस्पतिसवस्य तुल्यताशङ्कापाकरणद्वारेण समुच्चयो न तु पृथग्युक्तितया परस्परापेक्षत्वादिति। सन्निधिपाठमुपपादयति। "अरण्यादिवचनवादो" इति।

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

यत्र हानोपायने श्रूयेते तत्राविवादः सन्निपाते यत्राप्युपायनमात्रश्रवणं तत्राऽपि नान्तरीयकतया हानमाक्षिप्तमित्यस्ति सन्निपातः। यत्र तु हानमात्रं सुकृतदुष्कृतयोः श्रुतं न श्रूयते उपायनं, तत्र किमुपायनमुपादानं सन्निपतेन्न वेति संशयः। अत्र पूर्वपक्षं गृह्णाति। "असन्निपात" इति। स्यादेतत्। यथा श्रूयमाणमेकत्र शाखायामुपासनाङ्गं तस्मिन्नेव वोपासने शाखान्तरेऽश्रूयमाणमङ्गमुपसंह्रियते। एवं शाखान्तरश्रुतमुपायनमुपसंहरिष्यत इत्यत आह। "विद्यान्तरगोचरत्वाच्च" इति। एकत्वे ह्युपासनकर्मणामन्यत्र श्रुतानामप्यन्यत्र समवायो घटते। न त्विहोपासनानामेकत्वं, सगुणनिर्गुणत्वेन भेदादित्यर्थः। ननु यथोपायनं श्रुतं हानमुपस्थापयत्येवं हानमपि उपायनमित्यत आह। "अपि चात्मकर्तृकम्" इति। ग्रहणं हि न स्वामिनोऽपगममन्तरेण भवतीति ग्रहणादपगमसिद्धिरवश्यम्भाविनी। अपगमस्त्वसत्यप्यन्येन ग्रहणे दृष्टो यथा प्रायश्चित्तेनापगतिरेनस इति। कर्तृभेदकथनं त्वेतदुपोद्बलनार्थं न पुनरनवश्यम्भावस्य प्रयोजकमुपायनेनानैकान्त्यादिति। सिद्धान्तमुपक्रमते। "अस्यां प्राप्तौ" इति। अयमस्यार्थः। कर्मान्तरे विहितं हि न कर्मान्तर उपसंह्रियते प्रमाणाभावात्। यत् पुनर्न विधीयते किन्तु स्तुत्यर्थं सिद्धतया सङ्कीर्त्यते। तदसति बाधके देवताधिकरणन्यायेन शब्दतः प्रतीयमानं परित्यक्तुमशक्यम्। तथा च विधूतयोः सुकृतदुष्कृतयोर्निर्गुणायां विद्यायामश्वरोमादिवत्किं भवत्वित्याकाङ्क्षायां न तावत् प्रायश्चित्तेनेव तद्विलय-

सम्भवस्तथा सत्यश्वरोमराहुदृष्टान्तानुपपत्तेः, न जात्वश्वरोमराहुमुखयोर्विलपनमस्ति। अपि त्वश्वचन्द्राभ्यां विभागः। न च नष्टे विधूननप्रमोचनार्थसम्भवः। तस्मादर्थवादस्यापेक्षायां शब्दसन्निधिकृतोऽपि विशेष उपायनं बुद्धौ सन्निधापयितुं शक्नोत्यपेक्षां पूरयितुमिति। निर्गुणापि विद्या हानोपायनाभ्यां स्तोतव्या। स्तुतिप्रकर्षस्तु प्रयोजनं न प्रमाणम्। अप्रकर्षेऽपि स्तुत्युपपत्तेः। न चार्थवादान्तरापेक्षार्थवादान्तराणां न दृष्टा। न च तैर्न पूरणमित्याह। "प्रसिद्धा च" इति। "स्तुत्यर्थत्वाच्चास्योपायनवादस्य" इति। यद्यप्यन्यदीये अपि सुकृतदुष्कृते अन्यस्य फलं प्रयच्छतः, यथा पुत्त्रस्य श्राद्धकर्म पितुः तृप्तिं यथा च पितुः वैश्वानरीयेष्टिः पुत्त्रस्य। नार्य्याश्च सुरापानं भर्त्तुर्नरकम्। तथाऽप्यन्यदीये अपि सुकृतदुष्कृते साक्षादन्यस्मिन्न सम्भवत इत्याशयेन शङ्का, फलतः प्राप्त्या स्तुतिरिति परिहारः। गुणोपसंहारविवक्षायामित्यपि न स्वरूपतः सुकृतदुष्कृतसञ्चाराभिप्रायम्। ननु विद्यागुणोपसंहाराधिकारे कोऽयमकाण्डे स्तुत्यर्थविचार इति शङ्कामुपसंहरन्नपाकरोति। "तस्माद्गुणोपसंहारविचारप्रसङ्गेन" इति। विद्यागुणोपसंहारप्रसङ्गतः स्तुतिगुणोपसंहारो विचारितः प्रयोजनं चोपासके सौहार्दमाचरितव्यम्, न त्वसौहार्दमिति। छन्द एवाच्छन्द आच्छादनादाच्छन्दो भवति। "यथैव चाविशेषेणोपगानमात्र" इति। ऋत्विज उपगायन्तीत्यविशेषेणोपगानमृत्विजाम्। भाल्लविनस्तु विशेषेण नाध्वर्य्युरुपगायतीति। तदेतस्माद्भाल्लविनां वाक्यमृत्विज उपगायन्तीत्येतच्छेषं विज्ञायते। एतदुक्तं भवति। अध्वर्य्युवर्जिता ऋत्विज उपगायन्तीति। कस्मात्पुनरेवं व्याख्यायते। ननु स्वतन्त्राण्येव सन्तु वाक्यानीत्यत आह। "श्रुत्यन्तरकृतम्"

इति। अष्टदोषदुष्टविकल्पप्रसङ्गभयेन वाक्यान्तरस्य वाक्यान्तरशेषत्वमत्रभवतो जैमिनेरपि सम्मतमित्याह। "तदुक्तं" द्वादशलक्षण्याम्। अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति। एतदेव सूत्रमर्थद्वारेण पठति। अपि तु वाक्यशेषत्वादितरपर्य्युदासः स्यात् प्रतिषेधे विकल्पः स्यात् स चान्याय्य इति शेषः। एवं किल श्रूयते। एष वै सप्तदशः प्रजापतिर्यज्ञे यज्ञेऽन्वायत्त इति। ततो नानुयाजेषु येयजामहं करोतीति तदत्रानारभ्य कञ्चिद्यज्ञं यज्ञेषु येयजामहकरणमपदिष्टम्। तदुपदिश्य चाम्नातं नानुयाजेष्विति। तत्र संशयः किं विधिप्रतिषेधयोर्विकल्प उत पर्य्युदासः। अनुयाजवर्ज्जितेषु येयजामहः कर्त्तव्य इति। मा भूदर्थप्राप्तस्य शास्त्रीयेण निषेधेन विकल्पः। दृष्टं हि तादात्विकीमस्य सुन्दरतां गमयति नायतौ दोषवत्तां निषेधति। तस्य तत्रौदासीन्यात्। निषेधशास्त्रं तु तादात्विकं सौन्दर्य्यमबाधमानमेव प्रवृत्त्युन्मुखं नरं निवारयदायत्यामस्य दुःखफलत्वमवगमयति। यथाह। अकर्त्तव्यो दुःखफल इति। ततो रागतः प्रवृत्तमप्यायत्यां दुःखतो बिभ्यतं पुरुषं शक्नोति निवारयितुमिति बलीयान् शास्त्रीयः प्रतिषेधो रागतः प्रवृत्तेरिति न तया विकल्पमर्हति। शास्त्रीयौ तु विधिनिषेधौ तुल्यबलतया षोडशिग्रहणवद्विकल्प्येते। तत्र हि विधिदर्शनात् प्रधानस्योपकारभूयस्त्वं कल्प्यते। निषेधदर्शनाच्च वैगुण्येऽपि फलसिद्धिरवगम्यते। यथाह। अर्थप्राप्तवदिति चेन्न तुल्यत्वात्। उभयं शब्दलक्षणमिति। न च वाच्यं यावद्यजतिषु येयजामहकरणं यावद्यजति सामान्यद्वारेणानुयाजं यजति विशेषमुपसर्पति तावदनुयाजगतेन निषेधेन तन्निषिद्धमिति शीघ्रप्रवृत्तेः सामान्यशास्त्राद्विशेषनिषेधो बलवा-

निति । यतो भवत्वेवं विधिषु ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति तत्र तक्रविधिर्न दधिविधिमपेक्षते प्रवर्त्तितु-मिह तु प्राप्तिपूर्वकत्वात्प्रतिषेधस्य येयजामहस्य चान्यतोऽप्राप्तेस्तन्निषेधेन निषेधाप्राप्त्यै तद्विधिरपेक्षणीयः । न च सापेक्षतया निषेधाद्विधिरेव बलीयानित्यतुल्यशिष्टतया न विकल्पः किन्तु निषेधस्यैव बाधनमिति साम्प्रतं, तथा सति निषेधशास्त्रं प्रमत्तगीतं स्यात् । न च तद्युक्तं तुल्यं हि साम्प्रदायिकम् । न च नतौ पश्चौ करोतीतिवदर्थवादता । असमवेतार्थत्वात् । पश्चौ हि नाज्यभागौ स्त इत्युपपद्यते । न चात्र तथा येयजामहाभावः, यजतिषु येयजामहविधानात् । अनुयाजानाञ्च तद्भावात् । न च पर्य्युदासस्तदाऽननुयाजेष्विति कात्यायनमतेन नियमप्रसक्तेः । तस्माद्विहितप्रतिषिद्धतया विकल्प इति प्राप्तम् । एवं प्राप्त उच्यते । “उक्तं षोडशिग्रहणाग्रहणयोर्विकल्पः” इति । नहि तत्रान्या गतिरस्ति । तेनाष्टदोषदुष्टोऽपि विकल्प आश्रीयते पक्षेऽपि प्रामाण्यान्मा भूत् प्रमत्तगीततेति । इह तु पर्य्युदासेनाप्युपपत्तौ सम्भवन्त्यामन्याय्यं विकल्पाश्रयणमयुक्तम् । एवं हि तदा नञः सम्बन्धोऽननुयाजेषु यजतिष्वनुयाजवर्जितेषु येयजामहः कर्त्तव्य इति किमतो यद्येवमेतदतो भवति । नानुयाजेष्विव्येतद्वाक्यमपरिपूर्णं साकाङ्क्षं पूर्ववाक्यैकदेशेन सम्भन्त्स्यते यदेतद्येयजामाहङ्करोतीति एतान्नानुयाजेषु यावदुक्तः स्यादनुयाजवर्जितेष्विति तावदुक्तं भवति नानुयाजेष्विति । तथा च यजतिविशेषणार्थत्वादननुयाजविधिरेवायमिति प्रतिषेधाभावान्न विकल्पः, न चाभियुक्ततरपाणिनिविरोधे कात्यायनस्य सद्वादित्वं नित्यसमासवादिनः सम्भवति । स हि विभाषाधिकारे समासं शास्ति । तस्मादनुयाजवर्जितेषु येयजामह-

विधानमिति सिद्धम्। वर्णकान्तरमाह। "अथवैतासु" इति। यथा हि सुकृतदुष्कृतयोरमूर्त्तयोः कम्पनं नाञ्जसं मूर्त्त्यनुविधायित्वात् कम्पस्य। तथाऽन्यदीययोरन्यत्र सञ्चारोऽप्यनुपपन्नोऽमूर्त्तत्वादेव। तस्माद्यत्र विधूननमात्रं श्रुतं तत्र कम्पनेन वरं स्वकार्य्यारम्भाच्चालनमात्रमेव लक्ष्यतां न तु ततोऽपगत्यान्यत्र सञ्चारः कल्पनागौरवप्रसङ्गात्। तस्मात् स्वकार्य्यारम्भाच्चालनं विधूननमिति प्राप्तेऽभिधीयते। यत्र तावदुपायनश्रुतिस्तत्रावश्यं त्यागो विधूननं वक्तव्यम्। क्वचिदपि चेद्विधूननं त्यागे वर्त्तते। तथा सत्यन्यत्रापि तत्रैव वर्त्तितुमर्हति। एवं हि न वर्त्तेत यदि विधूननमिह मुख्यं लभ्येत। न चैतदस्ति। तत्रापि स्वकार्य्याच्चालनस्य लक्ष्यमाणत्वात्। न च प्रामाणिकं कल्पनागौरवं दोषगन्धितामाचरत्यपिचानेकार्थत्वाद्धातूनां, त्यागेऽपि विधूयेति मुख्यमेव भविष्यति। प्राचुर्य्येण त्यागेऽपि लोके प्रयोगदर्शनात्। विनिगमनाहेतोरभावात्। गणकारस्य चोपलक्षणत्वेनाप्यर्थनिर्देशस्य तत्र दर्शनात्। तस्माद्धानार्थ एवात्रेति युक्तम्॥

साम्पराये तर्त्तव्याभावात्तथा ह्यन्ये॥ २७॥

ननु पाठक्रमादर्द्धपथे सुकृतदुष्कृततरणे प्रतीयेते। विद्यासामर्थ्याच्च प्रागेवावगम्येते। तथा शाट्यायनिनां ताण्डिनाञ्च श्रुतिः श्रुत्यर्थौ च पाठक्रमाद् बलीयांसौ, अग्निहोत्रं जुहोति यवागूं पचति इत्यत्र यथा। तस्मात् पूर्वपक्षाभावादनारभ्यमेतदत्रोच्यते। नैतत्पाठक्रममात्रमपि तु श्रुतिस्तत्सुकृतदुष्कृते विधूनुत इति। तदिति हि सर्वनाम, तस्मादर्थ्यसन्निहितपरामर्शकं तस्य हेतुभावमाह। सन्निहितं च यदनन्तरं श्रुतम्। तच्चार्द्धपथवर्त्ति विरजानदीमनोऽभिगमन-

मित्यर्द्धपथ एव सुकृतदुष्कृतत्यागः। न च श्रुत्यन्तरविरोधः। अर्द्धपथेऽपि पापविधूनने ब्रह्मलोकसम्भवात् प्राक्कालतोपपत्तेः। एवं शाट्यायनिनामप्यविरोधः। नहि तत्र जीवन्निति वा जीवत इति वा श्रुतम्। तथा चार्द्धपथ एव सुकृतदुष्कृतविमोकः। एवञ्च न पर्य्यङ्कविद्यातस्तत्प्रक्षय इति पूर्वः पक्षः। राद्धान्तस्तु विद्यासामर्थ्यविधूतकल्मषस्य ज्ञानवत उत्तरेण पथा गच्छतो ब्रह्मप्राप्तिर्न चाप्रक्षीणकल्मषस्योत्तरमार्गगमनं सम्भवति। यथा यवागूपाकात् प्रागग्निहोत्रम्। यमनियमाद्यनुष्ठानसहिताया विद्याया उत्तरेण मार्गेण पर्य्यङ्कस्थब्रह्मप्राप्त्युपायत्वश्रवणात्। अप्रक्षीणपाप्मनश्च तदनुपपत्तेः। विद्यैव तादृशी कल्मषं क्षपयति। क्षपितकल्मषं चोत्तरमार्गं प्रापयति इति कथमर्द्धपथे कल्मषक्षयः। तस्मात्पाठक्रमबाधेनार्थक्रमोऽनुसर्त्तव्यः। ननु न पाठक्रममात्रमत्र तदिति सर्वनामश्रुत्या सन्निहितपरामर्शादित्युक्तम्। तदयुक्तं बुद्धिसन्निधानमात्रमत्रोपयुज्यते नान्यत्, तच्चानन्तरस्येव विद्याप्रकरणाद्विद्याया अपीति समाना श्रुतिरुभयत्रापीति। अर्थपाठौ परिशिष्येते तत्र चार्थो बलीयानिति। न च ताण्ड्यादिश्रुत्यविरोधः पूर्वपक्षे। अश्व इव रोमाणि विधूयेति हि स्वतन्त्रस्य पुरुषस्य व्यापारं ब्रूते न च परे तस्यास्ति स्वातन्त्र्यम्, तस्मात् तद्विरोधः॥

छन्दत उभयाविरोधात्॥ २८॥

केभ्यश्चित्पदेभ्य इदं सूत्रम्। ननु यथा परे तस्योत्तरेण यथा ब्रह्मप्राप्तिर्भवतीति विद्याफलमेवं तस्यैवार्द्धपथे सुकृतदुष्कृतहानिरपि भविष्यतीति शङ्कापदानि तेभ्य उत्तरमिदं सूत्रम्। तद्व्याचष्टे। "यदि च देहादपसृतस्य" इति। विद्या-

फलमपि ब्रह्मप्राप्तिर्नापरे तस्य भवितुमर्हति शङ्कापदेभ्यः। यथाहुः। नाजनित्वा तत्र गच्छन्तीति। सुकृतदुष्कृतप्रचयस्तु सत्यपि नरशरीरे सम्भवतीति समर्थस्य हेतोर्यमनियमादिसहिताया विद्यमानायाः कार्य्यचयायोगाद्युक्तो जीवत एव सुकृतदुष्कृतचय इति सिद्धम्। छन्दतः स्वच्छन्दतः स्वेच्छयेति यावत्। स्वेच्छयानुष्ठानं यमनियमादिसहिताया विद्यायास्तस्य जीवतः पुरुषस्य स्यान्न मृतस्यातत्पूर्वकस्य सुकृतदुष्कृतहानं स्याज्जीवत एवासमर्थस्य चेपायोगात्। एवं कारणानन्तरङ्कार्य्योत्पादे सति निमित्तनैमित्तकयोस्तद्भावस्योपपत्तिस्ताण्ड्यशाट्यायनिश्रुत्योश्च सङ्गतिरितरथा स्वातन्त्र्याभावेनासङ्गतिरुक्ता स्यात्। तदनेनोभयाविरोधो व्याख्यातः। ये तु परस्य विदुषः सुकृतदुष्कृते कथं परत्र सङ्क्रामत इति शङ्कोत्तरतया सूत्रं व्याचख्युः। छन्दतः सङ्कल्पत इति श्रुतिस्मृत्योरविरोधादेव। न त्वत्रागमगम्येऽर्थे स्वातन्त्र्येण युक्तिर्निवेशनीयेति। तेषामधिकरणशरीरानुप्रवेशे सम्भवत्यर्थान्तरोपवर्णनमसङ्गतमेवेति।

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः॥ २९॥

यथा हानिसन्निधावपायनमन्यत्र श्रुतमिति। यत्रापि केवला हानिः श्रूयते तत्रापि उपायनमुपस्थापयत्येवं तत्सन्निधावेव देवयानः पन्थाः श्रुत इति यत्रापि सुकृतदुष्कृतहानिः केवला श्रुता तत्रापि देवयानं पन्थानमुपस्थापयितुमर्हति। न च निरञ्जनः परमं साम्यमुपैतीत्यनेन विरोधः। देवयानेन पथा ब्रह्मलोकप्राप्तौ निरञ्जनस्य परमसाम्योपपत्तेः। तस्माद्धानिमात्रे देवयानः पन्थाः सम्बध्यत इति प्राप्तम्। एवं प्राप्त उच्यते। विद्वान् पुण्यपापे विधूय निरञ्जनः

परमं साम्यमुपैतीति हि विदुषो विधूतपुण्यपापस्य विद्यया क्षेमप्राप्तिमाह । भ्रमनिबन्धनोऽक्षेमो याथात्म्यज्ञानलक्षणया विद्यया विनिवर्त्तनीयः । नासौ देशविशेषमपेक्षते । नहि जातु रज्जौ सर्पभ्रमनिवृत्तये समुत्पन्नं रज्जुतत्त्वज्ञानं देशविशेषमपेक्षते । विद्योत्पादस्यैव स्वविरोध्यविद्यानिवृत्तिरूपत्वात् । न च विद्योत्पादाय ब्रह्मलोकप्राप्तिरपेक्षणीया । यमनियमादिविशुद्धसत्त्वस्येहैव श्रवणादिभिर्विद्योत्पादात् । यदि परमारब्धकार्य्यकर्मक्षपणाय शरीरपातावध्यपेक्षेति न देवयानेनास्तीह यथार्थ इति श्रुतिदृष्टविरोधात् नापेक्षितव्य इति । अस्ति तु पर्य्यङ्कविद्यायां तस्यार्थ इत्युक्तं द्वितीयेन सूत्रेणेति । ये तु यदि पुण्यमपि निवर्त्तते किमर्था तर्हि गतिरित्याशङ्क्य सूत्रमवतारयन्ति । गतेरर्थवत्त्वमुभयथा दुष्कृतनिवृत्त्या सुकृतनिवृत्त्या च यदि पुनः पुण्यमनुवर्त्तेत ब्रह्मलोकगतस्यापीह पुण्यफलोपभोगायावृत्तिः स्यात् । तथा चैतेन प्रतिपाद्यमाना इत्यनावृत्तिश्रुतिविरोधः । तस्माद्दुष्कृतस्येव सुकृतस्यापि प्रक्षय इति तैः पुनरनाशङ्कनीयमेवाशङ्कितम् । विद्याक्षिप्तायां हि गतौ केयमाशङ्का यदि क्षीणसुकृतः किमर्थमयं यातीति । नह्येषा सुकृतनिबन्धना गतिरपि तु विद्यानिबन्धना । तस्माद् दृष्टोक्तमेवोपवर्णनं साध्विति ।

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥

प्रकरणं हि धर्माणां नियामकम् । यदि तु तन्नाद्रियते ततो दर्शपूर्णमासज्योतिष्टोमादिधर्माः सङ्कीर्य्येरन् । न च तेषां विकृतिषु सौर्य्यादिषु द्वादशाहादिषु चोदकतः

प्राप्तिः। सर्वत्रौपदेशिकत्वात्। न च दर्विहोमस्याप्रकृतिविकारभूतस्याधर्मकत्वम्। न च सर्वधर्मयुक्तं कर्म किञ्चिदपि शक्यमनुष्ठातुम्। न चैवं सति श्रुत्यादयोऽपि विनियोजकास्तेषामपि हि प्रकरणेन सामान्यसम्बन्धे सति विनियोजकत्वात्। यत्रापि विना प्रकरणं श्रुत्यादिभ्यो विनियोगोऽवगम्यते तत्रापि तन्निर्वाहाय प्रकरणस्यावश्यंकल्पनीयत्वात्। तस्मात् प्रकरणं विनियोगाय तन्नियमाय चावश्याभ्युपेतव्यमन्यथा श्रुत्यादीनामप्रामाण्यप्रसक्तेः। तस्माद्यास्वेवोपासनासु देवयानः पितृयाणो वा पन्था आम्नातस्तास्वेव न तूपासनान्तरेषु तदनाम्नानात्। न च ये चेमेऽरण्ये श्रद्धां तप इत्युपासत इति सामान्यवचनात् सर्वविद्यासु तत्पथप्राप्तिः। श्रद्धातपःपरायणानामिव तत्र तत्पथप्राप्तिः श्रूयते, न तु विद्यापरायणानाम्। अपि च एवं सत्येकस्यां विद्यायां मार्गोपदेशः सर्वासु विद्यास्वित्येकत्रैव मार्गोपदेशः कर्त्तव्यो न विद्यान्तरे। विद्यान्तरे च श्रूयते। तस्मान्न सर्वोपासनासु पथिप्राप्तिरिति प्राप्तम्। एवं प्राप्ते उच्यते। ये चेमेऽरण्ये श्रद्धां तप इत्युपासत इति न श्रद्धातपोमात्रस्य पथिप्राप्तिमाहापि तु विद्यया तदारोहन्तीत्यत्र नाविद्वांसस्तपस्विन इति केवलस्य तपसः श्रद्धायाश्च तत्प्राप्तिप्रतिषेधाद् विद्यासहिते श्रद्धातपसी तत्प्राप्त्युपायतया वदन् विद्यान्तरशीलानामपि पञ्चाग्निविद्याविद्भिः समानमार्गतां दर्शयति। तथान्यत्रापि पञ्चाग्निविद्याधिकारेऽभिधीयते। य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासत इति। सत्यशब्दस्य ब्रह्मण्येवानपेक्षप्रवृत्तित्वात्। तदेव हि सत्यमन्यस्य मिथ्यात्वेन कथञ्चिदापेक्षिकसत्यत्वात्। पञ्चाग्निविदां चेत्येवित्तयैवोपात्तत्वात्। विद्यासाहचर्य्याच्च विद्यान्तरपरायणानामेवेदमुपा-

दानं न्याय्यम् । मार्गद्वयभ्रष्टानां चाधोगतिश्रवणात् । तत्रापि च योग्यतया देवयानस्यैवेहाध्वनोऽभिसम्बन्धः । एतदुक्तं भवति । भवेत् प्रकरणं नियामकं यद्यनियमप्रतिपादकं वाक्यं श्रौतं स्मार्त्तं वा न स्यादस्ति तु तत्तस्य च प्रकरणाद् बलीयस्त्वम् । तस्मादनियमो विद्यान्तरेष्वपि सगुणेषु देवयानः पन्था असकृन्मार्गोपदेशस्य च प्रयोजनं वर्णितं भाष्यकृतेति ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

सगुणायां विद्यायां चिन्तां कृत्वा निर्गुणायां चिन्तयति । निर्गुणायां विद्यायां नापवर्गः फलं भवितुमर्हति । श्रुतिस्मृतीतिहासपुराणेषु विदुषामपि अवान्तरतमःप्रभृतीनां तत्तद्देहपरिग्रहपरित्यागौ श्रूयेते । तदपवर्गफलत्वे नोपपद्यते । अपवृक्तस्य तदनुपपत्तेः । उपपत्तौ वा तल्लक्षणायोगात् । अपुनरावृत्तिर्हि तल्लक्षणम् । तेन सत्यामपि विद्यायां तदनुपपत्तेर्न मोक्षः फलं विद्यायां विभूतयस्तु तास्तास्तस्याः फलम् । अपुनरावृत्तिश्रुतिः पुनस्तत्प्रशंसार्थेति मन्यते । न च तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति श्रुतेर्विदुषो देहपातावधिप्रतीक्षावद्वसिष्ठादीनामपि प्रारब्धकर्मफलोपभोगप्रतीक्षेति साम्प्रतम् । येन हि कर्मणा वसिष्ठादीनामारब्धं शरीरं तत्प्रतीक्षा स्यात् । तथा च न शरीरान्तरं ते गृह्णीयुः । न च तावदेव चिरमित्येतदप्यार्जवेन घटते । समर्थहेतुसन्निधौ क्षेपायोगात् । तस्मादेतदपि विद्यास्तुत्यैव गमयितव्यम् । तस्मान्नापवर्गो विद्याफलम् । तथा चापवर्गाक्षेपेण पूर्वः पक्षः । अत्र च पाक्षिकं मोक्षहेतुत्वमित्यापाततः, अहेतुत्वं वेति तु पूर्वपक्षतत्त्वम् । राद्धान्तस्तु ।

विद्याकर्मस्वनुष्ठानतोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥

निर्गुणायां विद्यायामपवर्गलक्षणं श्रूयमाणं न स्तुतिमात्रतया व्याख्यातुमुचितम् । पौर्वापर्य्यं पर्य्यालोचने भूयसीनां श्रुतीनामत्रैव तात्पर्य्यावधारणात् । न च यत्र तात्पर्य्यं तदन्यथयितुं युक्तम् । उक्तं हि न विधौ परः शब्दार्थ इति । न च विदुषामवान्तरतमःप्रभृतीनां तत्तद्देहसञ्चारात्तस्यामपि ब्रह्मविद्यायामनिर्मोक्षाद् न ब्रह्मविद्या मोक्षस्य हेतुरिति साम्प्रतम् । हेतोरपि सति प्रतिबन्धे कार्य्यानुपजनो न हेतुभावमपाकरोति । न हि वृन्तफलसंयोगप्रतिबद्धं गुरुत्वं न पतनमजीजनदिति प्रतिबन्धापगमे तत्कुर्वन्न तद्धेतुः । न च न सेतुप्रतिबद्धानामपां निम्नदेशानभिसर्पणमिति सेतुभेदे न निम्नमभिसर्पन्ति । तद्वदिहापि विद्याकर्माराधनावर्जितेश्वरविहिताधिकारपदप्रतिबद्धा ब्रह्मविद्या यद्यपि न मुक्तिं दत्तवती तथापि तत्परिसमाप्तौ प्रतिबन्धविगमे दास्यति । यथा हि प्रारब्धविपाकस्य कर्मणः प्रक्षयम्प्रतीक्षमाणस्त्वरमदेहसमुत्पन्नब्रह्मसाक्षात्कारोऽपि ध्रियतेऽथ तत्प्रक्षयान्मोक्षं प्राप्नोति । एवं प्रारब्धाधिकारलक्षणफलविद्याकर्मा पुरुषो वसिष्ठादिर्विद्वानपि तत्क्षयं प्रतीक्षमाणो युगपत्क्रमेण वा तत्तद्देहपरिग्रहपरित्यागौ कुर्वन्मुक्तोऽप्यनाभोगात्मिकया प्रख्यया सांसारिक इव विहरति । तदिदमुक्तम् । "सकृत्प्रवृत्तमेव हि ते कर्माशयमधिकारफलादानाय" इति । प्रारब्धविपाकानि तु कर्माणि वर्जयित्वा व्यपगतानि ज्ञानेनैवातिवाहितानि । "न चैते जातिस्मराः" इति । यो हि परवशो देहं परित्याज्यते देहान्तरं च नीतः पूर्वजन्मानुभूतस्य स्मरति स जन्मवान् जातिस्मरश्च । गृहादिव गृहान्तरे

स्वेच्छया कायान्तरं सञ्चरमाणो न जातिस्मर आख्यायते। व्युदय विवादं कृत्वा व्यतिरेकमाह। "यदि ह्युपयुक्ते सकृत्-प्रवृत्ते प्रारब्धविपाके कर्मणि कर्मान्तरमप्रारब्धविपाकम्" इति। स्यादेतत्। विद्ययाऽविद्यादिक्लेशनिवृत्तौ नावश्यं निःशेषस्य कर्माशयस्य निवृत्तिरनादिभव-परम्पराहितस्यानियत-विपाक-कालस्यासङ्ख्येयत्वात् कर्माशयस्येत्यत आह। "न चाविद्यादि-क्लेशदाहे सति" इति। न हि समाने विनाशहेतौ कस्य-चिद्विनाशो नापरस्येति शक्यं वदितुम्। तत्किमिदानीं प्रवृत्तफलमपि कर्म विनश्येत्। तथा च न विदुषो वसिष्ठा-देर्देहधारणेत्यत आह। "प्रवृत्तफलस्य तु कर्मणः" इति। तस्य तावदेव चिरमिति श्रुतिप्रामाण्यादनागतफलमेव कर्म क्षीयते न प्रवृत्तफलमित्यवगम्यते। अपि च नाधिकार-वतां सर्वेषामृषीणामात्मतत्त्वज्ञानं तेनाव्यापकोऽप्ययं पूर्वपक्ष इत्याह। "ज्ञानान्तरेषु च" इति। तत्किं तेषामनिर्मोक्ष एव, नेत्याह। "ते पश्चादैश्वर्य्यक्षयः" इति। निर्विण्णा विरक्ताः। प्रतिसञ्चरः, प्रलयः। अपि च स्वर्गादावनुभव-पथमनारोहति शब्दैकसमधिगम्ये विचिकित्सा स्यादपि मन्द-धियामामुष्मिकफलत्वं प्रति यथा चार्थवादः। को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेति। अद्वैतज्ञानफलत्वे मोक्ष-स्यानुभवसिद्धे विचिकित्सागन्धोऽपि नास्तीत्याह। "प्रत्यक्ष-फलत्वाच्च" इति। अद्वैततत्त्वसाक्षात्कारो हि अविद्यासमा-रोपितं प्रपञ्चं समूलघातं निघ्नन् घोरं संसाराङ्गारपरितापमुप-शमयति पुरुषस्येत्यनुभवादपि स्फुटमुपपत्तिदृढिम्नश्च श्रुतिर्द-र्शिता। तच्चानुभवाद्वामदेवादीनां सिद्धम्। ननु तत्त्वमसि वत्स इति वाक्यं कथमनुभवमेव द्योतयतीत्यत आह। "न

न्हि तत्त्वमसीत्यस्य" इति। वर्त्तमानापदेशस्य भविष्यदर्थतामृतशब्दाध्याहारस्याशक्य इत्यर्थः॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्॥ ३३॥

अक्षरविषयाणां प्रतिषेधधियां सर्ववेदवर्त्तिनीनामवरोध उपसंहारः प्रतिषेधसामान्यात् अक्षरस्य तद्भावप्रत्यभिज्ञानात्। आनन्दादयः प्रधानस्येत्यत्रायमर्थो यद्यपि भावरूपेषु विशेषणेषु सिद्धस्तन्न्यायतया च निषेधरूपेष्वपि सिद्ध एव। तथापि तस्यैवैष प्रपञ्चोऽवगन्तव्यः। निदर्शनं जामदग्न्ये हीन इति। यद्यपि शाबरे दत्तोत्तरमत्रोदाहरणान्तरम्। तथापि तुल्यन्यायतयैतदपि शक्यमुदाहर्तुमित्युदाहरणान्तरं दर्शितम्। तत्र शाबरमुदाहरणमस्त्याधानं यजुर्वेदविहितम्। य एवं विद्वानग्निमाधत्त इति। तदङ्गत्वेन यजुर्वेद एव य एवं विद्वान् वारवन्तीयं गायति य एवं विद्वान् यज्ञायज्ञीयं गायति। य एवं विद्वान् वामदेव्यं गायति इति विहितमेतानि च सामानि सामवेदेषूत्पन्नानि। तत्रेदं सन्दिह्यते। किमेतानि यत्रोत्पद्यन्ते तत्रत्येनैवोच्चैष्ट्वेन स्वरेणाधाने प्रयोक्तव्यान्यथ यत्र विनियुज्यन्ते तत्रत्येनोपांशुत्वेन स्वरेण उच्चैः साम्नोपांशु यजुषेति श्रुतेः, किं तावत् प्राप्तम्। उत्पत्तिविधिनैवापेक्षितोपायत्वात्मना विहितत्वादङ्गानां तस्यैव प्राथम्यात् तन्निबन्धन एवोच्चैःस्वरे प्राप्त उच्यते। गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः। अयमर्थः। उत्पत्तिविधिर्गुणो विनियोगविधिस्तु प्रधानं, तदनयोर्व्यतिक्रमे विरोधे उत्पत्तिविध्यालोचनेनोच्चैष्ट्वं विनियोगविध्यालोचनेन चोपांशुत्वं सोऽयं विरोधो व्यतिक्रमस्तस्मिन् व्यतिक्रमे मुख्येन

प्रधानेन नियुज्यमानत्वरूपेण तस्य वारवन्तीयादेर्वेदसंयोगो ग्राह्यो नोत्पद्यमानत्वेन गुणेन कुतो विनियुज्यमानत्वस्य मुख्यत्वेनोत्पद्यमानत्वस्य गुणत्वेन तदर्थत्वाद् विनियुज्यमानार्थत्वात् उत्पद्यमानत्वस्य। एतदुक्तं भवति। यद्यप्युत्पत्तिविधावपि चातूरूप्यमस्ति विधित्वस्याविशेषात्। तन्मात्रनान्तरीयकत्वाच्च चातूरूप्यस्य। तथापि वाक्यानामैदम्पर्य्यं भिद्यते। एकस्यैव विधेरुत्पत्तिविनियोगाधिकारप्रयोगरूपेषु चतुर्षु मध्ये किञ्चिदेव रूपं केनचिद्वाक्येनोल्लिख्यते यदन्यतो प्राप्तम्। तत्र यद्यपि सामवेदे सामानि विहितानि तथापि तद्वाक्यानां तदुत्पत्तिमात्रपरता विनियोगस्य याजुर्वैदिकैरेव वाक्यैः प्राप्तत्वात्। तथाचोत्पत्तिवाक्येभ्यः समीहितार्थाप्रतिलम्भात् विनियोगवाक्येभ्यश्च तदवगतेस्तदर्थान्येवोत्पत्तिवाक्यानि भवन्तीति तत्र येन वाक्येन विनियुज्यन्ते तस्यैव स्वरस्य साधनत्वसंस्पर्शिनो ग्रहणं न तु रूपमात्रस्पर्शिन इति। भाष्यकारीयमप्युदाहरणमेवमेव योजयितव्यम्। उद्गातृवेदोत्पन्नानां मन्त्राणामुद्गात्रा प्रयोगे प्राप्ते अध्वर्य्युप्रदानकेऽपि पुरोडाशे विनियुक्तत्वात् प्रधानानुरोधेनाध्वर्य्युणैव तेषां प्रयोगो नोद्गात्रेति दार्ष्टान्तिके योजयति। "एवमिहापि" इति।

द्व्यदामननात् ॥ ३४ ॥

गुहां प्रविष्टावात्मानावित्यत्र सिद्धोऽप्यर्थः प्रपञ्च्यते। एकत्र भोक्तृभोक्त्रोर्वेद्यता अन्यत्र भोक्तुरेवेति वेद्यभेदाद्विद्याभेद इति। न च स्रष्टीरुपदधातीतिवत् पिबदपिबल्लक्षणापरं पिबन्ताविति नेतुमुचितम्। सति मुख्यार्थसम्भवे तदाश्रयणायोगात्। न च वाक्यशेषानुरोधात्तदाश्रयणम्। सन्देहे हि वाक्यशेषान्निर्णयो न च मुख्यलाक्षणिकग्रहणविषयो

विषयः सम्भवति, तुल्यबलत्वाभावात्। प्रकरणस्य च ततो बलीयसा वाक्येन बाधनात्। तस्माद्द्वयभेदाद्विभेद इति प्राप्त उच्यते। द्वासुपर्णेत्यत्र ऋतं पिबन्तावित्यत्र च द्वित्वसङ्ख्योत्पत्तौ प्रतीयते। तेन समानतौत्सर्गिकी पिबन्ताविति द्वयोः पिबन्ता या सा बाधनीया, सा चोपक्रमोपसंहारानुरोधेन न द्वयोरपि तु छत्रिन्यायेन लाक्षणिकी व्याख्येया। येन ह्युपक्रम्यते येन चोपसंह्रियते तदनुरोधेन मध्यं ज्ञेयम्। यथा जामित्वदोषसङ्कीर्त्तनोपक्रमे तत्प्रतिसमाधानोपसंहारे च सन्दर्भे मध्यपातिनो विष्णुरुपांशु यष्टव्योऽजामित्वायेत्यादयः पृथग्विधित्वमलभमाना विधित्वमविवक्षित्वा अर्थवादतया नीतास्तत्कस्य हेतोरेकवाक्यता हि साधीयसी वाक्यभेदादिति। तथेहापि तदनुरोधेन पिबदपिबत्समूहपरं लक्षणीयं पिबन्तावित्यनेन। तथाच वेद्याभेदाद्विद्याऽभेद इति। अपि च त्रिष्वप्येतेषु वेदान्तेषु प्रकरणत्रयेऽपि पौर्वापर्य्यपर्य्यालोचनया परमात्मविद्यैवावगम्यते। यद्येवं कथं तर्हि जीवोपादानमस्त्वित्यत आह। "तादात्म्यविवक्षया" इति। नास्यां जीवः प्रतिपाद्यते किन्तु परमात्मनोऽभेदं जीवस्य दर्शयितुमसावनूद्यते। परमात्मविद्यायाश्चाभेदविषयत्वान्न भेदाभेदविचारावतारः। तस्मादेकविद्यमत्र सिद्धम्॥

अन्तरा भूतग्रामवत् स्वात्मनः॥ ३५॥

कौषीतकेयकहोलचाक्रायणोषस्तप्रश्नोपक्रमयोर्विद्ययोर्नैरन्तर्य्येणाम्नातयोः किमस्ति भेदो न वेति विषये भेद एवेति ब्रूमः। कुतः। यद्यप्युभयत्र प्रश्नोत्तरयोरभेदः प्रतीयते। तथापि तस्यैवैकस्य पुनः श्रुतेरविशेषादानर्थक्यप्रसङ्गाद् यजत्यभ्यासवद्भेदः प्राप्तः। न चैकस्यैव ताण्डिनां नवकृत्व

उपदेशेऽपि यथा भेदो न भवति स आत्मा तत्त्वमसि श्वेतकेतो इत्यत्र तथेहाप्यभेद इति युक्तम्। भूय एव मा भगवान् विज्ञापयत्विति हि तत्र श्रूयते तेनाभेदो युज्यते। न चेह तथास्ति। तेन यद्यपीह वेद्याभेदोऽवगम्यते तथाप्येकत्र तस्यैव अशनायादिमात्रात्ययोपाधेरुपासनादेकत्र च कार्य्यकारणविरहोपाधेरुपासनाद्विद्याभेद एवेति प्राप्ते प्रत्युच्यते। नैतदुपासनाविधानपरमपि तु वस्तुस्वरूपप्रतिपादनपरं प्रश्नप्रतिवचनालोचनेनोपलभ्यते। किमतो यद्येवमेतदतो भवति। विधेरप्राप्तप्रापणार्थत्वात् प्राप्तावनुपपत्तिः। वस्तुस्वरूपं तु पुनःपुनरुच्यमानमपि न दोषमावहति शतकृत्वोऽपि हि पथ्यं वदन्त्याप्ताः। विशेषतस्तु वेदः पितृभ्यामप्यभ्यर्हितः। न च सर्व्वथा पौनरुक्त्यम्। एकत्राशनाद्यत्ययादन्यत्र च कार्य्यकारणप्रविलयात् तस्मादेका विद्या। प्रत्यभिज्ञानात्। उभाभ्यामपि विद्याभ्यां भिन्न आत्मा प्रतिपाद्यते इति यो मन्यते पूर्वपक्षैकदेशी तं प्रति सर्वान्तरत्वविरोधो दर्शितः॥

अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्॥ ३६॥

इत्यस्य तु पूर्वपक्षतत्त्वाभिप्रायो दर्शितः। सुगममन्यत्।

व्यतिहारो विशिंषन्ति हीतरवत्॥ ३७॥

उत्कृष्टस्य निकृष्टरूपापत्तेर्नोभयत्रोभयरूपानुचिन्तनम्। अपि तु निकृष्टे जीव उत्कृष्टरूपाभेदचिन्तनमेवं हि निकृष्ट उत्कृष्टो भवतीति प्राप्तम्। एवं प्राप्त उच्यते। इतरेतरानुवादेनेतरेतररूपविधानादुभयत्रोभयचिन्तनं विधीयते। इत-

रथा तु योऽहं सोऽसावित्येतावदेवोच्येत। जीवात्मानमनूद्येश्वरत्वमस्य विधीयेत। न त्वीश्वरस्य जीवात्मत्वं योऽसौ सोऽहमिति। यथा तत्त्वमसीत्यत्र। तस्मादुभयरूपमुभयत्राध्यानायोपदिश्यते। नन्वेवमुत्कृष्टस्य निकृष्टत्वप्रसङ्ग इत्युक्तं तत्किमिदानीं सगुणे ब्रह्मण्युपास्यमानेऽस्य वस्तुतो निर्गुणस्य निकृष्टता भवति। कस्मैचित् फलाय तथा ध्यानमात्रं विधीयते न त्वस्य निकृष्टतामापादयतीति चेत्। इहापि व्यतिहारानुचिन्तनमात्रमुपदिश्यते फलाय न तु निकृष्टता भवत्युत्कृष्टस्य। अन्वाचयशिष्टं तु तादात्म्यदार्ढ्यं भवन्नोपेक्षामहे। सत्यकामादिगुणोपदेश इव तद्गुणेश्वरसिद्धिरिति। सिद्धमुभयत्रोभयात्मत्वाध्यानमिति॥

सैव हि सत्यादयः॥ ३८॥

तद्वैतदेव तदा स सत्यमेव स यो हैवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमान् लोकान् जित इन्वसावसन् भवेद्य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म। पूर्वोक्तस्य हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनमनेन सन्दर्भेण विधीयते। तदिति हृदयाख्यं ब्रह्मोकेन तदा परामृशति। एतदेवेति। वक्ष्यमाणं प्रकारान्तरमस्य परामृशति। तत्तदाऽग्रे आस बभूव। किं तदित्यत आह। सत्यमेव सच्च मूर्त्तं सच्चामूर्त्तं च सत्यं तदुपासकस्य फलमाह। स यो हैवमेतमिति। यः प्रथमजं यक्षं पूज्यं वेद। कथं वेदेत्यत आह। सत्यं ब्रह्मेतीति। स जयतीमान् लोकान्। किञ्च जितो वशीकृत इनुशब्द इत्थं शब्दस्यार्थे वर्त्तते। विजेतव्यत्वेन बुद्धिसन्निहितं शत्रुं परामृशति। असाविति। असद्भवेन्नश्येत्। उक्तमर्थं निगम-

यति। य एवमेतदिति। एवं विद्वान् कस्माज्जयतीत्यत आह। सत्यमेव यस्माद् ब्रह्मेति। अतस्तदुपासनात् फलोत्पादोऽपि सत्य इत्यर्थः। तद्यत्तत्सत्यं किमसौ। अत्रापि तत्पदाभ्यां रूपप्रकारौ परामृष्टौ। कस्मिन्नालम्बने तदुपासनीयमित्यत उत्तरम् "स आदित्यो य एषः" इत्यादिना। तस्योपनिषदहरहमिति। हन्ति पाप्मानं जहाति च य एवं वेदेत्यन्तेन। उपनिषद्रहस्यं नाम तस्य निर्वचनं हन्ति पाप्मानं जहाति चेति हन्तेर्जहातेर्वा रूपमेतत्। तथाच निर्वचनं कुर्वन् फलं पापहानिमाहेति। तमिमं विषयमाह भाष्यकारः। "यो वै हैतम्" इति। "सनामाक्षरोपासनाम्" इति। तथाच श्रुतिः। तदेतत् अक्षरं सत्यमिति। स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरम्। प्रथमोत्तमे अक्षरे सत्यम्। मध्यतोऽनृतं तदेतदनृतं सत्येन परिगृहीतं सत्यभूतमेव भवति। नैवं विद्वांसमनृतं हिनस्तीति। तीतीकारानुबन्ध उच्चारणार्थः। निरनुबन्धस्तकारो द्रष्टव्यः। अत्र हि प्रथमोत्तमे अक्षरे सत्यं मृत्युरूपाभावात्। मध्यतो मध्येऽनृतमनृतं हि मृत्युः। मृत्वनृतयोस्तकारसाम्यात्। तदेतदनृतं मृत्युरूपमुभयतः सत्येन परिगृहीतम्। अन्तर्भावितं सत्यरूपाभ्याम्। अतोऽकिञ्चित्करं तत् सत्यभूयमेव सत्यबाहुल्यमेव भवति। शेषमतिरोहितार्थम्। सेयं सत्यविद्यायाः सनामाक्षरोपासनता। यद्यपि तद्यत्सत्यमिति प्रकृतानुकर्षणाभेदः प्रतीयते तथापि फलभेदेन भेदः साध्यभेदेनेव नित्यकाम्यविषययोर्दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति शास्त्रयोः सत्यप्यनुबन्धाभेदेऽभेद इति प्राप्ते प्रत्युच्यते। एकैवेयं विद्या तत् सत्यमिति प्रकृतपरामर्शादभेदेन प्रत्यभिज्ञानात्। न च फलभेदः

तस्योपनिषदहरहमिति। तस्यैव यदङ्गान्तरं रहस्यनाम्नो-पासनं तत्प्रशंसार्थोऽर्थवादोऽयं न फलविधिः। यदि पुन-र्विद्याविधावधिकारश्रवणाभावात्तत्कल्पनायामार्थवादिकं फलं कल्प्येत ततो जातेष्टाविवाग्रक्ष्यमाणविशेषतया संवलिताधि-कारकल्पना ततश्च समस्तार्थश्चादिकफलयुक्तमेकमेवोपास-नमिति सिद्धम्। परकीयं व्याख्यानमुपन्यस्यति। "केचित् पुनः" इति। वाजसनेयकमप्यक्ष्यादित्यविषयं छान्दोग्यस-मीत्युपास्याभेदादभेदः। ततश्च वाजसनेयोक्तानां सत्यादी-नामुपसंहार इत्यत्रार्थे सैव हि सत्यादय इति सूत्रं व्याख्यातं तदेतत् दूषयति। "तन्न साधु" इति। ज्योतिष्टोमकर्मसम्ब-न्धिनीयमुद्गीथव्यपाश्रयेत्यनुबन्धाभेदेऽपि साध्यभेदाद्भेद इति विद्याभेदादनुपसंहार इति॥

कामादीतरत्र तत्र चायतनादिभ्यः॥ ३९॥

छान्दोग्यवाजसनेयविद्ययोर्यद्यपि सगुणनिर्गुणत्वेन भेदः। तथाहि। छान्दोग्ये अथ य इहात्मानमनुविद्य व्रजन्ति एतांश्च सत्यान् कामानित्यात्मवत् कामानामपि वेद्यत्वं श्रूयते। वाजसनेये तु निर्गुणमेव परं ब्रह्मोपदिश्यते विमो-चाय ब्रूहीति तथापि तयोः परस्परगुणोपसंहारः। निर्गुणायां तावद्विद्यायां ब्रह्मस्तुत्यर्थमेव सगुणविद्यासम्बन्धिगुणोपसंहारः सम्भवी। सगुणायां च यद्यप्याध्यानाय न वशित्वादिगुणो-पसंहारसम्भवः। नहि निर्गुणायां विद्यायामाध्यातव्यत्वेनैते चोदिता येनात्राध्येयत्वेन सम्बध्येरन्नपि तु सत्यकामादिगुण-नान्तरीयकत्वेनैतेषां प्राप्तिरित्युपसंहार उच्यते। एवं व्यव-स्थित एव संक्षेपोऽधिकरणार्थस्य साम्यबाहुल्येऽप्येकत्वाकाशा-धारत्वस्यापरत्र चाकाशतादात्म्यस्य श्रवणाद् भेदे विद्ययोर्न

परस्परगुणोपसंहार इति पूर्वपक्षः । राद्धान्तस्तु सर्वसाम्यमि-वोभयत्राप्यात्मोपदेशादाकाशशब्दे नैकत्रात्मोक्तोऽन्यत्र च दहराकाशाधारः स एवोक्त इति सर्वसाम्याद् ब्रह्मण्युभयत्रापि सर्वगुणोपसंहारः । सगुणनिर्गुणत्वेन तु विद्याभेदेऽपि गुणोपसंहारव्यवस्था दर्शिता । तस्मात्सर्वमवदातम् ॥

आदरादलोपः ॥ ४० ॥

अस्ति वैश्वानरविद्यायां तदुपासकस्यातिथिभ्यः पूर्वभोजनम् । तेन यद्यपीयमुपासनागोचरा न चिन्ता साक्षात्तथापि तत्सम्बन्धप्रथमभोजनसम्बन्धादस्ति सङ्गतिः । विचारगोचरं दर्शयति । "छान्दोग्ये वैश्वानरविद्यां प्रकृत्येति । विचारप्रयोजकं सन्देहमाह । किं भोजनलोप इति । अत्र पूर्वपक्षाभावेन संशयमाक्षिपति । "तद्युक्तम्" इति । "भक्तागमनसंयोगात्" इति । उक्तं खल्वेतत् प्रथम एव तन्त्रे पदकर्माप्रयोजकं नयनस्य परार्थत्वात् इत्यनेन यथा सोमक्रयार्था नीयमानैकहायनी सप्तमपदपांशुग्रहणमप्रयोजकम् । न पुनरेकहायन्या नयनं प्रयोजयति । तत् कस्य हेतोः । सोमक्रयेण तन्नयनस्य प्रयुक्तत्वात् तदुपजीवित्वात्सप्तमपदपांशुग्रहणस्येति । तथेहापि भोजनार्थभक्तागमनसंयोगात् प्राणाहुतेर्भोजनाभावे भक्तं प्रत्यप्रयोजकत्वमिति नास्ति पूर्वपक्ष इत्यपूर्वपक्षमिदमधिकरणमित्यर्थः । पूर्वपक्षमाक्षिप्य समाधत्ते । "एवं प्राप्ते, न लुप्यतेति तावदाह" । तावच्छब्दः सिद्धान्तशङ्कानिराकरणार्थः । पृच्छति कस्मात् । उत्तरम् आदरात् । तदेव स्फोरयति । "तथाहि" इति । जाबाला हि श्रावयन्ति पूर्वोऽतिथिभ्योऽश्नीयादिति । अश्नीयादिति च प्राणाग्निहोत्रप्रधानं वचः ।

यथा हि क्षुधिता बाला मातरं पर्य्युपासते।
एवं सर्वाणि भूतान्यग्निहोत्रमुपासते॥

इति वचनात् अग्निहोत्रस्यातिथीन् भूतानि प्रत्युपजीव्यत्वेन श्रवणात्तदेकवाक्यतयेहापि पूर्वोऽतिथिभ्योऽश्नीयादिति प्राणाहुतिप्राधान्यं लक्ष्यते। तदेवं सति यथा वै स्वयमहुत्वाऽग्निहोत्रं परस्य जुहुयादित्येवं तदित्यतिथिभोजनस्य प्राथम्यं निन्दित्वा स्वामिभोजनं स्वामिनः प्राणाग्निहोत्रं प्रथमं प्रापयन्ती प्राणाग्निहोत्रादरं करोति। नन्वाद्रियतामेषा श्रुतिः प्राणाहुतिं किन्तु स्वामिभोजनपक्ष एव नाभोजनेऽपीत्यत आह। "या हि न प्राथम्यलोपं सहते नतरां सा प्राथम्यवतोऽग्निहोत्रस्य लोपं सहेतेति मन्यते"। ईदृशः खल्वयमादरः प्राणाग्निहोत्रस्य यदतिथिभोजनोत्तरकालविहितं स्वामिभोजनं समयादपकृष्यातिथिभोजनस्य पुरस्ताद्विहितम्। तद् यदाग्निहोत्रस्य धर्मिणः प्राथम्यधर्मलोपमपि न सहते श्रुतिस्तदास्याः कैव कथा धर्मिलोपं सहेत इत्यर्थः। पूर्वपक्षमेवमनुभाष्य दूषयति। "ननु भोजनार्था" इति। यथा हि कौण्डपायिनामयनगते अग्निहोत्रे प्रकरणान्तरान्नैयमिकाग्निहोत्राच्छिन्ने द्रव्यदेवतारूपधर्मान्तररहिततया तदाकाङ्क्षे साध्यसादृश्येन नैयमिकाग्निहोत्रसमाननामतया तद्धर्मातिदेशेन रूपधर्मान्तरप्राप्तिरेवं प्राणाग्निहोत्रेऽपि नैयमिकाग्निहोत्रगतपयःप्रभृतिप्राप्तौ भोजनागतभक्तद्रव्यता विधीयते। न चैतावता भोजनस्य प्रयोजकत्वम्। उक्तमेतद् यथा भोजनकालातिक्रमात् प्राणाग्निहोत्रस्य न भोजनप्रयुक्तत्वमिति। न चैकदेशद्रव्यतयोत्तरार्द्धात् स्विष्टकृते समवद्यतीतिवदप्रयोजकत्वमेकदेशद्रव्यसाधनस्यापि प्रयोजकत्वात्। यथा जाघन्या पत्नीः संयाजयन्तीति पत्नीसंयाजानां जाघन्येकदेशद्रव्य-

जुषां जाघनीप्रयोजकत्वम् । स हि नामाप्रयोजको भवति यस्य प्रयोजकग्रहणमन्तरेणार्थो न ज्ञायते । यथा न प्रयोजकपुरोडाशग्रहणमन्तरेणोत्तरार्द्धं ज्ञातुं शक्यम् । शक्यं तु जाघनीवद्भक्तं ज्ञातुम् । तस्माद् यथा जाघन्यन्तरेणापि पशूपादानं परप्रयुक्तपशूपजीवनं वा खण्डशो मांसविक्रयिणो मुण्डादिवदाकृतिरुपादीयते । एवं भक्तमपि शक्यमुपादातुम् । तस्मान्न भोजनस्य लोपे प्राणाग्निहोत्रलोप इति मन्यते पूर्वपक्षी । अद्भिरिति तु प्रतिनिध्युपादानमावश्यकत्वसूचनार्थं भाष्यकारस्य ॥

उपस्थितेतस्तद्वचनात् ॥ ४१ ॥

तद्धोमीयमिति हि वचनं किमपि सन्निहितद्रव्यं होमे विनियुङ्क्ते तदः सर्वनाम्नः सन्निहितावममन्तरेणाभिधानापर्य्यवसानात्तदनेन स्वाभिधानपर्य्यवसानाय तद् यद्भक्तं प्रथममागच्छेदिति सन्निहितमपेक्ष्य निर्वर्तितव्यम् । तच्च सन्निहितं भक्तं भोजनार्थमित्युत्तरार्द्धात् स्विष्टकृते समवद्यतीतिवन्न भक्तं वापो वा द्रव्यान्तरं वा प्रयोक्तुमर्हति । जाघन्यास्त्ववयवभेदस्य नाग्नीषोमीयपश्वधीनं निरूपणं स्वतन्त्रस्यापि तस्य सूनास्थस्य दर्शनात्तस्मादस्त्येतस्य जाघनीतो विशेषः । यच्चोक्तं चोदकप्राप्तद्रव्यबाधया भक्तद्रव्यविधानमिति । तदयुक्तम् । विध्युद्देशगतस्याग्निहोत्रनाम्नस्तथाभावादार्थवादिकस्य तु सिद्धं किञ्चित्सादृश्यमुपादाय स्तावकत्वेनोपपत्तेर्न तद्भावं विधातुमर्हतीत्याह । "न चात्र प्राकृताग्निहोत्रधर्मप्राप्तिः" इति । अपि चाग्निहोत्रस्य चोदकतो धर्मप्राप्तावभ्युपगम्यमानायां बहुतरं प्राप्तं बाध्यते । न च सम्भवे बाधनिचयो न्याय्यः । कृष्णलचरौ खल्वगत्या प्राप्तबाधोऽभ्युपेयत इत्याह । "धर्मप्राप्ती

वाभ्युपगम्यमानायाम्" इति। चोदकाभावमुपोद्बलयति। "अत एव चेहापि" इति। यत एवोक्तं न क्रमेणातिदेशाभावोऽत एव साम्पादिकत्वमग्निहोत्राङ्गानाम्। तत्प्राप्तौ तु साम्पादिकत्वं नोपपद्यते। कामिन्यां किल कुचवदनाद्यसत्ता चक्रवाकनलिनादिरूपेण सम्पाद्यते। न तु नद्यां चक्रवाकादय एव चक्रवाकादिना सम्पाद्यन्ते। अतोऽप्यवगच्छामो न चोदकप्राप्तिरिति। यत्त्वादरदर्शनमिति तद्भोजनपक्षे प्राथम्यविधानार्थम्। यस्मिन् पक्षे धर्मानवलोपस्तस्मिन् धर्मिणोऽपि न त्वेतावता धर्मिनित्यता सिध्यतीति भावः। नन्वतिथिभोजनोत्तरकालता स्वामिभोजनस्य विहितेति कथमसौ बाध्यत इत्यत आह। "नास्ति वचनस्यातिभारः"। सामान्यशास्त्रबाधायां विशेषशास्त्रस्यातिभारो नास्तीत्यर्थः॥

तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥

यथैव यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति एतदनारभ्याधीतमव्यभिचरितक्रतुसम्बन्धं जुहूद्वारा क्रतुप्रयोगवचनगृहीतं क्रत्वर्थं सत्फलानपेक्षम्। सिद्धवर्त्तमानापदेशप्रतीतं न रात्रिसत्रवत् फलतया स्वीकरोतीति। एवमव्यभिचरितकर्मसम्बन्धोद्गीथगतमुपासनं कर्मप्रयोगवचनगृहीतं न सिद्धवर्त्तमानापदेशावगतसमस्तकामावापकत्वलक्षणफलकल्पनायालम्। परार्थत्वात्। तथा च पारमर्षं सूत्रम्। द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यादिति। एवं च सति क्रतौ पर्णतानियमवदुपासनानियम इति प्राप्त उच्यते। युक्तं पर्णतायां फलश्रुतेरर्थवादमात्रत्वम्। नहि पर्णताडनाश्रया यागादिवत् फलसम्बन्धमनुभवितुमर्हति।

अव्यापाररूपत्वात्। व्यापारस्यैव च फलवत्त्वात्। यथाहुरुत्पत्तिमतः फलदर्शनादिति। नापि खादिरतायामिव प्रकृतक्रतुसम्बन्धो यूप आश्रयस्तदाश्रयः प्रकृतोऽस्ति अनारभ्याधीतत्वात् पर्णमयतायाः। तस्माद्वाक्येनैव जुहूसम्बन्धद्वारेण पर्णतायाः क्रतुराश्रयो ज्ञापनीयः। न चातत्परं वाक्यं ज्ञापयितुमर्हतीति तत्र वाक्यतात्पर्य्यमवश्याश्रयणीयम्। तथा च तत्परं सत्र पर्णतायाः फलसम्बन्धमपि गमयितुमर्हति। वाक्यभेदप्रसङ्गात्। उपासनानां तु व्यापारात्मत्वेन स्वत एव फलसम्बन्धोपपत्तेः। उद्गीथाद्याश्रयणं फले विधानं न विरुध्यते। विशिष्टविधानात् फलाय खलूद्गीथसाधनकमुपासनं विधीयमानं न वाक्यभेदमावहति। ननु कर्माङ्गोद्गीथसंस्कार उपासनं प्रोक्षणादिवत् द्वितीयाश्रुतेरुद्गीथमिति तथा चाञ्जनादिष्विव संस्कारेषु फलश्रुतेरर्थवादत्वम्। मैवम्। नह्युद्गीथस्योपासनं किन्तु तदवयवस्योङ्कारस्येत्युक्तमधस्तात्। न चोङ्कारः कर्माङ्गमपि तु कर्माङ्गोद्गीथावयवः न चानुपयोगमीप्सितम्। तस्मात् सक्तून् जुहोतीतिवद्विनियोगभङ्गेनोङ्कारसाधनादुपासनात् फलमिति सम्बन्धः। तस्माद् यथाक्रत्वाश्रयाण्यपि गोदोहनादीनि फलसंयोगादनित्यानि एवमुद्गीथाद्युपासनानीति द्रष्टव्यम्। शेषमुक्तं भाष्ये। "न चेदं फलश्रवणमर्थवादमात्रम्" इति। अर्थवादमात्रत्वेऽत्यन्तपरोक्षा वृत्तिर्यथा न तथा फलपरत्वेन तु वर्त्तमानापदेशात् साक्षात्फलं प्रतीति। अत एव प्रयाजादिषु नार्थवादाद्वर्त्तमानोपदेशात् फलकल्पना। फलपरत्वे तस्य न शक्यं प्रयाजादीनां पारार्थ्येनाफलत्वं वक्तुमर्हति॥

प्रदानवदेव तदुक्तम्॥ ४३॥

तत्तच्छ्रुत्यर्थालोचनया वायुप्राणयोः स्वरूपाभेदे सिद्धे

तदधीननिरूपणतया तद्विषयोपासनाप्यभिन्ना। चाध्यात्माधिदैवगुणभेदाद् भेदो नहि गुणभेदे गुणवतो भेदो नह्यग्निहोत्रञ्जुहोतीति उत्पन्नस्याग्निहोत्रस्य तण्डुलादिगुणभेदाद् भेदो भवति। उत्पद्यमानकर्मसंयुक्तो हि गुणभेदः कर्मणो भेदकः। यथामिक्षावाजिनसंयुक्तयोः कर्मणोर्नोत्पन्नकर्मसंयुक्तः। अध्यात्माधिदैवोपदेशेषु चोत्पन्नोपासनासंयोगः। तथोपक्रमोपसंहारालोचनया विद्यैकत्वविनिश्चयादेकैव सकृत् प्रवृत्तिरिति पूर्वपक्षः। राद्धान्तस्तु। सत्यं विद्यैकत्वम्। तथापि गुणभेदात् प्रवृत्तिभेदः। सायंप्रातःकालगुणभेदाद्यथैकस्मिन्नपि अग्निहोत्रे प्रवृत्तिभेदः। एवमिहापि अध्यात्माधिदैवगुणभेदादुपासनस्यैकस्यापि प्रवृत्तिभेद इति सिद्धम्। "आध्यानार्थो ह्ययमध्यात्माधिदैवविभागोपदेशः" इति। अग्निहोत्रस्येवाध्यानस्य कृते दधितण्डुलादिवदयं पृथगुपदेशः। "एतेन व्रतोपदेशः" इति। एतेन तत्त्वाभेदेन। एवकारश्च वागादिव्रतनिराकरणार्थः। नन्वेतस्मै देवतायै इति देवतामात्रं श्रूयते न तु वायुस्तत्कथं वायुप्राप्तिमाह इत्यत आह। "देवतेत्यत्र वायुः" इति। वायुः खल्वग्न्यादीन् संवृणुत इत्यग्न्यादीनपेक्ष्यानवच्छिन्नोऽग्न्यादयस्तु तेनैवावच्छिन्ना इति संवर्गगुणतया वायुरनवच्छिन्ना देवता। "सर्वेषामभिगमयन्" इति। मिलितानां श्रवणाविशेषात् इन्द्रस्य देवताया अभेदात्। त्रयाणामपि पुरोडाशानां सहप्रदानाशङ्कायामुत्पत्तिवाक्य एव राजाधिराजस्वराजगुणभेदात्। याज्यानुवाक्याव्यत्यासविधानाच्च। यथान्यासमेव देवतापृथक्त्वात्प्रदानपृथक्त्वं भवति। सहप्रदाने हि व्यत्यासविधानमनुपपन्नम्। क्रमवति प्रदाने व्यत्यासविधिरर्थवान्। तथाविधस्यैव क्रमस्य विवक्षितत्वात्। सुगममन्यत्॥

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

इह सिद्धान्तेनोपक्रम्य पूर्वपक्षयित्वा सिद्धान्तयति । तत्र यद्यपि भूयांसि सन्ति लिङ्गानि मनश्चिदादीनां स्वातन्त्र्यसूचकानि । तथापि न तानि स्वातन्त्र्येण स्वातन्त्र्यं प्रति प्रापकाणि । प्रमाणप्रापितं तु स्वातन्त्र्यमुपोद्बलयन्ति । न चात्रास्ति स्वातन्त्र्यप्रापकं प्रमाणम् । न चेदं सामर्थ्यलक्षणं लिङ्गं येनास्य स्वातन्त्र्येण प्रापकं भवेत् । तद्धि सामर्थ्यमभिधानस्य वार्थस्य वा स्याद्यथा पूषाद्यनुमन्त्रणमन्त्रस्य पूषानुमन्त्रणे यथा वा पशुना यजेतेति एकत्वसंख्याया अर्थस्य संख्येयावच्छेदसामर्थ्यम् । न चेदमन्यस्यार्थदर्शनलक्षणं लिङ्गम् । तथा स्तुत्यर्थेन नास्य विध्युद्देशेनैकवाक्यतया विधिपरत्वात् । तस्मादसति सामर्थ्यलक्षणे विरोधरि प्रकरणमप्रत्यूहं मनश्चिदादीनां क्रियाशेषतामवगमयति । न च ते हैते विद्याचित एवेत्यवधारणश्रुतिः क्रियानुप्रवेशं वारयति । येन श्रुतिविरोधे सति न प्रकरणं भवेत् वाह्यसाधनतापाकरणार्थत्वादवधारणस्य । न च विद्ययाहैवं विदश्चिता भवन्तीति पुरुषसम्बन्धमापादयद्वाक्यं प्रकरणमपबाधितुमर्हति । अन्यार्थदर्शनं खल्वेतदपि । न च तत्स्वातन्त्र्येण प्रापकमित्युक्तम् । तस्मात्तदपि न प्रकरणविरोधायालमिति साम्पादिका अप्येते अग्नयः प्रकरणात् क्रियानुप्रवेशिन एव मानसवत् । द्वादशाहे तु श्रूयते । अनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं मनो ग्रहं गृह्णामीति । तत्र संशयः । किं मानसं द्वादशाहादहरन्तरमुत तन्मध्यपातिनो दशमस्याह्नोऽङ्गमिति । तत्र वाग्वै द्वादशाहो मनो मानसमिति मानसस्य द्वादशाहाद् भेदेन व्यपदेशाद् वाङ्मन-

सभेदवच्चेदः। निर्हूतानि द्वादशाहस्य गतरसानि छन्दांसि तानि मानसेनैवाप्याययन्तीति च द्वादशाहस्य मानसेन स्तूयमानत्वाङ्गेदे च सति स्तुतिस्तुत्यभावस्योपपत्तेः। द्वादशाहादहरन्तरं न तदङ्गं पत्नीसंयाजान्तत्वाच्चाङ्गा पत्नीः संयाज्य मानसाय प्रसर्पन्तीति च मानसस्य पत्नीसंयाजस्य परस्तात् श्रुतेः। त्रयोदशाहेऽप्यवयुत्य द्वादशसंख्यासमवायात् कथञ्चिज्जघन्ययापि वृत्त्या द्वादशाहे संज्ञाविरोधाभावादिति प्राप्तेऽभिधीयते। प्रमाणान्तरेण हि त्रयोदशत्वेऽङ्गां सिद्धे द्वादशाह इति जघन्यया वृत्त्योन्नीयेत। न त्वस्ति तादृशं प्रमाणान्तरम्। न च व्यपदेशभेदोऽहरन्तरत्वं कल्पयितुमर्हति। अङ्गाङ्गिभेदेनापि तदुपपत्तेः। अतएव च स्तुत्यस्तावकभावस्याप्युपपत्तिः। देवदत्तस्येव दीर्घैः केशैः। पत्नीसंयाजान्तता तु यद्यप्यौत्सर्गिकी तथापि दशमस्याह्नो विशेषवचनान्मानसानि ग्रहणासादनहवनादीनि पत्नीसंयाजात्पराञ्चि भविष्यन्ति। किमिव हि न कुर्य्याद् वचनमिति। एष वै दशमस्याह्नो विसर्गो यन्मानसमिति वचनात्। दशमाहरङ्गता गम्यते। विसर्गोऽन्तोऽन्तवतो धर्मो न स्वतन्त्र इति। दशमेऽहनि मानसाय प्रसर्पन्तीति दशमस्याह्न आधारत्वनिर्देशाच्च तदङ्गं मानसं नाहरन्तरमिति सिद्धम्। तदिह द्वादशाहसम्बन्धिनो दशमस्याह्नोऽङ्गं मानसमिति धर्ममीमांसासूत्रकृतोक्तम्। दशरात्रस्यापि दशमस्याह्नोऽङ्गमिति भगवान् भाष्यकारः। श्रुत्यन्तरबलेनाह। यथा दशरात्रस्य दशमेऽहन्यविवाक्य इति। अविवाक्य इति दशमस्याह्नो नाम।

अतिदेशाच्च ॥ ४६ ॥

नहि साम्पादिकानामग्नीनामिष्टकासु चितेनाग्निना

किञ्चिदस्ति सादृश्यमन्यत्र क्रियानुप्रवेशात्। तस्मादपि न स्वतन्त्र इति प्राप्ते, अभिधीयते ॥

विद्यैव तु निर्द्धारणात् ॥ ४७ ॥

मा भूदन्येषां श्रुतिविध्युद्देशानामन्यार्थदर्शनानामप्राप्तप्रापकत्वमेतेषु त्वश्रुतविध्युद्देशेषु वचनानि त्वपूर्व्वत्वादिति न्यायाद् विधिरुन्नेतव्यस्तथा चैतेभ्यो यादृशोऽर्थः प्रतीयते तदनुरूप एव स भवति। प्रतीयते चैतेभ्यो मनश्चिदादीनां स्वातन्त्र्यं चावधारणं च फलभेदसमन्वयश्च पुरुषसम्बन्धश्च। न चास्य गोदोहनादिवत् क्रत्वर्थाश्रितत्वं येन पुरुषार्थस्य कर्मपारतन्त्र्यं भवेत्। न च विद्याचित एवेत्यवधारणं बाह्यसाधनापाकरणार्थम्। स्वभावत एव विद्याया बाह्यानपेक्षत्वसिद्धेः। तस्मात् परिशेषान्मानसग्रहवत् क्रियानुप्रवेशशङ्कापाकरणार्थमवधारणम्। न चैवमर्थत्वे सम्भवति द्योतकत्वमात्रेण निपातश्रुतिः पीडनीया। तस्मात् श्रुतिलिङ्गवाक्यानि प्रकरणमपोह्य स्वातन्त्र्यं मनश्चिदादीनामवगमयन्तीति सिद्धम्। अनुबन्धातिदेशश्रुत्यादिभ्य एवमेव विज्ञेयम्। ते च भाष्य एव स्फुटाः। यदुक्तं पूर्वपक्षिणा क्रत्वङ्गत्वे पूर्वेणेष्टकाचितेन मनश्चिदादीनां विकल्प इति। तदतुल्यकार्य्यत्वेन दूषयति। "न च सत्येव क्रियासम्बन्धे" इति। अपि च पूर्वापरयोर्भागयोर्विद्याप्राधान्यदर्शनात् तन्मध्यपातिनोऽपि तत्सामान्याद् विद्याप्रधानत्वमेव लक्ष्यते न कर्माङ्गत्वमित्याह सूत्रेण ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्
त्वनुबन्धः ॥ ५२ ॥

स्फुटमस्य भाष्यम्। अस्ति राजसूयः। राजा स्वाराज्य-

कामो राजसूयेन यजेतेति। तं प्रक्रम्यामनन्ति। अवेष्टिं नामेष्टिम्। आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणेत्येवमादितां प्रक्रम्याधीयते। यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिं हुत्वाभिघारयेद्यदि वैश्यो वैश्वदेवं यदि राजन्य ऐन्द्रमिति। तत्र सन्दिह्यते किं ब्राह्मणादीनां प्राप्तानां निमित्तार्थेन श्रवणमुत ब्राह्मणादीनामयं यागो विधीयत इति। अत्र यदि प्रजापालनकण्टकोद्धरणादि कर्म राज्यं तस्य कर्त्ता राजेति राजशब्दस्यार्थः। ततो राजा राजसूयेन यजेतेति राज्यस्य कर्त्तू राजसूयेऽधिकारः। तस्मात् सम्भवन्त्यविशेषेण ब्राह्मणक्षत्रियवैश्या राज्यस्य कर्त्तार इति सिद्धम्। सर्व एवैते राजसूये प्राप्ता इति। यदि ब्राह्मणो यजेतेत्येवमादयो निमित्तार्थाः श्रुतयः। अथ तु राज्ञः कर्म राज्यमिति राजकर्तृयोगात् तत्कर्म राज्यं ततः को राजेत्यपेक्षायामार्य्येषु तत्प्रसिद्धेरभावात् पिकनेमतामरसादिशब्दार्थावधारणाय म्लेच्छप्रसिद्धिरिवान्ध्राणां क्षत्रियजातौ राजशब्दप्रसिद्धिस्तदवधारणकारणमिति क्षत्रिय एव राजेति न ब्राह्मणवैश्ययोः प्राप्तिरिति राजसूयप्रकरणं भित्त्वा ब्राह्मणादिकर्तृकाणि पृथगेव कर्माणि प्राप्यन्त इति न नैमित्तिकानि। तत्र किं तावत् प्राप्तं, नैमित्तिकानीति। राज्यस्य कर्त्ता राजेति। आर्य्याणामान्ध्राणाञ्चाविवादः। तथाहि। ब्राह्मणादिषु प्रजापालनकर्तृषु कनकदण्डातपत्रश्वेतचामरादिलाञ्छनेषु राजपदमान्ध्राश्चार्य्याश्चाविवादं प्रयुञ्जाना दृश्यन्ते। तेनाविप्रतिपत्तेर्विप्रति-पत्तावप्यार्य्यान्ध्रप्रयोगयोर्यव-वराहवदार्य्यप्रसिद्धेरान्ध्रप्रसिद्धितो बलीयस्त्वात्। बलवदार्य्यप्रसिद्धिविरोधे त्वतमूलायाः पाणिनीयप्रसिद्धेर्विरोधे त्वनपेक्षं स्यादिति न्यायेन बाधनात्तदनुगुणतया वा कथञ्चिन्नखनकुलादिवदन्वाख्यान-

मात्रपरतया नीयमानत्वाद्राज्यस्य कर्त्ता राजेति सिद्धे निमित्तार्थाः श्रुतयः। तथाच यदि शब्दोऽप्याञ्जसः स्यादिति प्राप्तम्, एवं प्राप्ते उच्यते।

रूपतो न विशेषोऽस्ति ह्यार्य्यम्लेच्छप्रयोगयोः।
वैदिकाद्वाक्यशेषात् तु विशेषस्तत्र दर्शितः॥

तदिह राजशब्दस्य कर्मयोगाद्वा कर्त्तरि प्रयोगः। कर्तृप्रयोगाद्वा कर्मणीति विषये वैदिकवाक्यशेषवदभियुक्ततरस्यात्र भवतः पाणिनेः स्मृतेर्निर्णीयते। प्रसिद्धिरान्ध्राणामनादिरादिमतो चार्य्याणां प्रसिद्धिः। गोगव्यादिशब्दवत्। न च सम्भावितादिमद्भावा प्रसिद्धिः पाणिनिस्मृतिमपोद्यानादिप्रसिद्धिमादिमतीं कर्तुमुत्सहते। गव्यादिशब्दप्रसिद्धेरनादित्वेन गवादिपदप्रसिद्धेरप्यादिमत्त्वापत्तेः। तस्मात्पाणिनीयस्मृत्यनुमतान्ध्रप्रसिद्धिबलीयस्त्वेन चत्रियत्वजातौ राजशब्दे मुख्ये तत्कर्त्तृत्वजातौ राजशब्दो गौण इति। चत्रियस्यैवाधिकाराद् राजसूये तत्प्रकरणमपोद्यावेष्टेरुत्कर्षः। अन्वयानुरोधी यदिशब्दो न त्वपूर्वविधौ सति तमन्यथयितुमर्हति। अत एवाहुर्यदिशब्दपरित्यागो रुच्यध्याहारकल्पनेति। इयं च राजसूयादधिकारान्तरमेतयान्नाद्यकामं याजयेदिति नास्तीति कृत्वाचिन्ता। एतस्मिंस्त्वधिकारेऽन्नाद्यकामस्य त्रैवर्णिकस्य सम्भवात् प्राप्ते निमित्तार्थता ब्राह्मणादिश्रवणस्येति दुर्वारैवेति॥

एक आत्मनः शरीरे भावात्॥ ५३॥

अधिकरणतात्पर्य्यमाह। "इह" इति। समर्थनप्रयोजनमाह। "बन्धमोच" इति। असमर्थने बन्धमोचाधिकाराभावमाह। "न ह्यसति" इति। अधस्तनतन्त्रोक्तेन पौनरुक्त्यं

चोदयति। "ननु" इति। परिहरति। "उक्तं भाष्यकृता" इति। न सूत्रकारेण तत्रोक्तं येन पुनरुक्तं भवेदपि तु भाष्यकृतेति अत्रत्यस्यैवार्थस्यापकर्षः प्रमाणलक्षणोपयोगितया तत्र कृत इति। यत इह सूत्रकृदुच्यत एव भगवतोपवर्षेणोद्धारोऽपकर्षस्य कृतः। विचारस्यास्य पूर्वोत्तरतन्त्रशेषमाह। "इह च" इति। पूर्वाधिकरणसङ्गतिमाह। "अपि च" इति। नन्वात्मास्तित्वोपपत्तय एवात्रोच्यन्तां किं तदाक्षेपेणेत्यत आह। "आक्षेपपूर्विका हि" इति। आक्षेपमाह। "अत्रैके देहमात्रात्मदर्शिनः" इति। यद्यपि समस्तव्यस्तेषु पृथिव्यप्तेजोवायुषु न चैतन्यं दृष्टं तथापि कायाकारपरिणतेषु भविष्यति। न हि किण्वादयः समस्तव्यस्ता न मदना दृष्टा इति मदिराकारपरिणता न मदयन्ति। अहमिति चानुभवे देह एव गौराद्याकारः प्रथते। न तु तदतिरिक्तः तदधिष्ठानः कुण्ड इव दधीति। अत एवाहं स्थूलो गच्छामीत्यादिसामानाधिकरण्योपपत्तिरहमः स्थूलादिभिः। न जातु दधिसमानाधिकरणानि मधुरादीनि कुण्डस्यैकाधिकरण्यमनुभवन्ति। सितं मधुरं कुण्डमिति। न चाप्रत्यक्षमात्मतत्त्वमनुमानादिभिः शक्यमुन्नेतुम्। न खल्वप्रत्यक्षं प्रमाणमस्ति। उक्तं हि।

देशकालादिरूपाणां भेदाद्भिन्नासु शक्तिषु।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा॥ इति।

यदा च उपलब्धिसाध्यानान्तरीयकभावस्य लिङ्गस्येयं गतिः। तदा कैव कथा दृष्टव्यभिचारस्य शब्दस्य अर्थापत्तेश्चात्यन्तपरोक्षार्थगोचराया उपमानस्य च सर्वैकदेशसादृश्यविकल्पितस्य। सर्वसारूप्ये तत्त्वात्। एकदेशसारूप्ये चातिप्रसङ्गात्। सर्वस्य सर्वेणोपमानात्। सौत्रस्तु हेतुर्भाष्यकृता व्याख्यातः।

चेष्टा हिताहितप्राप्तिपरिहारार्थो व्यापारः। स च शरीराधीनतया दृश्यमानः शरीरधर्म एवं प्राणः श्वासप्रश्वासादिरूपः शरीरधर्म एव। इच्छाप्रलयादयश्च यद्यप्यान्तराः तथापि शरीरातिरिक्तस्य तदाश्रयानुपलब्धेः सति शरीरेऽभावात् अन्तःशरीराश्रया एव, अन्यथा दृष्टहानाद्दृष्टकल्पनाप्रसङ्गात्। शरीरातिरिक्त आत्मनि प्रमाणाभावात् शरीरे च सम्भवात् शरीरमेवेच्छादिमदात्मेति प्राप्ते, उच्यते।

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

नाप्रत्यक्षं प्रमाणमिति ब्रुवाणः प्रष्टव्यो जायते कुतो भवान् अनुमानादीनामप्रामाण्यमवधारितवान् इति। प्रत्यक्षं हि लिङ्गादिरूपमात्रग्राहि नाप्रामाण्यमेषां विनिश्चेतुमर्हति। न हि धूमज्ञानमिवैषामिन्द्रियार्थसन्निकर्षादप्रामाण्यज्ञानमुदेतुमर्हति। किन्तु देशकालावस्थारूपभेदेन व्यभिचारोत्प्रेक्षया। न चैतावान् प्रत्यक्षस्य व्यापारः सम्भवति। यथाहुः। नह्रीदमियतो व्यापारान् कर्त्तुं समर्थं सन्निहितविषयबलेनोत्पत्तेरविचारकत्वादिति। तस्मादस्मिन्ननिच्छतापि प्रमाणान्तरमभ्युपेयम्। अपि च प्रतिपन्नं पुमांसमपहायाप्रतिपन्नसन्दिग्धाः प्रेक्षावद्भिः प्रतिपाद्यन्ते। न चैषामित्थम्भावो भवत्प्रत्यक्षगोचरः न खल्वेते गौरत्वादिवत् प्रत्यक्षगोचराः। किन्तु वचनचेष्टादिलिङ्गानुमेयाः। न च लिङ्गं प्रमाणं यत एते सिध्यन्ति। न पुंसामित्थम्भावमविज्ञाय यं कञ्चन पुरुषं प्रतिपिपादयिषतोऽनवधेयवचनस्य प्रेक्षावत्ता नाम। अपि च पशवोऽपि हिताहितप्राप्तिपरिहारार्थिनः कोमलशष्पश्यामलायां भुवि प्रवर्त्तन्ते। परिहरन्ति चाश्मानतृणकण्टका-

कीर्णम्। नास्तिकस्तु पशोरपि पशुरिष्टानिष्टसाधनमविद्वान्। न खल्वस्मिन्ननुमानगोचरप्रवृत्तिनिवृत्तिगोचरे प्रत्यक्षं प्रभवति। न च परप्रत्यायनाय शब्दं प्रयुञ्जीत शाब्दस्यार्थस्याप्रत्यक्षत्वात्। तदेव मा नाम भून्नास्तिकस्य जन्मान्तरमस्मिन्नेव जन्मन्युपस्थितोऽस्य मूकत्वप्रवृत्तिनिवृत्तिविरहरूपो महान्नरकः। पराक्रान्तं चात्र सूरिभिः। अत्यन्तपरोक्षगोचरा वान्यथानुपपद्यमानार्थप्रभवार्थापत्तिः। भूयः सामान्ययोगेन चोपमानमुपपादितं प्रमाणलक्षणे, तदत्रास्तु तावत् प्रमाणान्तरं प्रत्यक्षमेवाहम्प्रत्ययः शरीरातिरिक्तमालम्बत इत्यन्वयव्यतिरेकाभ्यामवधार्य्यते। योगव्याघ्रवत्स्वप्नदशायाञ्च शरीरान्तरपरिग्रहाभिमानेऽप्यहङ्कारास्पदस्य प्रत्यभिज्ञायमानत्वमित्युक्तम्। सूत्रयोजना तु न त्वव्यतिरिक्तः किन्तु व्यतिरिक्त आत्मा देहात्। कुतस्तद्भावाभावित्वात्। चैतन्यादिर्यदि शरीरगुणः ततोऽनेन विशेषगुणेन भवितव्यम्। न तु संख्यापरिमाणसंयोगादिवत् सामान्यगुणो न। तथाच ये भूतविशेषगुणास्ते यावद्भूतभाविनो दृष्टा यथा रूपादयः। नह्यस्ति सम्भवः भूतञ्च रूपादिरहितञ्चेति। तस्माद्भूतविशेषगुणरूपादिवैधर्म्यात् न चैतन्यं शरीरगुणः। एतेनेच्छादीनां शरीरविशेषगुणत्वं प्रत्युक्तम्। प्राणचेष्टादयो यद्यपि देहधर्मा एव। तथापि न देहमात्रप्रभवाः। मृतावस्थायामपि प्रसङ्गात्। तस्माद् यस्यैते अधिष्ठानाद्देहधर्मा भवन्ति। स देहातिरिक्त आत्मा अदृष्टकारणत्वेऽभ्युपगम्यमाने तस्यापि देहाश्रयत्वानुपपत्तेरात्मैवाभ्युपेतव्य इति। वैधर्म्यान्तरमाह। "देहधर्माश्च" इति। स्वपरप्रत्यक्षा हि देहधर्मा दृष्टा यथा रूपादयः। इच्छादयस्तु स्वप्रत्यक्षा एवेति देहधर्म्यवैधर्म्यम्। तस्मादपि देहातिरिक्तधर्मा इति। तत्र यद्यपि चैतन्य-

अपि भूतविशेषगुणः तथापि यावद्भूतमनुवर्त्तेत। न च मदशक्त्या व्यभिचारः। सामर्थ्यस्य सामान्यगुणत्वात्। अपि च मदशक्तिः प्रतिमदिरावयवं मात्रयावतिष्ठते। तद्वद्देहेऽपि चैतन्यं तदवयवेष्वपि मात्रया भवेत्। तथा चैकस्मिन् देहे बहवः चेतयेरन्। न च बहूनां चेतनानामन्योन्याभिप्रायानुविधानसम्भव इति एकपाशनिबद्धा इव बहवो विहङ्गमाः विरुद्धादिक्क्रियाभिमुखाः समर्था अपि न हस्तमात्रमपि देशमतिपतितुमुत्सहन्ते। एवं शरीरमपि न किं किञ्चित्कर्त्तुमुत्सहते। अपिच नान्वयमात्रात्तद्धर्मधर्मिभावः शक्यो विनिश्चेतुम्। मा भूदाकाशस्य सर्वो धर्मः सर्वेष्वन्वयात्। अपि त्वन्वयव्यतिरेकाभ्यां सन्दिग्धश्चात्र व्यतिरेकः। तथा च न साधकत्वमन्वयमात्रस्येत्याह। "अपि च सति तावत्" इति। दूषणान्तरं विवक्षुराक्षिपति। "किमात्मकं च" इति। स एवैकदेश्यन्यैनाह। "नहि" इति। नास्तिक आह। "यदनुभवनम्" इति। यथा हि भूतपरिणामभेदो रूपादिर्न तु भूतचतुष्टयादर्थान्तरम्। एवं भूतपरिणामभेद एव चैतन्यम्। न तु भूतेभ्योऽर्थान्तरम्। येन पृथिव्यापस्तेजो वायुरिति तत्त्वानीति प्रतिज्ञाव्याघातः स्यादित्यर्थः। एतदुक्तं भवति। चतुर्णामेव भूतानां समस्तं जगत्परिणामो न त्वस्ति तत्त्वान्तरं यस्य परिणामो रूपादयोऽन्यद्वा परिणामान्तरमिति। अत्रोक्ताभिस्तावदुपपत्तिभिर्देहधर्मत्वं निरस्तम्। तथाप्युपपत्त्यन्तराभिधित्सयाह। तत्तर्हीति। भूतधर्मा रूपादयो जडत्वाद्विषया एव दृष्टा न तु विषयिणः। न च केषाञ्चिद्विषयाणामपि विषयित्वं भविष्यतीति वाच्यम्। स्वात्मनि वृत्तिविरोधात्। न चोपलब्धावेष प्रसङ्गस्तस्या अजडायाः स्वयम्प्रकाशत्वाभ्युपगमात्। कृतोपपादनं चैतत् पुरस्तात् उपलब्धि-

वदिति सूत्रावयवं योजयति। "यथैवास्याः" इति। उपलब्धि-ग्राहिण एव प्रमाणात् शरीरव्यतिरेकोऽप्यवगम्यते। तस्यास्ततः स्वयम्प्रकाशप्रत्ययेन भूतधर्मेभ्यो जडेभ्यो वैलक्षण्येन व्यतिरेकनिश्चयात्। अस्तु तर्हि व्यतिरेकोपलब्धिर्भूतेभ्यः स्वतन्त्रा तथाप्यात्मनि प्रमाणाभाव इत्यत आह। "उपलब्धिस्वरूपमेव च न आत्मा" इति। आजानतस्तावदुपलब्धि-भेदो नानुभूयत इति विषयभेदादभ्युपेयः। न चोपलब्धिव्यतिरेकिणां विषयाणां प्रथा सम्भवतीत्युपपादितम्। न च विषयभेदग्राहि प्रमाणमस्तीति चोपपादितं ब्रह्मतत्त्वसमीक्षायामस्माभिः। एवं च सति विषयरूपतद्भेदाविव सुदुर्लभाविति दूरनिरस्ता विषयभेदादुपलब्धिभेदसंकथा। तेनोपलब्धेरुपलब्धृत्वमपि न तात्त्विकम्। किन्त्वविद्याकल्पितम्। तत्राविद्यादशायामप्युपलब्धेरभेद इत्याह। "अहमिदमद्राक्षमिति च" इति। न केवलं तात्त्विकाभेदान्नित्यत्वमतात्त्विकादपि नित्यत्वमेवेति तस्यार्थः। स्मृत्याद्युपपत्तेश्च नानात्वे हि नान्येनोपलब्धेऽन्यस्य पुरुषस्य स्मृतिर्नोपपद्यत इत्यर्थः। निराकृतमप्यर्थं निराकरणान्तरायानुभाषते। "यत्तूक्तम्" इति। यो हि देहव्यापारादुपलब्धिरुत्पद्यते तेन देहधर्म इति मन्यते तं प्रतीदं दूषणम्। "न चात्यन्तं देहस्य" इति। प्रकृतमुपसंहरति। "तस्मादनवद्यम्" इति।

अङ्गावबद्धा तु न शाखासु हि प्रतिवेदम्॥ ५५॥

स्वरादिभेदात्प्रतिवेदमुद्गीथादयो भिद्यन्ते। तदनुबद्धास्तु प्रत्ययाः प्रतिशाखं विहिता भेदेन। तत्र संशयः। किं यस्मिन्वेदे यदुद्गीथादयो विहितास्तेषामेव तद्वेदविहिताः प्रत्ययाः उतान्यवेदविहितानामप्युद्गीथादीनां ते प्रत्यया इति। किं

तावत्प्राप्तम् । ओमित्येतदक्षरमुद्गीथमुपासीतेति उद्गीथश्रवणेनोद्गीथसामान्यमवगम्यते । निर्विशेषस्य च तस्यानुपपत्तेर्विशेषाकाङ्क्षायां स्वशाखाविहितस्य विशेषस्य सन्निधानात् तेनैवाकाङ्क्षाविनिवृत्तेर्न शाखान्तरीयमुद्गीथान्तरमपेक्षते । न चैवं सन्निधानेन श्रुतिपीडा, यदि हि श्रुतिसमर्पितमर्थमपबाधेत ततः श्रुतिं पीडयेत् न चैतदस्ति । नह्युद्गीथश्रुत्यभिहितलक्षितौ सामान्यविशेषौ बाधितौ । स्वशाखागतयोः स्वीकरणात् शाखान्तरीयास्वीकारेऽपि । यथाहुः ।

जातिव्यक्ती गृहीत्वेह वयं तु श्रुतलक्षिते ।

कृष्णादि यदि मुञ्चामः का श्रुतिस्तत्र पीड्यते ॥

एवं प्राप्तम्, एवं प्राप्ते, उच्यते । उद्गीथाद्यवबद्धास्तु प्रत्यया नानाशाखासु प्रतिवेदमनुवर्तेरन् न प्रतिशाखं व्यवतिष्ठेरन् । उद्गीथमित्यादिसामान्यश्रुतेरविशेषात् । एतदुक्तं भवति । युक्तं शुक्लं पटमानयेत्यादौ पटश्रुतिमविशेषप्रवृत्तामपि सन्निधानात् शुक्लश्रुतिर्बाधत इति । विशिष्टार्थप्रत्यायनप्रयुक्तत्वात् पदानां समभिव्याहारस्य । अन्यथा तदनुपपत्तेः । न च स्वार्थमस्मारयित्वा विशिष्टार्थप्रत्यायनं पदानामिति विशिष्टार्थप्रयुक्तं स्वार्थस्मारणं न स्वप्रयोजकमपबाधितुमुत्सहते । सा च बाधि प्रयोजकाभावेन स्वार्थस्मारणमपीति युक्तमविशेषप्रवृत्ताया अपि श्रुतेरेकस्मिन्नेव विशेषे अवस्थापनम् । इह तूद्गीथश्रुतेरविशेषेण विशिष्टार्थप्रत्यायकत्वात् । सङ्कोचे प्रमाणं किञ्चिन्नास्ति । न च सन्निधिमात्रमपबाधितुमर्हति । श्रुतिसामान्यद्वारेण च सर्वविशेषगामिन्याः श्रुतेरेकस्मिन्नवस्थानं पीडैव । तस्मात्सर्वोद्गीथविषयाः प्रत्यया इति ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥

विरुद्धमिति नः संप्रत्ययो यत्प्रमाणेन नोपलभ्यते। उपलब्धं च मन्त्रादिषु शाखान्तरीयेषु शाखान्तरीयकर्मसम्बन्धित्वम्। तद्वदिहापीति दर्शनादविरोधः। एतच्च दर्शितं भाष्येण सुगमेनेति ॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति॥ ५७॥

वैश्वानरविद्यायां छान्दोग्ये किं व्यस्तोपासनं समस्तोपासनञ्च उत समस्तोपासनमेवेति। तत्र दिवमेव भगवो राजन्निति होवाचेति प्रत्येकमुपासनश्रुतेः प्रत्येकं च फलवत्त्वाम्नानात् समस्तोपासने च फलवत्त्वश्रुतेः उभयथाप्युपासनम्। न च यथा वैश्वानरीयेष्टौ यदष्टाकपालो भवतीत्यादीनामवयुत्यवादानां प्रत्येकं फलश्रवणेऽपि अर्थवादमात्रत्वं वैश्वानरं द्वादशकपालं निर्वपेदित्यस्यैव तु फलवत्त्वमेवमत्रापि भवितुमर्हति। अत्र हि द्वादशकपालं निर्वपेदिति विधिभक्तिश्रुतिर्यदष्टाकपालो भवतीत्यादिषु वर्त्तमानापदेशः। न च वचनानि त्वपूर्वत्वादिति विधिकल्पना। अवयुत्यवादेन स्तुत्याप्युपपत्तेः। इह तु समस्ते व्यस्ते च वर्त्तमानापदेशस्याविशेषात्। अगृह्यमाणविशेषतया उभयत्रापि विधिकल्पनायाः फलकल्पनायाश्च भेदात्। निन्दायाश्च समस्तोपासनारम्भे व्यस्तोपासनेऽप्युपपत्तेः। श्यामो वाश्वाहुतिसभ्यवहरतीतिवत् उभयविधमुपासनमिति प्राप्त उच्यते। समस्तोपासनस्यैव ज्यायस्त्वं न व्यस्तोपासनस्य। यद्यपि वर्त्तमानापदेशत्वमुभयत्राप्यविशिष्टं तथापि पौर्वापर्य्यालोचनया समस्तोपासनपरत्वस्यावगमः। यत्परं हि वाक्यं तदस्यार्थः। तथाहि। प्राचीनशालप्रभृतयो वैश्वानरविद्यानिर्णयायाश्वपतिं कैकेयमाजग्मुः। ते च तत्तदेकदेशोपासनमुपन्यस्तु-

वन्तः । तत्र कैकेयस्तत्तदुपासननिन्दापूर्वं तन्निवारणेन समस्तोपासनमुपसञ्जहार । तथा चैकवाक्यतालाभाय वाक्यभेदपरिहाराय च समस्तोपासनपरतैव सन्दर्भस्य लक्ष्यते । तस्माद्बहुफलसङ्कीर्त्तनं प्रधानस्तवनाय । समस्तोपासनस्यैव तु फलवत्त्वमिति सिद्धम् । एकदेशिव्याख्यानमुपन्यस्य दूषयति । "केचित्त्वत्र" इति । सम्भवत्यैकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वात् । नेदृशं सूत्रव्याख्यानं समञ्जसमित्यर्थः ।

नानाशब्दादिभेदात् ॥ ५८ ॥

सिद्धं कृत्वा विद्याभेदमधस्तनं विचारजातमभिनिर्वर्त्तितम् । सम्प्रति तु सर्वासामीश्वरगोचराणां विद्यानां किमभेदो भेदो वा एवं प्राणादिगोचरास्विति विचारयितव्यम् । ननु यथा प्रत्ययाभिधेयाया अपूर्वभावनाया आजनतो भेदाभावेऽपि धात्वर्थेन निरूप्यमाणत्वात् तस्य च यागादेर्भेदात् प्रकृत्यर्थयागादिधात्वर्थानुबन्धभेदाद्भेदः । तदनुरक्ताया एव तस्याः प्रतीयमानत्वात् । एवं विद्यानामपि रूपतो वेद्यस्येश्वरस्याभेदेऽपि तत्तत्सत्यसङ्कल्पत्वादिगुणोपधानभेदाद्विद्याभेद इति नास्त्यभेदाशङ्का । उच्यते । युक्तमनुबन्धभेदात्कार्य्यरूपाणामपूर्वभावनानां भेद इति । इह ब्रह्मणः सिद्धरूपत्वाद् गुणानामपि सत्यसङ्कल्पत्वादीनां तदाश्रयाणां सिद्धतया सर्वत्राभेदो विद्यासु । नहि विशालवक्षाश्यकोरेक्षणः क्षत्रिययुवा दुस्त्रवनधर्मेति एकत्रोपदिष्टोऽन्यत्र सिंहास्यो वृषस्कन्धः स एवोपदिश्यमानश्चकोरेक्षणत्वाद्यपजहाति न खलु प्रत्युपदेशं वस्तु भिद्यते । तस्य सर्वत्र तादवस्थ्यात् । अतादवस्थ्ये वा तदेव न भवेत् । नहि वस्तु विकल्प्यत इति । तस्माद्वेद्याभेदाद् विद्यानां भेद इति प्राप्तम् । एवं प्राप्त

उच्यते। भवेदेतदेवं यदि वस्तुनिष्ठान्युपासनवाक्यानि किन्तु तद्विषयामुपासनाभावनां विदधति। सा च कार्य्यरूपा। यद्यपि चोपासनाभावना उपासनाधीननिरूपणोपासनं चोपास्याधीननिरूपणमुपास्यं चेश्वरादि व्यवस्थितरूपम्। तथाप्युपासनाविषयीभावोऽस्य कदाचित् कस्यचित् केनचिद्रूपेणेत्यपरिनिष्ठित एव। यथैकः स्त्रीकायः केनचिद्भक्ष्यतया केनचिदुपगन्तव्यतया केनचिदपत्यतया केनचिन्मातृतया केनचिदुपेक्षणीयतया विषयीक्रियमाणः पुरुषेच्छातन्त्रः। एवमिहापि उपासनानि पुरुषेच्छातन्त्रतया विधेयतां नातिक्रामन्ति। न च तत्तद्गुणतयोपासनानि गुणभेदान्न भिद्यन्ते। न चाग्निहोत्रमिवोपासनां विधाय दधितण्डुलादिगुणवदिह सत्यसङ्कल्पत्वादिगुणविधिर्येनैकशाखत्वं स्यात्। अपि तूत्पत्तावेवोपासनानां तत्तद्गुणविशिष्टानामवगमात्। तथा गृह्यमाणविशेषतया सर्वासां भेदस्तुल्यः। न च समस्तशाखाविहितसर्वगुणोपसंहारः शक्यानुष्ठानः। तस्माद् भेदः। न चास्मिन् पक्षे समानाः सन्तः सत्यकामादय इति। केचित् खलु गुणाः कासुचित् विद्यासु समानास्ते नैकविद्यात्वे आवर्त्तयितव्याः। एकत्रोक्तत्वात्। विद्याभेदे तु न पौनरुक्त्यमेकस्यां विद्यायामुक्ता विद्यान्तरे नोक्ता इति विद्यान्तरस्यापि तद्गुणत्वाय वक्तव्या अनुक्तानामप्राप्तेरिति।

विकल्पो विशिष्टफलत्वात् ॥ ५९ ॥

अग्निहोत्रदर्शपौर्णमास्यादिषु पृथगधिकाराणामपि समुच्चयो दृष्टो नियमवान् तेषां नित्यत्वादुपासनास्तु काम्यतया न नित्यास्तस्मात्तासां समुच्चयनियमः। तेन समानफलानां दर्शपौर्णमासज्योतिष्टोमादीनामिव न नियमवान्विकल्पः फल-

भूमार्थिनः समुच्चयस्यापि सम्भवादिति पूर्वः पक्षः। उपासनानाममूषामुपास्यसाक्षात्करणसाध्यत्वात् फलभेदस्यैकेनोपासनेनोपास्यसाक्षात्करणे तत एव फलप्रतिलाभे तु कृतमुपासनान्तरेण। न च साक्षात्करणस्यातिशयसम्भवस्योपायसहस्रैरपि तादवस्थ्यात्। तन्मात्रसाध्यत्वाच्च फलावाप्तेः। उपासनान्तराभ्यासे च चित्तैकाग्रताव्याघातेन कस्य चिदुपासनानिष्पत्तेरिह विकल्प एव नियमवानिति राद्धान्तः॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ६०॥

यास्तूपासनासु विनोपास्यसाक्षात्करणमदृष्टेनैव काम्यसाधनं तासां काम्यदर्शपौर्णमासादिवत् पुरुषेच्छावशेन विकल्पसमुच्चयाविति साम्प्रतम्।

अङ्गेषु यथाश्रयभावः॥ ६१॥

तन्निर्द्धारणानियमस्तद्दृष्टेः पृथगध्यप्रतिबन्धः फलमित्यत्रोपासनासु फलश्रुतेः पर्णमयीन्यायेनार्थवादतयोपासनानां क्रत्वर्थत्वेन समुच्चयनियममाशङ्क्य पुरुषार्थतयैकप्रयोगवचनग्रहणाभावेन समुच्चयनियमो निरस्तः। इह तु सत्यपि पुरुषार्थत्वे कस्मान्नैकप्रयोगवचनग्रहणं भवतीति पूर्वोक्तमर्थमाक्षिपन् प्रत्यवतिष्ठते। यद्यपि हि काम्या एता उपासनास्तथापि न स्वतन्त्रा भवितुमर्हन्ति। तथा सति हि क्रत्वर्थानाश्रिततया क्रतुप्रयोगाद्बहिरप्यमूषां प्रयोगः प्रसज्यते। न च प्रयुज्यन्ते। तत् कस्य हेतोः क्रत्वर्थाश्रितानामेव तासां तत्तत्फलोद्देशेन विधानादिति। एवं चाश्रयतन्त्रत्वादाश्रितानां प्रयोगवचनेनाश्रयाणां समुच्चयनियमेनाश्रितानामपि समुच्चयनियमो युक्तः, इतरथा तदाश्रितत्वानुपपत्तेः। स च प्रयोग-

वचन उपासनाः समुच्चिन्वन् तत्तत्फलकामनानामवश्यम्भाव-
माक्षिपति । तदभावे तासां समुच्चयनियमाभावादिति मन्वा-
नस्य पूर्वः पक्षः । राद्धान्तस्तु यथाविहितोद्दिष्टपदार्थानुरोधी
प्रयोगवचनो न पदार्थस्वभावानन्यथयितुमर्हति । किन्तु तद-
विरोधेनावतिष्ठते । तत्र क्रत्वर्थानां नित्यवदाम्नानात् । तथा-
भावस्य च सम्भवात् । नियमेनैतान् समुच्चिनोतु । कामावबद्धा-
स्तूपासनाः कामानामनित्यत्वान्न समुच्चयेन नियन्तुमर्हति ।
नहि कामा विधीयन्ते येन समुच्चीयेरन् अपि तूद्दिश्यन्ते ।
मानान्तरानुसारी चोद्देशो न तद्विरोधेनोद्देश्यमन्यथयति ।
तथा सत्युद्देशानुपपत्तेः । तस्मात् कामानामनित्यत्वात्तदव-
बद्धानामुपासनानामप्यनित्यत्वम् । नित्यानित्यसंयोगविरोधा-
त्तत्यपि तदाश्रयाणां नित्यत्वे इदमेव चाश्रयतन्त्रत्वमाश्रि-
तानां यदाश्रये सत्येव वृत्तिर्नासतीति । न तु तत्र वृत्तिरेव
नावृत्तिरिति तदिदमुक्तम् । "आश्रयतन्त्राण्यपि हि" इति ॥

समाहारात् ॥ ६३ ॥

"होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरति" इति ।
अपिर्भिन्नक्रमो दुरुद्गीतमपीति वेदान्तरोदितप्रणवोद्गीथै-
कत्वप्रत्ययसामर्थ्याद्धौत्रकर्मणः शंसनात् । उद्गाता प्रतिसमा-
दधाति किं तदित्यत आह दुरुद्गीतमपि । वेदान्तरोदिते
चौद्गात्रे कर्मणि उत्पन्नं क्षतम् । एवं ब्रुवन्वेदान्तरोदितस्य
प्रत्ययस्येत्यादि योजनीयम् ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

अस्य सूत्रस्यान्वयमुखेन व्यतिरेकमुखेन च व्याख्या, शेष-
मतिरोहितार्थम् ।

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्य-
विभागे भामत्यां तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥

पुरुषार्थोऽतःशब्दादिति बादरायणः ॥ १ ॥

स्थितं कृत्स्नौपनिषदामपवर्गाख्यपुरुषार्थसाधनात्मज्ञानपरत्वमुपासनानां च तत्तत्पुरुषार्थसाधनत्वमधस्तनं विचारजातमभिनिर्वर्त्तितम्। सम्प्रति तु किमौपनिषदात्मतत्त्वज्ञानमपवर्गसाधनतया पुरुषार्थमाहो क्रतुप्रयोगापेक्षितकर्तृ प्रतिपादकतया क्रत्वर्थमिति मीमांसामहे। यदा च क्रत्वर्थं तदा यावन्मात्रं क्रतुप्रयोगविधिनापेक्षितं कर्तृत्वमामुष्मिकफलोपभोक्तृत्वं च। न चैतदनित्यत्वे घटते कृतविप्रणाशाकृताभ्यागमप्रसङ्गात्। अतो नित्यत्वमपि तावन्मात्रमुपनिषत्सु विवक्षितम्। इतोऽन्यत्वमनपेक्षितविपरीतं च नोपनिषदर्थः स्यात्। यथा शुद्धत्वादि। यद्यपि जीवानुवादेन तस्य ब्रह्मत्वप्रतिपादनपरत्वमुपनिषदामिति महता प्रबन्धेन तत्र तत्र प्रतिपादितं तथाप्यत्र कैश्चित् पूर्वपक्षशङ्काबीजानां निराकरणे तदेव स्थूणानिखननन्यायेन निश्चलीक्रियत इत्यस्ति विचारप्रयोजनम्। तत्र यद्यपि प्रोक्षणादिवत् आत्मज्ञानं न किञ्चित् क्रतुमारभ्याधीतम्। यद्यपि च कर्तृमात्रं नाव्यभिचरितक्रतुसम्बद्धं कर्तृमात्रस्य लौकिकेष्वपि कर्मसु दर्शनात्। येन पर्णतादिवदनारभ्याधीतमप्यव्यभिचरितक्रतुसम्बद्धं जुहूद्वारेण वाक्येनैव क्रत्वर्थमापद्यते तथापि यादृश आत्मा कर्त्ता-मुष्मिकस्वर्गादिफलभोगभागो देहाद्यतिरिक्तो वेदान्तैः प्रतिपाद्यते न तादृशस्यास्ति लौकिकेषु कर्मसूपयोगः। तेषामैहिकफलानां शरीरानतिरिक्तेनापि यादृशतादृशेन कर्त्तोपपत्तेः। आमुष्मिकफलानान्तु वैदिकानां कर्मणां तमन्तरेणासम्भवात् तत्सम्बन्ध एवायमौपनिषदः कर्त्तेति तदव्यभिचारात्तान्यनुस्मारयज्जुह्वादिवद् वाक्येनैव तज्ज्ञानं पर्णतावत् क्रत्वै-

दमर्थमापद्यत इति फलश्रुतिरर्थवादः। तदुक्तम्। 'द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात्' इति। औपनिषदात्मज्ञानसंस्कृतो हि कर्त्ता पारलौकिकफलोपभोगयोग्योऽस्मीति विद्यावान् श्रद्धावान् क्रतुप्रयोगाङ्गं नान्यथा प्रोक्षिता इव व्रीहयः क्रत्वङ्गमिति। प्रियादिसूचितस्य च संसारिण एवात्मनो द्रष्टव्यत्वेन प्रतिज्ञापनात्। अपहतपाप्मत्वादयस्तु तद्विशेषणानि तस्यैव स्तुत्यर्थम्। न तु तत्परत्वमुपनिषदाम्। तस्मात् क्रत्वर्थमेवात्मज्ञानं कर्त्तृसंस्कारद्वारा न पुनः पुरुषार्थमिति। एतदुपोद्बलनार्थञ्च ब्रह्मविदामाचारादिः श्रुत्यवगत उपन्यस्तः। न केवलं वाक्यादात्मज्ञानस्य क्रत्वर्थत्वम्। तृतीयाश्रुतेश्च। न त्वेतत् प्रकृतोद्गीथविद्याविषयं यदेव विद्ययेति सर्वनामावधारणाभ्यां प्राप्तेरधिगमात्। यथा य एव धूमवान् देशः स वह्निमानिति। समन्वारम्भवचनञ्च फलारम्भे विद्याकर्मणोः साहित्यं दर्शयति। तच्च यद्यप्याग्नेयादियागषट्कवत् समप्रधानत्वेनापि भवति। तथाप्युक्तया युक्त्या विद्यायाः कर्म प्रत्यङ्गभावेनैव नेतव्यम्। वेदार्थज्ञानवतः कर्मविधानात् उपनिषदोऽपि वेदार्थ इति तज्ज्ञानमपि कर्माङ्गमिति॥

नियमाच्च॥ ७॥

सुगमम्। सिद्धान्तयति।

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्॥ ८॥

यदि शरीराद्व्यतिरिक्तः कर्त्ता भोक्तात्मेत्येतन्मात्र उपनिषदः पर्य्यवसिताः स्युस्ततः स्यादेवं, न त्वेतदस्ति। तास्त्वेवभूतजीवानुवादेन तस्य शुद्धबुद्धोदासीनब्रह्मरूपताप्रतिपादन-

परा इति तत्र तत्रासकृदावेदितम्। अनधिगतार्थबोधनस्वर-सत्ता हि शब्दस्य प्रमाणान्तरसिद्धानुवादेन। तथा चौपनि-षदात्मज्ञानस्य क्रत्वनुष्ठानविरोधिनः क्रतुसम्बन्ध एव नास्ति। किमङ्ग पुनः तदव्यभिचारस्तत्र क्रतुशेषता। तथा च नाप-वर्गफलश्रुतेरर्थवादमात्रत्वमपि तु फलपरत्वमेव। अत एव प्रियादिसूचितेन संसारिणात्मनोपक्रम्य तस्यैवात्मनोऽधिकोप-दिदिक्षायां परमात्मनोऽत्यन्ताभेद उपदिश्यते। यथा समारो-पितस्य भुजगस्य रज्जुरूपादत्यन्ताभेदः प्रतिपाद्यते। योऽयं सर्पः सा रज्जुरिति। यथा विद्यायाः कर्माङ्गत्वे दर्शनमुप-न्यस्तमेवमकर्माङ्गत्वे न दर्शनमुक्तम्। तत्र कर्माङ्गत्वदर्शना-नामन्यथासिद्धिरुक्ता केवलविद्यादर्शनानान्तु नान्यथासिद्धिर-सार्वत्रिकी व्याप्तिरप्युद्गीथविद्यापेक्षया तस्या एव प्रकृतत्वात् न त्वशेषापेक्षया। यथा सर्वे ब्राह्मणा भोज्यन्तामिति निम-न्त्रितापेक्षया तेषामेव प्रकृतत्वात्।

विभागः शतवत्॥ ११ ॥

सुगमम्। अविभागेऽपि न दोष इत्याह। "न चेदं सम-न्वारम्भवचनम्" इति। संसारिविषया विद्या विहिता यथोद्-गीथविद्या प्रतिषिद्धा च यथा सच्छास्त्राधिगमनलक्षणा अध्य-यनमात्रवत एव कर्मविधिर्न तूपनिषदध्ययनवतः। एतदुक्तं भवति। यदध्ययनमर्थावबोधपर्य्यन्तं कर्मसूपयुज्यते। यथा कर्मविधिवाक्यानां तन्मात्रवत एवाधिकारः कर्मसु नोपनिष-दध्ययनवतः तदध्ययनस्य कर्मस्वनुपयोगादिति। अध्ययन-मात्रवत एवेति मात्रग्रहणेनार्थज्ञानं वा व्यवच्छिनत्तीति मन्वानो भ्रान्त्याचोदयति। "नन्वेवं सति" इति। स्वाभिप्राय-मुद्घाटयन् समाधत्ते। "न वयम्" इति। उपनिषदध्ययना-पेक्षं मात्रग्रहणं नार्थबोधापेक्षमित्यर्थः॥

नाविशेषात् ॥ १३ ॥

कुर्वन्नेवेह कर्माणीत्यविद्यावद्विषयमित्यर्थः। विद्यावद्विषयत्वेऽपि अविरोधो विद्यास्तुत्यर्थत्वादित्याह।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

अपि च विद्याफलं प्रत्यक्षं दर्शयन्ती श्रुतिः कालान्तरभाविफलकर्माङ्गत्वं विद्याया निराकरोतीत्याह।

कामकारेण चैके ॥ १५ ॥

कामकार इच्छा ॥

उपमर्दं च ॥ १६ ॥

अधिकोपदेशादित्यनेनात्मन एव शुद्धबुद्धोदासीनत्वादय उक्ताः। इह तु समस्तक्रियाकारकफलविभागोपमर्दश्चेति।

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

सुबोधम् ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

सिद्ध ऊर्ध्वरेतसामाश्रमित्वे तद्विद्यानामकर्माङ्गतयापवर्गता स्यात्। आश्रमित्वेन त्वेषामन्यार्थपरामर्शमात्रान्न सिध्यति। विध्यभावात्। स्मृत्याचारप्रसिद्धिश्च तेषां प्रत्यक्षश्रुतिविरोधादप्रमाणम्। निन्दति हि प्रत्यक्षा श्रुतिराश्रमान्तरं वीरहा वा एष देवानामित्यादिका। प्रत्यक्षश्रुतिविरोधे च स्मृत्याचारयोरप्रामाण्यमुक्तं 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति तदेतत्सर्वमाह। त्रयो धर्मस्कन्धा इत्यादिनातविक्रृतविषया चेति। अन्धपङ्ग्वादयो हि ये नैमित्तिककर्मानधिकृतास्तान् प्रत्याश्रमान्तरविधिरिति। अपिचापवदति हि। न केवलमन्यपरतया परामर्शस्याश्रमान्तरं न

लभ्यते अपि त्वाश्रमान्तरनिन्दाद्वारेणापवादादपीत्यर्थः। स्यादेतत्। भवत्वेष परामर्शोऽन्यार्थः। ये चेमेऽरण्य इत्यादिभ्यस्त्वाश्रमान्तरं सेत्स्यतीत्यत आह। "ये चेमेऽरण्ये" इति। अस्यापि देवपथोपदेशपरत्वात् नैतत्परत्वमित्यर्थः। न चान्यपरादपि स्फुटतराश्रमान्तरप्रत्यय इत्याह। "सन्दिग्धं च" इति। नहि तप एव द्वितीय इत्यत्राश्रमान्तराभिधायी कश्चिदस्ति शब्द इति। नन्वेतमेव प्रव्राजिन इति वचनात् आश्रमान्तरं सेत्स्यतीत्यत आह। "तथैतमेव" इति। "एतदपि लोकसंस्तवनपरम्" इति। अधिकरणारम्भमाक्षिप्य नास्ति प्रत्यक्षवचनमिति कृत्वाचिन्तेयमिति समाधत्ते तत्र "ननु ब्रह्मचर्य्यादेव" इति।

अनुष्ठेयं बादरायणः साम्यश्रुतेः॥ १९॥

भवत्वन्यार्थः परामर्शः तथाप्येतस्मादाश्रमान्तराणि प्रतीयमानानि च नापाकरणमर्हन्ति। एवं तान्यपाक्रियेरन्यद्यस्मान्न प्रतीयेरन्। प्रतीयमानानि वा श्रुत्या बाध्येरन्। न तावन्न प्रतीयन्ते। तथाहि। त्रयो धर्मस्कन्धा इति स्कन्धत्रित्वं प्रतिज्ञातम्। तत्र स्कन्धशब्दो यद्याश्रमपरो न स्यात् अपि तु समूहवचनस्ततो धर्माणां यज्ञादीनां प्रातिस्विकोत्पत्तीनां किमपेक्ष्य त्रित्वं संख्यासु व्यवस्थाप्येत एकैकाश्रमोपसंगृहीतास्त्वाश्रमाणां त्रित्वाच्छक्यास्त्रित्वे व्यवस्थापयितुमित्याश्रमत्रित्वप्रतिज्ञोपपत्तिस्तत्र यज्ञादिलिङ्गो गृहाश्रम एको धर्मस्कन्धो ब्रह्मचारीति द्वितीयस्तप इति च तपःप्रधानात्तु वानप्रस्थाश्रमात्रान्यः ब्रह्मसंस्थ इति च पारिशेष्यात् परिव्राडिति वक्ष्यति। तस्मादन्यपरादपि परामर्शादाश्रमान्तराणि प्रतीयमानानि देवताधिकरणन्यायेन न शक्यन्तेऽपा-

कर्त्तुम्। न च प्रत्यक्षश्रुतिविरोधो वीरहा वेत्यादेः प्रतिपन्नगार्हस्थ्यं प्रमादादज्ञानाद्वाग्निमुद्वासयितुं प्रवृत्तं प्रत्युपपत्तेः। एवञ्च अविरोधे सिद्धवत्परामर्शादाश्रमान्तराणां शास्त्रान्तरसिद्धिं वा कल्पयिष्यामो यथोपवीतविधिपरे वाक्ये उपव्ययते देवलक्ष्ममेव तत् कुरुते इत्यत्र निवीतं मनुष्याणां प्राचीनावीतं पितॄणामपि शास्त्रान्तरसिद्धयोर्निवीतप्राचीनावीतयोः परामर्श इति॥

विधिर्वा धारणवत्॥ २०॥

यद्यपि ब्रह्मसंस्थत्वस्तुतिपरतयाऽस्य सन्दर्भस्यैकवाक्यता गम्यते। सम्भवन्त्याञ्चैकवाक्यतायां वाक्यभेदोऽन्याय्यः। तथाप्याश्रमान्तराणां पूर्वसिद्धेरभावात् परामर्शानुपपत्तेः, अपरामर्शे च स्तुतेरसम्भवेन किम्परतया एकवाक्यतास्तु इति तां भङ्क्त्वा धारणावद् वरमपूर्वत्वाद्विधिरेवास्तु। यथा अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीत्यत्र सत्यामप्यधोधारणेनैकवाक्यताप्रतीतौ विधीयत एवोपरि धारणमपूर्वत्वात्। यथोक्तम् 'विधिस्तु धारणेऽपूर्वत्वात्' इति। तथेहाप्याश्रमान्तरपरामर्शश्रुतिविधिरेवेति कल्प्यते। सम्प्रति परामर्शेऽपीतरेषामाश्रमाणां ब्रह्मसंस्थतासंस्तवसामर्थ्यादेव विधातव्या। न खल्वविधेयं संस्तूयते तदर्थत्वात् संस्तवस्येत्याह। "यदापि" इति। अत्रावान्तरविचारमारभते "सा च किं चतुर्षु" इति। विचारप्रयोजनमाह। "यदि च" इति। ननु अनाश्रम्येव ब्रह्मसंस्थो भविष्यतीत्यत आह। "नाश्रमित्वे" इति। तत्र पूर्वपक्षमाह। "तत्र तपःशब्देन" इति। अयमभिसन्धिः। न तावद् ब्रह्मसंस्थ इति पदं प्रत्यस्तमितावयवार्थपरिव्राजकेऽश्वकर्णादिपदवद्रूढम्। तदाश्रमप्राप्ति-

मात्रेणैव अमृतीभाव इति न तद्भावाय ब्रह्मज्ञानमपेक्षेत। तथा च नान्यः पन्था विद्यतेऽयनायेति विरोधः। न च सम्भवत्यवयवार्थे समुदायशक्तिकल्पना। तस्माद् ब्रह्मणि संस्था-स्येति ब्रह्मसंस्थः। एवं चतुर्षु आश्रमेषु यस्यैव ब्रह्मणि निष्ठत्वमाश्रमिणः स ब्रह्मसंस्थोऽमृतत्वमेतीति युक्तम्। तत्र तावद् ब्रह्मचारिगृहस्थौ स्वशब्दाभिहितौ तपःपदेन च तपः-प्रधानतया भिक्षुवानप्रस्थावुपस्थापितौ। भिक्षुरपि हि सम-धिकशौचाष्टग्रासीभोजननियमाद् भवति वानप्रस्थस्तपः-प्रधानः। न च गृहस्थादेः कर्मिणो ब्रह्मनिष्ठत्वासम्भवः। यदि तावत् कर्मयोगः कर्मिता। सा भिक्षोरपि कायवाङ्मनोभि-रस्ति। अथ ये न ब्रह्मार्पणेन कर्म कुर्वन्ति किन्तु कामा-र्थितया ते कर्मिणः। तथा सति गृहस्थादयोऽपि ब्रह्मार्प-णेन कर्म कुर्वाणा न कर्मिणः। तस्माद् ब्रह्मणि तात्पर्य्यं ब्रह्मनिष्ठता न तु कर्मत्यागः। प्रमाणविरोधात्। तपसा च द्वयोराश्रमयोरेकीकरणेन त्रय इति त्रित्वमुपपद्यते। एवं च त्रयोऽप्याश्रमा अब्रह्मसंस्थाः सन्तः पुण्यलोकभाजो भवन्ति यः पुनरेतेषु ब्रह्मसंस्थः सोऽमृतत्वभागिति। न च येषां पुण्यलोकभागित्वं तेषामेवामृतत्वमिति विरोधः। यथा देवदत्तयज्ञदत्तौ मन्दप्रज्ञावभूतां सम्प्रति तयोर्यज्ञदत्तस्तु शास्त्राभ्यासात् पटुप्रज्ञो वर्त्तते इति तथेहापि य एवाब्रह्म-संस्थाः पुण्यलोकभाजस्त एव ब्रह्मसंस्था अमृतत्वभाज इत्य-वस्थाभेदादविरोधः। तथाच ब्रह्मसंस्थ इति यौगिकं पदं प्रकृतविषयं भविष्यति। यथा आग्नेय्याग्नीध्रमुपतिष्ठत इत्यत्र विनियुक्तापि प्रकृतैवाग्नेयी गृह्यते। न च विनियुक्त-विनियोगविरोधः। यदि त्वत्राग्नेय्युपदिश्येत ततो यथा प्रतीता तयोद्दिश्यते। विनियुक्ता च प्रतीतिर्भवेत् इति विनि-

युक्तविनियोगविरोधः। इह तु आग्नीध्रोपस्थाने सा विधेयत्वेन विनियुज्यते न तूद्दिश्यते। विधेयत्वेन च विनियोगे आग्नेयीपदार्थापेक्षणात् प्रकृतातिक्रमे प्रमाणाभावात्। तावता च शास्त्रोपपत्तेर्नाप्रकृतानामपि ग्रहणसम्भवः। न च यातयामतया न विनियोगः। वाचस्तोमे सर्वेषामेव मन्त्राणां विनियोगादन्यत्राप्यविनियोगप्रसङ्गात्। तथेहापि प्रकृता एवाश्रमा बुद्धिविपरिवर्त्तिनः परामृश्यन्ते नानुक्तः परिव्राडेवेति पूर्व्वः पक्षः। राद्धान्तमुपक्रमते। "तदयुक्तम्। नहि सत्यां गतौ वानप्रस्थविशेषणो न" इति। यथोपक्रान्तं तथैव परिसमापनमुचितम्। यत्सङ्ख्याकाश्च ये प्रसिद्धास्ते तत्सङ्ख्याका एव कीर्त्यन्ते इति चोचितम्। न तु सत्यां गतावुत्सर्गस्यापवादो युज्यते। असाधारणेनैकैकेन लक्षणेनैकैक आश्रमो वक्तुमुपक्रान्त इति तथैव समापनमुचितम्। न तु साधारणासाधारणाभ्यामुपक्रमसमाप्ती श्लिष्येते। न च तपो नाम नासाधारणं वानप्रस्थानामित्यत आह। "तपश्चासाधारणं" इति। न खलु पराकादिभिः कायक्लेशप्रधानो यथा वानप्रस्थस्तथा भिक्षुः सत्यप्यष्टग्रासादिनियमे। न च शौचसन्तोषशमदमादयस्तपःपक्षे वर्त्तन्ते तत्र वृद्धानां तपःप्रसिद्धेरसिद्धेः। अत एव वृद्धाः तपसो भेदेन शौचादीनाचक्षते। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति। सिद्धसङ्ख्याभेदेषु च सङ्ख्यान्तराभिधानमश्लिष्टमित्याह। "चतुष्ट्वे न च" इति। "अपि च व्यपदेशो च" इति। त्रय एत इति किं भिक्षुरपि परामृश्यते किंवा भिक्षुवर्जं त्रय एव न ता वत्त्रय इति भिक्षुसंग्रहे तद्वर्जनमिति त्रय इत्यत्र कर्तुं शक्यम्। एत इति प्रकृतानां साकल्येन परामर्शात् भिक्षुसंग्रहे च न तस्य पुण्यलोकत्वमब्रह्मसंस्थत्वाभावाद् भिक्षोः। तेन

तस्य ब्रह्मसंस्थस्य सदा पुण्यलोकत्वममृतत्वं चेति विरोधः। त्रिषु च ब्रह्मसंस्थपदे यदेति सम्बन्धनीयम्। भिक्षौ च सदेति वैषम्यम्। तदिदमुक्तम्। "पृथक्त्वे च" इति। पूर्वपक्षाभासं स्मारयति। "कथं पुनर्ब्रह्मसंस्थशब्दो योगात्" इति। तन्निराकरोति। "अत्रोच्यते" इति। अयमभिसन्धिः। सत्यं यौगिकः शब्दः सति प्रकृतसम्भवे न तदतिपत्याऽप्रकृते वर्त्तितुमर्हति। असति तु सम्भवे मा भूत्प्रमादपाठ इत्यप्रकृते वर्त्तयितव्यः। दर्शितश्चात्रासम्भवोऽधस्तादिति। एष हि ब्रह्मसंस्थतालक्षणो धर्मो भिक्षोरसाधारण आश्रमान्तराणि तत्संस्थान्यतत्संस्थानि च भिक्षुस्तत्संस्थ इत्येव, तत्संस्थता हि स्वभावं व्यवच्छिन्दन्ती विरोधाद् यस्तत्संस्थ एव तत्राश्रमी नान्यत्र। शमदमादिस्तु तदीय इति स्वाङ्गमव्यवधायकमित्यर्थः। ब्रह्मसंस्थत्वमसाधारणं परिव्राजकधर्मं श्रुतिरादर्शयतीत्याह। "तथा च न्यासब्रह्म" इति। सर्वसङ्गपरित्यागो हि न्यासः स ब्रह्म कुत इत्यत आह। "ब्रह्मा हि परः"। अतः परो न्यासो ब्रह्मेति किमपेक्ष्य परः संन्यास इत्यत आह। "तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्" इति। एतदुक्तं भवति। ब्रह्मपरतया सर्वैषणापरित्यागलक्षणो न्यासो ब्रह्मेति। तथा चेदृशं न्यासलक्षणं ब्रह्मसंस्थत्वं भिक्षोरेवासाधारणं नेतरेषामाश्रमिणाम्। ब्रह्मज्ञानस्य शब्दजनितस्य यः परीपाकः साक्षात्कारोऽपवर्गसाधनं तदङ्गतया पारिव्राज्यं विहितम्। न त्वनधिकृतं प्रतीत्यर्थः॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्॥ २१॥

यद्यत्र सन्निधान उपासनाविधिर्नास्ति ततः प्रदेशान्तरस्थितोऽपि विधिरव्यभिचरिततद्विधिसम्बन्धेनोद्गीथेनोपस्थापितः

स एष रसानां रसतम इत्यादिना पदसंदर्भेणैकवाक्यभावमुपगतः स्तूयते। नहि समभिव्याहृतैरेवैकवाक्यता भवतीति कश्चिन्नियमहेतुरस्ति। अनुषङ्गातिदेशलब्धैरपि विध्यसमभिव्याहृतैरर्थवादैरेकवाक्यताभ्युपगमात्। यदि तूद्गीथमुपासीत सामोपासीतेत्यादिविधिसमभिव्याहारः श्रुतस्तथापि तस्यैव विधेः स्तुतिः। न तूपासनविषयसमर्पणपर ओमित्येतदक्षरमुद्गीथमित्यनेनैवोपासनाविषयसमर्पणादिति प्राप्तेऽभिधीयते। न तावद् दूरस्थेन कर्मविधिवाक्येनैकवाक्यतासम्भवः। प्रतीतसमभिव्याहृतीनां विधिनैकवाक्यतया स्तुत्यर्थत्वमर्थवादानां रक्तपटन्यायेन भवति। न तु स्तुत्या विना काचिदनुपपत्तिर्विधेः। यथाहुः। अस्ति तु तदित्यतिरेके परिहार इति। अत एव विधेरपेक्षाभावात् प्रवर्त्तनात्मकस्यानुषङ्गातिदेशादिभिरर्थवादप्राप्त्यभिधानमसमञ्जसम्। न हि कर्वपेक्षितोपायतायामवगतायां प्राशस्त्यप्रत्ययस्यास्ति कश्चिदुपयोगः। तस्माद् दूरस्थस्य कर्मविधेः स्तुतावानर्थक्यम्। तेनैकवाक्यतानुपपत्तेः सन्निहितस्य तूपासनाविधेः किं विषयसमर्पणेनोपयुज्यतामुत स्तुत्येति विषये विषयसमर्पणेन यथार्थवत्त्वं नैवं स्तुत्या बहिरङ्गत्वात्। अगत्या हि सा। तस्मादुपासनार्था इति सिद्धम्।

कुर्य्यात् क्रियेव कर्त्तव्यं भवेत् स्यादिति पञ्चमम्।
एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम्॥

भावनायाः खलु कर्तृसमीहितानुकूलत्वं विधिर्निषेधश्च कर्तुरहितानुकूलत्वम्। यथाहुः। कर्त्तव्यश्च सुखफलोऽकर्त्तव्यो दुःखफल इति। एतच्चास्माभिरुपपादितं न्यायकणिकायाम्। क्रिया च भावना तद्वचनाश्च करोत्यादयः, यथाहुः कृभ्वस्तयः क्रियासामान्यवचना इति। अत एव कृभ्वस्तीनुदाहृतवान्

सामान्योक्तौ तद्विशेषाः पचेदित्यादयोऽपि गम्यन्त इति तत्र कुर्य्यादित्याक्षिप्तकर्तृका भावना। क्रियेतेति आक्षिप्तकर्मिका भावना। कर्त्तव्यमिति तु कर्मभूतद्रव्योपसर्जनभावना। एवं दण्डी भवेद्दक्षिना भवितव्यं दक्षिना भवेतेत्येकधात्वर्थविषया विध्युपहिता भावना उदाहार्य्याः। भवतिश्चैष जन्मनि। यथा कुलालव्यापाराद् घटो भवति वीजादङ्कुरो भवतीति प्रयुज्यते। न च वीजादङ्कुरोऽस्तीति प्रयुज्यते। तस्मादस्तिः सत्तायां न जन्मनीति॥

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ २३॥

यद्यपि उपनिषदाख्यानानि विद्यासन्निधौ श्रुतानि। तथापि सर्वाण्याख्यानानि पारिप्लव इति सर्वश्रुत्या निःशेषार्थतया दुर्बलस्य सन्निधेर्बाधितत्वात् पारिप्लवार्थान्येवाख्यानानि। न च सर्वा दाशतयीरनुब्रूयादिति विनियोगेऽपि दाशतयीनां प्रातिस्विकविनियोगात्तत्र तत्र कर्मणि यथा विनियोगो न विरुध्यते तथेहापि सत्यपि पारिप्लवे विनियोगो सन्निधानाद् विद्याङ्गत्वमपि भविष्यतीति वाच्यम्। दाशतयीषु प्रातिस्विकानां विनियोगानां समुदायविनियोगस्य च तुल्यबलत्वादिह तु सन्निधानात् श्रुतेर्बलीयस्त्वात्। तस्मात् पारिप्लवार्थान्येवाख्यानानीति प्राप्ते, उच्यते। नैषामाख्यानानां पारिप्लवे विनियोगः। किन्तु पारिप्लवमाचक्षीतेत्युपक्रम्य यान्याम्नातानि मनुर्वैवस्वतो राजेत्यादीनि तेषामेव तत्र विनियोगः तान्येव हि पारिप्लवेन विशेषितानि। इतरथा पारिप्लवे सर्वाण्याख्यानानीत्येतावतैव गतत्वात् पारिप्लवमाचक्षीतेत्यनर्थकं स्यात्। आख्यानविशेषकत्वे त्वर्थवत्। तस्माद्विशेषणानुरोधात् सर्वशब्दस्तदपेक्षो न त्वशेषवचनः। यथा सर्वे ब्राह्मणा भोज-

यितव्या इत्यत्र निमन्त्रितापेक्षः सर्वशब्दः। तथा चोपनिषदाख्यानानां विद्यासन्निधिरप्रतिद्वन्द्वी विध्येकवाक्यता सोऽरोदीदित्यादीनामिव विध्येकवाक्यत्वं गमयतीति सिद्धम्। प्रतिपत्तिसौकर्य्याच्चेत्युपाख्यानेन हि बाला अप्यवधीयन्ते। यथा तन्त्राख्यायिकयेति।

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

विद्यायाः क्रत्वर्थत्वे सति तया क्रतूपकरणाय स्वकार्य्याय क्रतुरपेक्षितः। तदभावे कस्योपकारो विद्ययेति। यदा तु पुरुषार्था तदा नानया क्रतुरपेक्षितः स्वकार्य्ये निरपेक्षाया एव तस्याः सामर्थ्यात्। अग्नीन्धनादिना चाश्रमकर्माण्युपलक्ष्यन्ते। यथाहुः। अग्नीन्धनादीन्याश्रमकर्माणि विद्यया स्वार्थसिद्धौ नापेक्षितव्यानीति। स्वार्थसिद्धौ नापेक्षितव्यानि न तु स्वसिद्धाविति। एतच्चाधिकमुपरिष्टाद्वक्ष्यते। "तद्विवक्षया च" इति। एतत् प्रयोजनं पूर्वतनस्याधिकरणस्योक्तम्। अधिकविवक्षयेति यदुक्तं तदधिकमाह।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

यथा स्वार्थसिद्धौ नापेक्ष्यन्ते आश्रमकर्माणि एवमुत्पत्तावपि नापेक्षेरन्निति शङ्का स्यात्। न च विविदिषन्ति यज्ञेनेत्यादिविरोधः। नह्येष विधिः, अपि तु वर्त्तमानापदेशः। स च स्तुत्याप्युपपद्यते। अपि च। चतस्रः प्रतिपत्तयः। ब्रह्मणि प्रथमा तावत् उपनिषद्वाक्यश्रवणमात्राद्भवति। यां किलाचक्षते श्रवणमिति। द्वितीया मीमांसासहिता तस्मादेवोपनिषद्वाक्याद्यामाचक्षते मननमिति। तृतीया चिन्ता सन्ततिमयी यामाचक्षते निदिध्यासनमिति। चतुर्थी साक्षात्कारवती वृत्तिरूपा नान्तरीयकं हि तस्याः कैवल्य-

मिति । तत्राद्ये तावत् प्रतिपत्ती विदितपदतदर्थस्य विदितवाक्यगतिगोचरन्यायस्य च पुंस उपपद्येते एवेति न तत्र कर्मापेक्षा । ते एव च चिन्तामयीं तृतीयां प्रतिपत्तिं प्रसुवाते इति न तत्रापि कर्मापेक्षा । सा चादरनैरन्तर्य्यदीर्घकालसेविता साक्षात्कारवतीमाधत्त एव प्रतिपत्तिं चतुर्थीमिति न तत्राप्यस्ति कर्मापेक्षा । तन्नान्तरीयकञ्च कैवल्यमिति न तस्यापि कर्मापेक्षा । तदेवं प्रमाणतश्च प्रमेयत उत्पत्तौ च कार्य्ये च न ज्ञानस्य कर्मापेक्षेति बीजं शङ्कायाम्, एवं प्राप्त उच्यते । उत्पत्तौ ज्ञानस्य कर्मापेक्षा विद्यते विविदिषोत्पादद्वारा विविदिषन्ति यज्ञेनेति श्रुतेः । न चेदं वर्त्तमानापदेशत्वात् स्तुतिमात्रमपूर्वत्वादर्थस्य यथा यस्य पर्णमयी जुहूर्भवतीति पर्णमयताविधिरपूर्वत्वात् न त्वयं वर्त्तमानापदेशः । अनुवादानुपपत्तेः । तस्मादुत्पत्तौ विद्यया शमादिवत् कर्माण्यपेक्ष्यन्ते । तत्राप्येवं विदिति विद्यास्वरूपसंयोगादन्तरङ्गाणि विद्योत्पादे शमादीनि बहिरङ्गानि कर्माणि विविदिषासंयोगात्तथा ह्याश्रमविहितनित्यकर्मानुष्ठानाद्धर्मसमुत्पादस्ततः पाप्मा विलीयते । स हि तत्त्वतोऽनित्याशुचिदुःखानात्मनि संसारे सति नित्यशुचिसुखादिलक्षणेन विभ्रमेण मलिनयति चित्तसत्त्वमधर्मनिबन्धनत्वाद् विभ्रमाणाम् । अतः पाप्मनः प्रक्षये प्रत्यक्षोपपत्तिद्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्य तात्त्विकीमनित्याशुचिदुःखरूपतामप्रत्यूहं विनिश्चिनोति । ततोऽस्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते । ततस्तज्जिहासाऽस्योपावर्त्तते । ततो हानोपायं पर्य्येषते पर्य्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इति शास्त्रादाचार्य्यवचनाच्चोपश्रुत्य तज्जिज्ञासत इति विविदिषोपहारमुखेनात्मज्ञानोत्पत्तावस्ति कर्मणामुपयोगः । विविदिषुः खलु युक्त

एकाग्रतया श्रवणमनने कर्त्तुमुत्सहते । ततोऽस्य तत्त्वमसीति वाक्यान्निर्विचिकित्सज्ञानमुत्पद्यते । न च निर्विचिकित्सं तत्त्वमसीति वाक्यार्थमवधारयतः कर्मण्यधिकारोऽस्ति । येन भावनायां वा भावनाकार्य्ये वा साक्षात्कारे कर्मणामुपयोगः । एतेन वृत्तिरूपसाक्षात्कारकार्य्येऽपवर्गे कर्मणामुपयोगो दूरनिरस्तो वेदितव्यः । तस्माद्यथैव शमदमादयो यावज्जीवमनुवर्त्तन्ते एवमाश्रमकर्मापीत्यसमीक्षिताभिधानम् । विदुषस्तत्रानधिकारादित्युक्तम् । दृष्टार्थेषु तु कर्मसु प्रतिषिद्धवर्जमनधिकारिणोऽपि प्रसक्तस्य स्वारसिकी प्रवृत्तिरुपपद्यत एव । न हि तत्रान्वयव्यतिरेकसमधिगमनीयफलेऽस्ति विध्यपेक्षा । अतश्च भ्रान्त्या चेल्लौकिकं कर्म वैदिकं च तथास्तु त इति प्रलापः । शमदमादीनां तु विद्योत्पादायोपात्तानामुपरिष्टादवस्थास्वाभाव्यादनपेक्षितानामप्यनुवृत्तिः । उपपादितं चैतदस्माभिः प्रथमसूत्र इति नेह पुनः प्रत्याय्यते । तस्माद्विविदिषोत्पादद्वाराश्रमकर्मणां विद्योत्पत्तावुपयोगो न विद्याकार्य्ये इति सिद्धम् । शेषमतिरोहितार्थम् ।

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

प्राणसंवादे सर्वेन्द्रियाणां श्रूयते । एष किल विचारविषयः सर्वाणि खलु वागादीन्यवजित्य प्राणो मुख्य उवाचैतानि किं मेऽन्नं भविष्यतीति तानि होचुः । यदिदं लोकेऽन्नमा च श्वभ्य आ च शकुनिभ्यः सर्वप्राणिनां यदन्नं तत्तवान्नमिति । तदनेन सन्दर्भेण प्राणस्य सर्वमन्नमिति अनुचिन्तनं विधायाह श्रुतिः । न ह वा एवंविधं किं च नानन्नं भवतीति । सर्वं प्राणस्यान्नमित्येवं विदितम् । किञ्च नानान्नं भवतीति । तत्र संशयः । किमेतत्सर्वान्नाभ्यनुज्ञानं शमादिवदेतद्विद्या-

ङ्गतया विधीयते । उत स्तुत्यर्थं सङ्कीर्त्त्यत इति । तत्र यद्यपि भवतीति वर्त्तमानापदेशान्न विधिः प्रतीयते । तथापि यथा यस्य पर्णमयी जुहूर्भवतीति वर्त्तमानापदेशादपि पलाशमयीत्वविधिप्रतिपत्तिः पञ्चमलकारापत्त्या । तथेहापि प्रवृत्तिविशेषकरतालाभे विधिप्रतिपत्तिः । स्तुतौ हि अर्थवादमात्रं न तथार्थवद्यथाविधौ । भक्ष्याभक्ष्यशास्त्रं च सामान्यतः प्रवृत्तमनेन विशेषशास्त्रेण बाध्यते । गम्यागम्यविवेकशास्त्रमिव सामान्यतः प्रवृत्तं वामदेवविद्याङ्गभूतसमस्तस्त्र्यपरिहारशास्त्रेण विशेषविषयेणेति प्राप्त उच्यते ।

अशक्तेः कल्पनीयत्वात् शास्त्रान्तरविरोधतः ।
प्राणस्यान्नमिदं सर्वमिति चिन्तनसंस्तवः ॥

न तावत् कौलेयकमर्य्यादमन्नं मनुष्यजातिना युगपत् पर्य्यायेण वा शक्यमत्तुम् । इभकरभकादीनामन्नस्य शमीकरीरकण्टकवटकाष्ठादेरेकस्यापि अशक्यादनत्वात् । न चात्र लिङ इव स्फुटतरा विधिप्रतिपत्तिरस्ति । न च कल्पनीयो विधिरपूर्वत्वाभावात् । स्तुत्यापि च तदुपपत्तेः । न च सत्यां गतौ सामान्यतः प्रवृत्तस्य शास्त्रस्य विषयसङ्कोचो युक्तः तस्मात्सर्वं प्राणस्यान्नमित्यनुचिन्तनविधानस्तुतिरिति साम्प्रतम् । शक्यत्वे च प्रवृत्तिविशेषकरतोपयुज्यते नाशक्यविधानत्वे प्राणात्यय इति चावधारणपरं प्राणात्यय एव सर्वान्नत्वम् । तत्रोपाख्यानाच्च । स्फुटतरविधिस्मृतेश्च । सुरावर्जं विद्वांसमविद्वांसं प्रतिविधानात् । न त्वन्यत्रेति । इभ्येन सास्तिःपकेन सामि खादितानर्द्धभक्षितान् स हि चाक्रायणो हस्तिपकोच्छिष्टान् कुल्माषान् भुञ्जानो हस्तिपकेनोक्तः । कुल्माषानिव मदुच्छिष्टमुदकं कस्मान्नानुपिबसीति । एवमुक्तस्तदुदकमुच्छिष्टदोषात् प्रत्याचचक्षे । कारणञ्चात्रोवाच ।

न वाऽजीविष्यं न जीविष्यामीतीमान् कुल्माषानखादम्। कामो म उदकपानमिति स्वातन्त्र्यं मे उदकपाने नदीकूपतडागप्रपादिषु यथाकामं प्राप्नोमीति नोच्छिष्टोदकाभावे प्राणात्यय इति तत्रोच्छिष्टभक्षणदोष इति मदचीहतेषु कुरुषु यावन्नश्यनाययया मुनिनिरपत्रप इभ्येन सामिजग्धान् खादयामास।

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

नित्यानित्याश्रमकर्माणि यावज्जीवश्रुतेर्नित्येहितोपायतयाऽवश्यं कर्त्तव्यानि। विविदिषन्तीति च विद्यासंयोगात्। विद्यायाश्चावश्यम्भावनियमाभावादनित्यता प्राप्नोति नित्यानित्यसंयोगश्चैकस्य न सम्भवति भवश्यानवश्यम्भभावयोरेकत्र विरोधात्। न च वाक्यभेदादास्तवो विरोधः शक्योऽपनेतुम्। तस्मादनध्यवसाय एवात्रेति प्राप्तम्। एतेनैकस्य तूभयत्वे संयोगपृथक्त्वमित्याक्षिप्तमेवं प्राप्तेऽभिधीयते।

सिद्धे हि स्याद्विरोधोऽयं न तु साध्ये कथञ्चन।
विध्यधीनात्मलाभेऽस्मिन् यथाविधि मता स्थितिः॥

सिद्धं हि वस्तु विरुद्धधर्मसंयोगेन बाध्यते। न तु साध्यरूपं यथा षोडशिन एकस्य ग्रहणाग्रहणे। ते हि विध्यधीनत्वाद् विकल्प्येते एव। न पुनः सिद्धे विकल्पसम्भवः। तदिहैकमेवाग्निहोत्राख्यं कर्म यावज्जीवश्रुतेर्निमित्तेन युज्यमानं नित्येहितोपात्तदुरितप्रचयप्रयोजनमवश्यकर्त्तव्यं विद्याङ्गतया च विद्यायाः कादाचित्कतयानवश्यम्भावेऽपि काम्यो वा नैमित्तिको वा नित्यमर्थं विकृत्य निविशेते इति न्यायादनित्याधिकारेष निविशमानमपि न नित्यमनित्ययति। तेनापि तत्सिद्धेरिति संयोगपृथक्त्वान्न नित्यानित्यसंयोगविरोध एकस्य

कार्य्यस्येति सिद्धम्। सहकारित्वञ्च कर्मणां न कार्य्ये विद्यायाः किं तूत्पत्तौ कोऽर्थो विद्यासहकारीण्यपि कर्माणीत्ययमर्थः। सत्सु कर्मसु विद्यैव स्वकार्य्ये व्याप्रियते। यथा सहैव दशभिः पुत्त्रैर्भारं वहति गर्दभीति सत्स्वेव दशपुत्त्रेषु सैव भारस्य वाहिकेति। "अविधिलक्षणत्वात्" इति। विहितं हि दर्शपौर्णमासाद्यङ्गैर्युज्यते न त्वविहितम्। ग्राहकग्रहणपूर्वकत्वादङ्गभावस्य विधेश्च ग्राहकत्वात्। अविहिते च तदनुपपत्तेः। चतसृणामपि च प्रतिपत्तीनां ब्रह्मणि विधानानुपपत्तेरित्युक्तं प्रथमसूत्रे। द्रष्टव्यो निदिध्यासितव्य इति च विधिसरूपं न विधिरित्यप्युक्तम्। उत्पत्तिं प्रति हेतुभावस्तु सत्त्वशुद्ध्या विविदिषोपजननद्वारेत्यधस्तादुपपादितम्। असाध्यत्वाच्च विद्याफलस्यापवर्गस्य स्वरूपावस्थानलक्षणो हि सः। न च स्वं रूपं ब्रह्मणः साध्यं नित्यत्वात्। शेषमतिरोहितार्थम्॥

सर्वथापि त एवोभयलिङ्गात्॥ ३४॥

यथा मासमग्निहोत्रं जुहोतीति प्रकरणान्तरात् कर्मभेद एवमिहापि 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इतिक्रतुप्रकरणमतिक्रम्य श्रवणात् प्रकरणान्तरात्तद्बुद्धिव्यवच्छेदे सति कर्मान्तरमिति प्राप्त उच्यते। सत्यपि प्रकरणान्तरे तदेव कर्म, श्रुतेः स्मृतेश्च संयोगभेदः परं यथाऽग्निहोत्रं जुहुयात् स्वर्गकामो यावज्जीवमग्निहोत्रं जुहुयादिति तदेवाग्निहोत्रमुभयसंयुक्तम्। नहि प्रकरणान्तरं साक्षाद्भेदकम्। किन्तु अज्ञातज्ञापनस्वरसो विधिः प्रकरणैक्ये स्फुटतरप्रत्यभिज्ञाबलेन स्वरसं जह्यात्। प्रकरणान्तरेण तु विघटितप्रत्यभिज्ञानः स्वरसमजहत् कर्म भिनत्ति। इह तु

सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुञ्जानो न जुहोतीत्यादिवदपूर्वमेषां रूपमुत्पादयितुमर्हति। न च तत्रापि नैयमिकाग्निहोत्रे मासविधिर्नापूर्वाग्निहोत्रोत्पत्तिरिति साम्प्रतम्। होम एव साक्षात् विधिश्रुतिः। कालस्य चानुपादेयस्याविधेयत्वात्। काले हि कर्म विधीयते न कर्मणि काल इत्युत्सर्गः। इह तु विविदिषायां विधिश्रुतिः न यज्ञादौ। तानि तु सिद्धान्येवानूद्यन्त इत्यैककर्म्यात् संयोगपृथक्त्वं सिद्धम्। स्मृतिरुक्ता लिङ्गदर्शनमुक्तम्॥

अन्तरा चापि तु तद्दृष्टेः॥ ३६॥

यदि विद्यासहकारीण्याश्रमकर्माणि हन्त भो विधुरादीनामनाश्रमिणामनधिकारो विद्यायाम्। अभावात्सहकारिणामाश्रमकर्मणामिति प्राप्त उच्यते। नात्यन्तमकर्माणोरैक्कविधुरवाचक्नवीप्रभृतयः। सन्ति हि तेषामनाश्रमित्वे जपोपवासदेवताराधनादीनि कर्माणि। कर्मणां च सहकारित्वमुक्तम्। आश्रमकर्मणामुपलक्षणत्वादिति न तेषामनधिकारो विद्यासु। "जन्मान्तरानुष्ठितैरपि च" इति। न खलु विद्याकार्य्ये कर्मणामपेक्षा। अपि तु उत्पादे उत्पादयन्ति च विविदिषोपहारेण कर्माणि विद्याम्। उत्पन्नविविदिषाणां पुरुषधौरेयाणां विदुरसंवर्त्तप्रभृतीनां कृतं कर्मभिः। यद्यपि चेह जन्मनि कर्माण्यननुष्ठितानि तथापि विविदिषातिशयदर्शनात् प्राचि भवेऽनुष्ठितानि तैरिति गम्यत इति। ननु यथाधीतवेद एव धर्मजिज्ञासायामधिक्रियते नानधीतवेद इह जन्मनि। तथेह जन्मन्याश्रमकर्मोत्पादितविविदिष एव विद्यायामधिकृतो नेतर इत्यनाश्रमिणामनधिकारो विधुरप्रभृतीनामित्यत आह। "दृष्टार्था च" इति। अविद्यानि-

वृत्तिर्विद्याया दृष्टोऽर्थः। स चान्वयव्यतिरेकसिद्धो न नियममपेक्षत इत्यर्थः। प्रतिषेधो विघातस्तस्याभाव इत्यर्थः। यद्यनाश्रमिणामप्यधिकारो विद्यायां कृतं तर्ह्याश्रमैरतिबहुलायासैरित्याशङ्क्याह॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च॥ ३९॥

स्वस्थेनाश्रमित्वमास्थेयम्। दैवात् पुनः पत्न्यादिवियोगतः सत्यनाश्रमित्वे भवेदधिकारो विद्यायामिति श्रुतिस्मृतिसन्दर्भेण विविदिषन्ति यज्ञेनेत्यादिना ज्यायस्त्वावगतेः श्रुतिलिङ्गात् स्मृतिलिङ्गाच्चावगम्यते। तेनेति पुण्यकृदिति श्रुतिलिङ्गम्, अनाश्रमी न तिष्ठेतेत्यादि च स्मृतिलिङ्गम्॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः॥ ४०॥

आरोहवत् प्रत्यवरोहोऽपि कदाचिदूर्ध्वरेतसां स्यादिति मन्दाशङ्कानिवारणार्थमिदमधिकरणम्। पूर्वधर्मेषु यागहोमादिषु रागतो वा गृहस्थोऽहं पत्न्यादिपरिहृतः स्यामिति नियमं व्याचष्टे "तथाह्यत्यन्तमात्मानम्" इति। अतद्रूपतामवरोहतुल्यताभावं, व्याचष्टे। "तथा च ब्रह्मचर्यं समाप्य" इति। अभावं शिष्टाचाराभावं, विभजते। "न चैवमाचाराः शिष्टाः" इति। अतिरोहितार्थमन्यत्॥

न चाधिकारिकमपि पतनानुमानात् तदयोगात्॥ ४१॥

प्रायश्चित्तं न पश्यामीति नैष्ठिकं प्रति प्रायश्चित्ताभावस्मरणात् नैर्ऋतगर्दभालम्भः प्रायश्चित्तमुपकुर्वाणकं प्रति। तस्माच्छिन्नशिरस इव पुंसः प्रतिक्रियाभाव इति पूर्वः पक्षः।

सूत्रयोजना तु। न चाधिकारिकमधिकारलक्षणे प्रथमकाण्डे निर्णीतम्। अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वादित्यनेन यत्प्रायश्चित्तं तन्न नैष्ठिके भवितुमर्हति। कुतः। आरूढो नैष्ठिकमिति स्मृत्या पतनश्रुत्यनुमानात् तत्प्रायश्चित्तायोगात्॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्॥ ४२॥

श्रुतिस्तावत् स्वरसतोऽसङ्कुचद्वृत्तिर्ब्रह्मचारिमात्रस्य नैष्ठिकस्योपकुर्वाणस्य चाविशेषेण प्रायश्चित्तमुपदिशति। साक्षात्प्रायश्चित्तं न पश्यामीति तु स्मृतिस्तस्यामपि च साक्षात्प्रायश्चित्तं न कर्त्तव्यमिति प्रायश्चित्तनिषेधो न गम्यते। न पश्यामीति तु दर्शनाभावेन सोऽनुमातव्यः। यथा च स्मृतिर्निषेधार्थेति अनुमाय तदर्था श्रुतिरनुमातव्या। श्रुतिस्तु सामान्यविषया विशेषमुपसर्पन्ती शीघ्रप्रवृत्तिरिति। स्मार्त्तं प्रायश्चित्तादर्शनन्तु यत्नगौरवार्थम्। एतदुक्तं भवति। कृतनिर्णजनैरपि एतैर्न सङ्ख्यानं कर्त्तव्यमिति। सूत्रार्थस्तूपपूर्वमपि पातकं नैष्ठिकस्यावकीर्णित्वं न महापातकमपिरिवकारार्थे अत एके प्रायश्चित्तभावमिच्छन्तीति। आचार्य्याणां विप्रतिपत्तौ विशेषाभावात्साम्यं भवेत्। शास्त्रस्था या वा प्रसिद्धिः सा ग्राह्या शास्त्रमूलत्वात्। उपपादितं च प्रायश्चित्तभावप्रसिद्धेः शास्त्रमूलत्वमिति। सुगममितरत्। यदि नैष्ठिकादीनामस्ति प्रायश्चित्तं तत्किमेतैः कृतनिर्णजनैः संव्यवहर्त्तव्यमुत नेति। तत्र दोषकृतत्वादसंव्यवहारस्य प्रायश्चित्तेन तन्निवर्हणात् अनिवर्हणे वा तत्करणवैयर्थ्यात्संव्यवहार्य्या एवेति प्राप्त उच्यते॥

बहिस्तूभयथापि स्मृतेराचाराच्च॥ ४३॥

निषिद्धकर्मानुष्ठानजन्यमेनो लोकद्वयेऽप्यशुद्धिमापादयति द्वेधम् । कस्यचिदेनसो लोकद्वयेऽपि अशुद्धिरपनीयते प्रायश्चित्तैरेनोनिबर्हणं कुर्वाणैः कस्यचित्तु परलोकाशुद्धिमात्रमपनीयते प्रायश्चित्तैरेनोनिबर्हणं कुर्वाणैरिहलोकाशुद्धिस्त्वेनसापादिता न शक्यापनेतुम् । यथा स्त्रीबालादिघातिनाम् । यथाहुः । विशुद्धानपि धर्मतो न संपिबेदिति । यथा च, प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतः कृतमपि बालघ्नादिस्तु कृतनिर्णेजनोऽपि वचनादव्यवहार्य्य इह लोके जायत इति वचनच्च बालघ्नांश्चेत्यादि । तस्मात्सर्वमवदातम् ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

प्रथमे काण्डे शेषलक्षणे तथाकाम इत्यत्रार्त्विक्सम्बन्धे कर्मणः सिद्धे किंकामो यजमान उतार्त्विज्य इति संशय्यार्त्विज्येऽपि कर्मणि याजमान एव कामो गुणफलेष्विति निर्णीतमिह त्वेवंजातीयकानि चाङ्गसम्बद्धानि उपासनानि किं याजमानान्येवोतार्त्विज्यानीति विचार्य्यत इति न पुनरुक्तम् । तत्रोपासकानां फलश्रवणादनधिकारिणस्तदनुपपत्तेर्यजमानस्य च कर्मजनितफलोपभोगभाजोऽधिकारादृत्विजां च तदनुपपत्तेर्वचनाच्च राजाशास्यानीयात् क्वचिदृत्विजां फलश्रुतेरसति वचने यजमानस्य फलवदुपासनं तस्य फलश्रुतेः तं ह बको दाल्भ्यो विदाञ्चकारेत्यादेरुपासनस्य च सिद्धविषयतया न्यायापवादसामर्थ्याभावाद् याजमानमेवोपासनाकर्मेति प्राप्त उच्यते ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

उपाख्यानात्तावद् उपासनमौद्गात्रमवगम्यते । तद्बलवति

सति बाधकेऽन्यथोपपादनीयम्। न चर्त्विक्कर्त्तृक उपासने यजमानगामिता फलस्यासम्भविनी तेन हि स परिक्रीतस्तद्गामिने फलाय घटते। तस्मान्न व्यसनितामात्रेणोपाख्यानमन्यथयितुं युक्तमिति राद्धान्तः॥

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य निश्चयेन लब्ध्वा बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यञ्च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति। यत्र हि विधिविभक्तिः श्रूयते स विधेयो बाल्येन तिष्ठासेदित्यत्र च सा श्रूयते न श्रूयते तु मौने। तस्माद्यथाथ ब्राह्मण इत्येतदश्रूयमाणविधिकमविधेयमेवं मौनमपि न चापूर्वत्वाद् विधेयं तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्येति पाण्डित्यविधानादेव मौनसिद्धेः पाण्डित्यमेव मौनमिति। अथवा भिक्षुवचनोऽयं मुनिशब्दस्तत्र दर्शनात्। गार्हस्थ्यमाचार्य्यकुलं मौनवानप्रस्थमित्यत्र तस्यान्यतो विहितस्यायमनुवादः। तस्माद्बाल्यमेवात्र विधीयते। मौनन्तु प्राप्तं प्रशंसार्थमनूद्यत इति युक्तं भवेदेवं यदि पण्डितपर्य्यायो मुनिशब्दो भवेदपि तु ज्ञानमात्रं पाण्डित्यं ज्ञानातिशयसम्पत्तिस्तु मौनम्। तत्रैव तत्प्रसिद्धेराश्रमभेदे तु तत्प्रवृत्तिर्गार्हस्थ्यादिपदसन्निधानात्तस्मादपूर्वत्वान्मौनस्य बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते। एवं च निर्वेदनीयत्वमपि विधान आञ्जसं स्यात् इत्याह। "निर्वेदनीयत्वनिर्देशात्" इति। कस्येदं मौनं विधीयते विद्यासहकारितयेत्यत आह। "तद्वतः" विद्यावतः सन्न्यासिनो भिक्षोः। पृच्छति। "कथम्" इति विद्यावत्ता प्रतीयते न सन्न्यासितेत्यर्थः। उत्तरं तदधिकारात्। भिक्षोस्तदधिकारात् तद्दर्शयति। "आत्मानं विदित्वा" इति। सूत्रावयवं योजयितुं शङ्कते। "ननु" इति। परिहरति।

"अत आह । पक्षेणेति" । विद्यावानिति न विद्यातिशयो विवक्षितोऽपि तु विद्योदयाभ्यासे प्रवृत्तो न पुनरुत्पन्नविद्यातिशयस्तथा चास्य पक्षे कदाचिद्भेददर्शनात्सम्भव इत्यर्थः । विध्यादिवद्विधिमुख्यः प्रधानमिति यावत् । अत एव समिदादिविध्यन्तः स हि विधिः प्रधानविधेः पश्चादिति । तथाश्रूयमाणविधित्वेऽपूर्वत्वाद्विधिराश्रेय इत्यर्थः । ननु यद्ययमाश्रमो बाल्यप्रधानः कस्मात् पुनर्गार्हस्थ्येनोपसंहरतीति चोदयति । "एवं बाल्यादिविशिष्ट" इति । उत्तरं पठति ।

कृत्स्नभावात् तु गृहिणोपसंहारः ॥ ४८ ॥

छान्दोग्ये बहुलायाससाध्यकर्मबहुलत्वाद् गार्हस्थ्यस्य चाश्रमान्तरधर्माणाञ्च केषाञ्चिदहिंसादीनां समवायात् तेनोपसंहारो न पुनस्तेन समापनादित्यर्थः । एवं तदाश्रमद्वयोपन्यासेन क्वचित् कदाचिदितराभावशङ्का मन्दबुद्धेः स्यादिति तदपाकरणार्थं सूत्रम् ॥

मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥

वृत्तिर्वानप्रस्थानामनेकविधैरेवं ब्रह्मचारिणोऽपीति वृत्तिभेदोऽनुष्ठातारो वा पुरुषा भिद्यन्ते । तस्माद् द्वित्वेऽपि बहुवचनमविरुद्धम् ॥

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥

बाल्येनेति यावद्बालचरितश्रुतेः कामचारवादभक्षतायाश्चात्यन्तबाल्येन प्रसिद्धेः शौचादिनियमविधायिनश्च सामान्यशास्त्रस्यानेन विशेषशास्त्रेण बाधनात्सकलबालचरितविधानमिति प्राप्तेऽभिधीयते । विद्याङ्गत्वेन बाल्यविधानात् समस्तबालचर्य्यायां च प्रधानविरोधप्रसङ्गाद्यत्तदनुगुणमप्रौढेन्द्रियत्वादि भावशुद्धिरूपं तदेव विधीयते । एवं च शास्त्रान्त-

राबाधेनाप्युपपत्तौ न शास्त्रान्तरबाधनमन्याय्यं भविष्यतीति॥

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्॥ ५१॥

सङ्गतिमाह। "सर्वापेक्षा च" इति। किं श्रवणादिभिरिहैव वा जन्मनि विद्या साध्यते उतानियम इह वामुत्र वेति। यद्यपि कर्माणि यज्ञादीन्यनियतफलानि तेषां च विद्योत्पादसाधनत्वेन विद्योत्पादस्यानियमः प्रतिभाति। तथा च गर्भस्थस्य वामदेवस्यात्मप्रतिबोधश्रवणात्। अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति च स्मरणात् आमुष्मिकत्वमप्यवगम्यते। तथापि यज्ञादीनां प्रमेयाणामप्रमाणत्वाच्छ्रवणादेश्च प्रमाणत्वात्तेषामेव साक्षाद्विद्यासाधनत्वम्। यज्ञादीनां सत्त्वशुद्धप्राधानेन वा विद्योत्पादकश्रवणादिलक्षणप्रमाणप्रवृत्तिविघ्नोपशमेन वा विद्यासाधनत्वम्। श्रवणादीनां त्वनपेक्षाणामेव विद्योत्पादकत्वम्। न च प्रमाणेषु प्रवर्त्तमानाः प्रमातार ऐहिकमपि चिरभाविनं प्रमोत्पादं कामयन्ते किन्तु तादात्विकमेव प्रागेव तु पारलौकिकम्। नहि कुम्भदिदृक्षुश्चक्षुषी समुन्मीलयति कालान्तरीयाय कुम्भदर्शनाय किन्तु तादात्विकाय। तस्मादैहिकमेव विद्योत्पादो नानियतकालः। श्रुतिस्मृती च पारलौकिकं विद्योत्पादं स्तुत्या ब्रूते। इत्यम्भूतानि नामश्रवणादीन्यावश्यकफलानि यत्कालान्तरेऽपि विद्यामुत्पादयन्तीति। एवं प्राप्त उच्यते। यत एवात्र विद्योत्पादे श्रवणादिभिः कर्त्तव्ये यज्ञादीनां सत्त्वशुद्धिद्वारेण वा विघ्नोपशमद्वारा वोपयोगोऽत एव तेषां यज्ञादीनां कर्मान्तरप्रतिबध्यप्रतिबन्धाभ्यामनियतफलत्वेन तदपेक्षाणां श्रवणादीनामप्यनियतफलत्वं न्याय्यमनपहत-

विघ्नानां श्रवणादीनामनुत्पादकत्वादविशुद्धसत्त्वाद्वा पुंसः प्रत्यनुत्पादकत्वात्। तथा च तेषां यज्ञाद्यपेक्षाणां तेषां चानियतफलत्वेन श्रवणादीनामप्यनियतफलत्वं युक्तमेवं श्रुतिस्मृतिप्रतिबन्धो न स्तुतिमात्रत्वेन व्याख्येयो भविष्यति। पुरुषाश्च विद्यार्थिनः साधनसामर्थ्यानुसारेण तदनुरूपमेव कामयिष्यन्ते तदिदमुक्तमभिसन्धेर्निरङ्कुशत्वादिति ॥

एवं मुक्तिफलानियमस्तदवस्थावधृते-स्तदवस्थावधृतेः ॥ ५२ ॥

यज्ञाद्युपकृतविद्यासाधनश्रवणादिवीर्य्यविशेषात्किल तत्फले विद्यायामैहिकामुष्मिकत्वलक्षण उत्कर्षो दर्शितः। तथा च यथा साधनोत्कर्षनिकर्षाभ्यां तत्फलस्य विद्याया उत्कर्षनिकर्षावेवं विद्याफलस्यापि मुक्तेरुत्कर्षनिकर्षौ सम्भाव्येते। न च मुक्तावैहिकामुष्मिकत्वलक्षणो विशेष उपपद्यते ब्रह्मोपासनापरिपाकलब्धजन्मनि विद्यायां जीवतो मुक्तेरवश्यम्भावनियमात् सत्यप्यारब्धविपाककर्माप्रचये। तस्मान्मुक्तावेव रूपतो निकर्षापकर्षौ स्याताम्। अपि च। सगुणानां विद्यानामुत्कर्षनिकर्षाभ्यां तत्फलानामुत्कर्षनिकर्षौ दृष्टाविति मुक्तेरपि विद्याफलत्वाद्रूपतश्चोत्कर्षनिकर्षौ स्यातामिति प्राप्त उच्यते। मुक्तेस्तत्र तत्रैकरूप्यश्रुतेरुपपत्तेश्च। साध्यं हि साधनविशेषाद्विशेषवद् भवति। न च मुक्तिर्ब्रह्मणो नित्यस्वरूपावस्थानलक्षणा नित्या सती साध्या भवितुमर्हति। न च सवासननिःशेषक्लेशकर्माशयप्रचयो विद्याजन्म विशेषवान् येन तद्विशेषान्मोक्षो विशेषवान् भवेत्। न च सावशेषः क्लेशादिप्रचयो मोक्षाय कल्पते। न च चिराचिरोत्पादानुत्पादावन्तरेण विद्यायामपि रूपतो भेदः

कश्चिदुपलक्ष्यते तस्या अप्येकरूपत्वेन श्रुतेः। सगुणायास्तु विद्यायास्तत्तद्गुणावापोद्वापाभ्यां तत्कार्य्यस्य फलस्योत्कर्षनिकर्षौ युज्येते। न चात्र विद्यात्वं सामान्यतो दृष्टं भवति। आगमतत्प्रभवयुक्तिबाधितत्वेन कालात्ययापदिष्टत्वात्। तस्मात्तस्या मुक्त्यवस्थाया ऐकरूप्यावधृतेर्मुक्तिलक्षणस्य फलस्याविशेषो युक्त इति॥

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां तृतीयाध्यायस्य चतुर्थः पादः॥

अध्यायश्च समाप्तः॥

——

चतुर्थोऽध्यायः।

माभ्यर्थ्या इह सन्तः स्वयं प्रवृत्ता न चेतरे शक्याः।
मत्सरपित्तनिबन्धनमचिकित्स्यमरोचकं येषाम्॥
शङ्के सम्प्रति निर्विशङ्कमधुना स्वाराज्यसौख्यं वहन्निन्द्रः सान्द्रतपःस्थितेषु कथमप्युद्वेगमभ्येष्यति।
यद्वाचस्पतिमिश्रनिर्मितमितव्याख्यानमात्रस्फुटवेदान्तार्थविवेकवञ्चितभवाः स्वर्गेऽप्यमी निस्पृहाः॥

आवृत्तिरसकृदुपदेशात्॥ १॥

साधनानुष्ठानपूर्वकत्वात् फलसिद्धेर्विषयक्रमेण विषयिणोरपि तद्विचारयोः क्रममाह। "तृतीयेऽध्याये" इति। मुक्तिलक्षणस्य फलस्यात्यन्तपरोक्षत्वात् तदर्थानि दर्शनश्रवणमनननिदिध्यासनानि चोद्यमानान्यदृष्टार्थानीति यावद्विधानमनुष्ठेयानि न तु ततोऽधिकमावर्त्तनीयानि प्रमाणाभावात्। यत्र पुनः सकृदुपदेशादुपासीतेत्यादिषु तत्र सकृदेव प्रयोगः प्रयाजादिवदिति प्राप्त उच्यते। यद्यपि मुक्तिरदृष्टचरी तथापि

सवासनाविद्योच्छेदेनात्मनः स्वरूपावस्थानलक्षणायास्तस्याः श्रुतिसिद्धत्वात् अविद्यायाश्च विद्योत्पादविरोधितया विद्योत्पादेन समुच्छेदस्याहिविभ्रमस्येव रज्जुतत्त्वसाक्षात्कारेण समुच्छेदस्योपपत्तिसिद्धत्वात् अन्वयव्यतिरेकाभ्यां च श्रवणमननिदिध्यासनाभ्यासस्यैव स्वगोचरसाक्षात्कारफलत्वेन लोकसिद्धत्वात्सकलदुःख-विनिर्मुक्तैक-चैतन्यात्मकोऽहमित्यपरोक्षरूपानुभवस्यापि श्रवणाद्यभ्याससाधनत्वेनानुमानात्तदर्थानि श्रवणादीनि दृष्टार्थानि भवन्ति। न च दृष्टार्थत्वे सत्यदृष्टार्थत्वं युक्तम्। न चैतान्यनुवृत्तानि सत्कारदीर्घकालनैरन्तर्य्येण साक्षात्कारवते तादृशानुभवाय कल्पन्ते। न चात्मसाक्षात्कारवद्विज्ञानं साक्षात्कारवतीमविद्यामुच्छेत्तुमर्हति। न खलु पित्तोपहतेन्द्रियस्य गुडे तिक्ततासाक्षात्कारोऽन्तरेण माधुर्य्यसाक्षात्कारं सहस्रेणाप्युपपत्तिभिर्निवर्त्तितुमर्हति। अतइतो नरान्तरवचांसि वोपपत्तिसहस्राणि वा परामृशतोऽपि थूत्कृत्य गुडत्यागात्। तदेवं दृष्टार्थत्वाद्ध्यानोपासनयोश्चान्तर्नीतावृत्तिकत्वेन लोकतः प्रतीतेरावृत्तिरेवेति सिद्धम्। अधिकरणार्थमुक्त्वा निरुपाधिब्रह्मविषयत्वमस्याक्षिपति। "अत्राह भवतु नाम" इति। साध्ये ह्यनुभवे प्रत्ययावृत्तिरर्थवती नासाध्ये, नहि ब्रह्मानुभवो ब्रह्मसाक्षात्कारो नित्यशुद्धस्वभावाद् ब्रह्मणोऽतिरिच्यते। तथा च नित्यस्य ब्रह्मणः स्वभावो नित्य एवेति कृतमत्र प्रत्ययावृत्त्या। तदिदमुक्तम् "आत्मभूतम्" इति। आक्षेप्तारं प्रति शङ्कते। "सकृच्छ्रुतौ" इति। अयमभिसन्धिः। न ब्रह्मात्मभूतस्तत्साक्षात्कारोऽविद्यामुच्छिनत्ति तया सहानुवृत्तेरविरोधात्। विरोधे वा तस्य नित्यत्वान्नाविद्योदीयेत कुत एव तु तेन सहानुवर्त्तेत। तस्मात्तन्निवृत्तये आगन्तुकस्तत्साक्षात्कार एषितव्यः। तथा च प्रत्य-

यानुवृत्तिरर्थवती। आक्षेप्ता सर्वपूर्वोक्ताक्षेपेण प्रत्यवतिष्ठते। "नावृत्तावपि" इति। न खलु ज्योतिष्टोमवाक्यार्थ प्रत्ययः शतशोऽप्यावर्त्तमानः साक्षात्कारप्रमाणं स्वविषये जनयति। उत्पन्नस्यापि तादृशो दृष्टव्यभिचारत्वेन प्रातिभत्वात्। ब्रह्मात्मत्वप्रतीतिं ब्रह्मात्मसाक्षात्कारम्। पुनः शङ्कते। "न केवलं वाक्यम्" इति। आक्षेप्ता दूषयति। "तथाप्यावृत्त्यानर्थक्यम्" इति। वाक्यं चेद् युक्त्यपेक्षं साक्षात्काराय प्रभवति। तथा सति कृतमावृत्त्या। सकृत्प्रवृत्तस्यैव तस्य सोपपत्तिकस्य यावत्कर्त्तव्यकरणादिति। पुनः शङ्कते। "अथापि स्यात्" इति। न युक्तिवाक्ये साक्षात्कारफले प्रत्यक्षस्यैव प्रमाणस्य तत्फलत्वात्। ते तु परोक्षार्थावगाहिनी सामान्यमात्रमभिनिविशेते न तु विशेषं साक्षात् कुरुत इति तद्विशेषसाक्षात्कारायावृत्तिरुपास्यते। सा हि सत्कारदीर्घकालनैरन्तर्य्यसेविता सती दृढभूमिर्विशेषसाक्षात्काराय प्रभवति कामिनीभावनेव स्त्रैणस्य पुंस इति। आक्षेप्ताह। "नासकृदपि" इति। स खल्वयं साक्षात्कारः शास्त्रयुक्तियोनिर्वा स्याद्भावनामात्रयोनिर्वा। न तावत् परोक्षाभासविज्ञानफले शास्त्रयुक्ती साक्षात्कारलक्षणं प्रत्यक्षप्रमाणफलं प्रसोतुमर्हतः। न खलु कुटजबीजाद्वटाङ्कुरो जायते न च भावना प्रकर्षपर्य्यन्तजमपरोक्षावभासमपि ज्ञानं प्रमाणं व्यभिचारादित्युक्तम्। आक्षेप्ता स्वपक्षमुपसंहरति। "तस्माद्यदि" इति। आक्षेप्ता आक्षेपान्तरमाह। न च सकृत् प्रवृत्त इति। कश्चित् खलु शुद्धसत्त्वो गर्भस्थ इव वामदेवः श्रुत्वा च मत्वा च क्षणमवधाय जीवात्मनो ब्रह्मात्मतामनुभवति। ततोऽप्यावृत्तिरनर्थिकेति। अतश्चावृत्तिरनर्थिका यच्चिरंशस्य ग्रहणमग्रहणं वा न तु व्यक्ताव्यक्तत्वे सामान्यविशेषवत् पद्मरागादि-

वदित्यत आह। "अपि चानेकांश" इति। समाधत्ते। "अत्रो-च्यते भवेदावृत्त्यानर्थक्यम्" इति। अयमभिसन्धिः। सत्यं न ब्रह्मसाक्षात्कारः साक्षादागमयुक्तिफलमपि तु युक्त्याग-मार्थज्ञानाहितसंस्कारसचिवं चित्तमेव ब्रह्मणि साक्षात्कार-वतीं बुद्धिवृत्तिं समाधत्ते। सा च नानुमानितवह्निसा-क्षात्कारवत्प्रातिभत्वेनाप्रमाणं यदानीं वह्निस्वलक्षणस्य परो-क्षत्वात्तदातनन्तु ब्रह्मस्वरूपस्योपाधिकलुषितस्य जीवस्यापरो-क्षत्वम्। नहि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते। जीव एव तु तत्तदुपाधिरहितः शुद्धादिस्वभावो ब्रह्मेति गम्यते। न च तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते। तस्मा-द्यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवेन श्रोत्रेण षड्जादिस्वरग्राममूर्च्छनाभेदमध्यक्षेणेक्षते एवं वेदान्तार्थ-ज्ञानाहितसंस्कारो जीवस्य ब्रह्मस्वभावमन्तःकरणेनेति। "यस्तत्त्वमसीति सकृदुक्तमेव" इति। श्रुत्वा मत्वा क्षणमव-धाय प्राग्भवीयाभ्यासजातसंस्कारादित्यर्थः। "यस्तु न शक्नोति" इति। प्राग्भवीयब्रह्माभ्यासरहित इत्यर्थः। "नहि दृष्टेऽनु-पपन्नं नाम" इति। यत्र परोक्षप्रतिभासिनि वाक्यार्थेऽपि व्यक्ताव्यक्तत्वतारतम्यम्। तत्र मननोत्तरकालमाभ्यासनाभ्या-सनिकर्षप्रकर्षक्रमजन्मनि प्रत्ययप्रवाहे साक्षात्कारावधौ व्यक्ति-तारतम्यं प्रति कैव कथेति भावः। तदेवं वाक्यमात्रस्या-र्थेऽपि न द्रागित्येव प्रत्यय इत्युक्तम्। तत्त्वमसीति तु वाक्यम-त्यन्तदुर्ग्रहपदार्थं न पदार्थज्ञानपूर्वके स्वार्थे ज्ञाने द्रागि-त्येव प्रवर्त्तते। किन्तु विलम्बिततमपदार्थज्ञानमतिविल-म्बेनेत्याह। "अपि च तत्त्वमसीत्येतद्वाक्यं त्वम्पदार्थस्य" इति। स्यादेतत्। पदार्थसंसर्गात्मा वाक्यार्थः पदार्थज्ञान-क्रमेण तदधीननिरूपणीयतया क्रमवत्प्रतीतिर्युज्यते। ब्रह्म

तु निरंशत्वेनासंसृष्टनानात्वपदार्थकमिति कस्मात्क्रमेण क्रमवती प्रतीतिरिति सकृदेव तद्गृह्येत न वा गृह्येतेत्युक्तमित्यत आह। "यद्यपि च प्रतिपत्तव्य आत्मा निरंशः" इति। निरंशोऽप्ययमपरोक्षोऽप्यात्मा तत्तद्देहाद्यारोपव्युदासाभ्यासंभवानिवात्यन्तपरोक्ष इव। ततश्च वाक्यार्थतया क्रमवत्प्रत्यय उपपद्यते। तत् किमियमेव वाक्यजनिता प्रतीतिरात्मनि तथा च न साक्षात्प्रतीतिरात्मन्यनागतफलत्वादस्या इत्यत आह। "तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः साक्षात्कारवत्याः"। एतदुक्तं भवति। वाक्यार्थश्रवणमननोत्तरकाला विशेषणत्रयवती भावना ब्रह्मसाक्षात्काराय कल्पत इति वाक्यार्थप्रतीतिः साक्षात्कारस्य पूर्वरूपमिति। शङ्कते। "सत्यमेवम्" इति। समारोपो हि तत्त्वप्रत्ययेनापोद्यते न तत्त्वप्रत्ययः। दुःखित्वादिप्रत्ययश्चात्मनि सर्वेषां सर्वदोत्पद्यत इत्यबाधितत्वात्समीचीन इति बलवान्नशक्योऽपनेतुमित्यर्थः। निराकरोति। "न देहाद्यभिमानवत्" इति। नहि सर्वेषां सर्वदोत्पद्यत इत्येतावता तात्त्विकत्वम्। देहात्माभिमानस्यापि सत्यत्वप्रसङ्गात्सोऽपि सर्वेषां सर्वदोत्पद्यते। उक्तं चास्य तत्र तत्रोपपत्त्या बाधनमेवं दुःखित्वाद्यभिमानोऽपि। तथा नहि नित्यशुद्धबुद्धस्वभावस्यात्मन उपजनापायधर्माणो दुःखशोकादय आत्मनो भवितुमर्हन्ति। नापि धर्मास्तेषां ततोऽत्यन्तभिन्नानां तद्धर्मत्वानुपपत्तेः। नहि गौरश्वस्य धर्मः सम्बन्धस्यापि व्यतिरेकाव्यतिरेकाभ्यां सम्बन्धासम्बन्धाभ्यां च विचारासहत्वात्। भेदाभेदयोश्च परस्परविरोधेनैकत्रासम्भवादिति। सर्वमेतदुपपादितं द्वितीयाध्याये। तदिदमुक्तं "देहादिवदेव चैतन्याद्बहिरुपलभ्यमानत्वात्" इति। इतश्च दुःखित्वादीनां न तादात्म्यमित्याह। "सुषुप्तादिषु च" इति।

स्यादेतत् । कस्मादनुभवार्थ एवावृत्त्यभ्युपगमो यावता द्रष्टव्यः श्रोतव्य इत्यादिभिस्तत्त्वमसिवाक्यविषयादन्यविषयैवावृत्तिर्विधास्यत इत्यत आह । "तत्रापि न तत्त्वमसिवाक्यार्थात्" इति । आत्मा वा अरे द्रष्टव्य इत्याद्यात्मविषयं दर्शनं विधीयते । न च तत्त्वमसिवाक्यविषयादन्यदात्मदर्शनमाम्नातं येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थः । सदेव सौम्येदमिति चोपक्रम्य तत्त्वमसीत्युपसंहृत इति स एव वाक्यार्थः । तदितःप्रच्याव्यावृत्तिमन्यत्र विदधानः प्रधानमङ्गेन विहन्ति वरो हि कर्मणाभिप्रेयमाणत्वात् सम्प्रदानं प्रधानम् । तमुद्वाहेन कर्मणाङ्गेन न विघ्नन्तीति । ननु विधिप्रधानत्वाद्वाक्यस्य न भूतार्थप्रधानत्वं भूतस्त्वर्थस्तदङ्गतया प्रत्याय्यते । यथाहुः । चोदना हि भूतं भवन्तमित्यादि शावरं वाक्यं व्याचचाणाः । कार्य्यमर्थमवगमयन्ती चोदना तच्छेषतया भूतादिकमवगमयतीत्याशङ्क्याह । "नियुक्तस्य चास्मिन्नधिकृतोऽहम्"-इति । यथा तावद्भूतार्थपर्य्यवसिता वेदान्ता न कार्य्यविधिनिष्ठास्तथोपपादितं तत्तु समन्वयादित्यत्र प्रत्युत विधिनिष्ठत्वे मुक्तिविरुद्धप्रत्ययोत्पादान्मुक्तिविहन्तृत्वमेवास्येत्यभ्युच्चयमात्रमत्रोक्तमिति ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

यद्यपि तत्त्वमसीत्याद्याः श्रुतयः संसारिणः परमात्मभावं प्रतिपादयन्ति तथापि तयोरपहतपाप्मत्वानपहतपाप्मत्वादिलक्षणविरुद्धधर्मसंसर्गेण नानात्वस्य विनिश्चयात् श्रुतेश्च तत्त्वमसीत्याद्याया मनो ब्रह्म आदित्यो ब्रह्मेत्यादिवत्प्रतीकोपदेशपरतयाप्युपपत्तेः प्रतीकोपदेश एवायम् । न च यथा समारोपितं सर्पत्वमनूद्य रज्जुत्वं पुरोवर्त्तिनो द्रव्यस्य विधी-

यत एवं प्रकाशात्मनो जीवभावमनूद्य परमात्मत्वं विधीयत इति युक्तम्। युक्तं हि पुरोवर्त्तिनि द्रव्ये द्राघीयसि सामान्यरूपेणालोचिते विशेषरूपेणागृहीते विशेषान्तरसमारोपणमिह तु प्रकाशात्मनो निर्विशेषसामान्यस्यापराधीनप्रकाशस्य नागृहीतमस्ति किञ्चिद्रूपमिति कस्य विशेषस्याग्रहे किं विशेषान्तरं समारोप्यताम्। तस्माद्ब्रह्मणो जीवभावारोपासम्भवाज्जीवो जीवो ब्रह्म च ब्रह्मेति तत्त्वमसीति प्रतीकोपदेश एवेति प्राप्तम्, एवं प्राप्तेऽभिधीयते। श्वेतकेतोरात्मैव परमेश्वरः प्रतिपत्तव्यो न तु श्वेतकेतोर्व्यतिरिक्तः परमेश्वरः। भेदे हि गौणत्वापत्तिर्न च मुख्यसम्भवे गौणत्वं युक्तम्। अपि च प्रतीकोपदेशे सकृद्वचनं तु प्रतीयते भेददर्शननिन्दा च। अभ्यासे हि भूयस्त्वमर्थस्य भवति, नाल्पत्वमतिदवीय एवोपचरितत्वम्। तस्मात्पौर्वापर्य्यालोचनया श्रुतेस्तावज्जीवस्य परमात्मता वास्तवीत्येतत्परता लक्ष्यते। न च मानान्तरविरोधादत्राप्रामाण्यं श्रुतेः। न च मानान्तराविरोध इत्यादि तु सर्वमुपपादितं प्रथमेऽध्याये। निरंशस्यापि चानाद्यनिर्वाच्याविद्यातद्वासनासमारोपितविविधप्रपञ्चात्मनः सांशस्येव कस्यचिदंशस्याग्रहणाद्विभ्रम इव परमार्थस्तु न विभ्रमो नाम कश्चिन्न च संसारो नाम किन्तु सर्वमेतत्सर्वानुपपत्तिभाजनत्वेनानिर्वचनीयमिति युक्तमुत्पश्यामः। तदनेनाभिसन्धिनोक्तम्। "यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रतिबोधः" इति। अन्येऽप्याहुः।

यद्यद्वैतेन तोषोऽस्ति युक्त एवासि सर्वदेति।

अतिरोहितार्थमन्यदिति॥

न प्रतीकेन हि सः॥ ४॥

यथा हि शास्त्रोक्तं शुद्धमुक्तस्वभावं ब्रह्मात्मत्वेनैव जीवेनोपास्यतेऽहं ब्रह्मास्मि तत्त्वमसि श्वेतकेतो इत्यादिषु तत् कस्य हेतोर्जीवात्मनो ब्रह्मरूपेण तात्त्विकत्वाददद्वितीयत्वमिति श्रुतेश्च। जीवात्मानश्चाविद्यादर्पणा ब्रह्मप्रतिबिम्बकाः। यथा यथा यत्र यत्र मनो ब्रह्मादित्यो ब्रह्मेत्यादिषु ब्रह्मदृष्टेरुपदेशस्तत्र सर्वत्राहं मन इत्यादि द्रष्टव्यम्। "ब्रह्मणो मुख्यमात्मत्वम्" इति। उपपन्नञ्च मनःप्रभृतीनां ब्रह्मविकारत्वेन तादात्म्यम्। घटशरावोदञ्चनादीनामिव मृद्विकाराणां मृदात्मकत्वम्। तथा च तादृशानां प्रतीकोपदेशानां क्वचित् कस्यचिद्विकारस्य प्रविलयावगमाद्भेदप्रपञ्चप्रविलयपरत्वमेवेति प्राप्त उच्यते। न तावदहं ब्रह्मेत्यादिभिर्यथाहङ्कारास्पदस्य ब्रह्मात्मत्वमुपदिश्यते एवं मनो ब्रह्मेत्यादिरहङ्कारास्पदत्वं मनःप्रभृतीनां, किन्त्वेषां ब्रह्मत्वेनोपास्यत्वमहङ्कारास्पदस्य ब्रह्मतया ब्रह्मत्वेनोपासनीयेषु मनःप्रभृतिष्वपि अहङ्कारास्पदत्वेनोपासनमिति चेत्, न। एवमादिष्वहमित्यश्रवणात्। ब्रह्मात्मतया त्वहङ्कारास्पदत्वकल्पने तत्प्रतिबिम्बस्येव तद्विकारान्तरस्याप्याकाशादेर्मनः-प्रभृतिषूपासनप्रसङ्गः। यस्माद्यस्य यन्मात्रात्मतयोपासनं विहितं तस्य तन्मात्रात्मतयैव प्रतिपत्तव्यं यावद्वचनं वाचनिकमिति न्यायान्नाधिकमध्याहर्त्तव्यमतिप्रसङ्गात्। न च सर्वस्य वाक्यजातस्य प्रपञ्चस्य विलयः प्रयोजनं तदर्थत्वे हि मन इति प्रतीकग्रहणमनर्थकं विश्वमिति वाच्यम्। यथा सर्वं खल्विदं ब्रह्मेति। न च सर्वोपलक्षणार्थं मनोग्रहणं युक्तम्। मुख्यार्थमनोग्रहणं युक्तम्। मुख्यार्थसम्भवे लक्षणाया अयोगात्। आदित्यो ब्रह्मेत्यादीनां चानर्थक्यापत्तेः। "नह्युपासकः प्रतीकानि" इति। अनुभवाद्वा प्रतीकानां मनःप्रभृतीनामात्मत्वे-

नाकलनं श्रुतेर्वा, न त्वेतदुभयमस्तीत्यर्थः। "प्रतीकाभावप्रसङ्गात्" इति। ननु यथावच्छिन्नस्याहङ्कारास्पदस्यानवच्छिन्नब्रह्मात्मतया भवत्यभाव एवं प्रतीकानामपि भविष्यतीत्यत आह। "स्वरूपोपमर्दे च नामादीनाम्" इति। इह हि प्रतीकान्यहङ्कारास्पदत्वेनोपास्यतया प्रधानत्वेन विधित्सितानि न तु तत्त्वमसीत्यादावहङ्कारास्पदमुपास्यमवगम्यते किन्तु सर्पत्वानुवादेन रज्जुतत्त्वज्ञापन इवाहङ्कारास्पदस्यावच्छिन्नस्य प्रविलयोऽवगम्यते। किमतो यद्येवम् एतदतो भवति। प्रधानीभूतानां न प्रतीकानामुच्छेदो युक्तो न च तदुच्छेदे विधेयस्याप्युपपत्तिरिति। अपि च। "न च ब्रह्मण आत्मत्वात्" इति। ब्रह्मोपासनविधानानि जीवात्मनो ब्रह्मस्वभावप्रतिपादनपरैस्तत्त्वमस्यादिसन्दर्भैरेकवाक्यभावमापद्यन्ते येन तदेकवाक्यतया ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्येत भिन्नप्रकरणत्वात्तथा च तत्र यथा लोकप्रतीतिव्यवस्थितो जीवः कर्त्ता भोक्ता च संसारी न ब्रह्मेति कथं तस्य ब्रह्मात्मतया ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिरुपदिश्येतेत्यर्थः। "अतश्चोपासकस्य प्रतीकैः समत्वात्" इति। यद्यप्युपासको जीवात्मा न ब्रह्मविकारः, प्रतीकानि तु मनःप्रभृतीनि ब्रह्मविकारस्तथाप्यवच्छिन्नतया जीवात्मनः प्रतीकैः साम्यं द्रष्टव्यम्॥

ब्रह्मदृष्टिरुत्कर्षात्॥ ५॥

यद्यपि सामानाधिकरण्यमुभयथापि घटते तथापि ब्रह्मणः सर्वाध्यक्षतया फलप्रसवसामर्थ्येन फलवत्त्वात् प्राधान्येन तदेवादित्यादिदृष्टिभिः संस्कर्त्तव्यमित्यादित्यादिदृष्टयो ब्रह्मण्येव कर्त्तव्या न तु ब्रह्मदृष्टिरादित्यादिषु। न

चैवंविधेऽवधृते शास्त्रार्थे निकृष्टदृष्टिर्नोत्कृष्ट इति लौकिको न्यायोऽपवादाय प्रभवत्यागमविरोधेन तस्यैवापोदित्वादिति पूर्वपक्षसंक्षेपः। सत्यं सर्वाध्यक्षतया फलदातृत्वेन ब्रह्मण एव सर्वत्र वास्तवं प्राधान्यं तथापि शब्दगत्यनुरोधेन क्वचित् कर्मण एव प्राधान्यमवसीयते। यथा दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः चित्रया यजेत पशुकाम इत्यादौ। अत्र हि सर्वत्र यागाद्याराधिता यद्यपि देवतैव फलं प्रयच्छतीति स्थापितं तथापि शब्दतः कर्मणः करणत्वावगमेन फलत्वप्रतीतेः प्राधान्यम्। क्वचिद् द्रव्यस्य यथा व्रीहीन् प्रोक्षतीत्यादौ। तदुक्तं 'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत' इति। तदिह यद्यपि सर्वाध्यक्षतया वस्तुतो ब्रह्मैव फलं प्रयच्छति तथापि शास्त्रं ब्रह्म बुद्ध्यादित्यादौ प्रतीके उपास्यमाने ब्रह्मफलाय कल्पते इति अभिवदति किं त्वादित्यादिबुद्ध्या ब्रह्मैव विषयीकृतं फलायेत्युभयथापि ब्रह्मणः सर्वाध्यक्षस्य फलदानोपपत्तेः शास्त्रार्थसन्देहे लोकानुसारतो निश्चीयते। तदिदमुक्तम्। "निर्धारिते शास्त्रार्थे एतदेवं स्यात्" इति। न केवलं लौकिको न्यायो निश्चये हेतुरपि तु आदित्यादिशब्दानां प्राथम्येन मुख्यार्थत्वमपीत्याह। "प्राथम्याच्च" इति। इतिपरत्वमपि ब्रह्मशब्दस्यामुमेव न्यायमवगमयन्ति। तथाहि। स्वरसहृत्त्या आदित्यादिशब्दा यथा स्वार्थे वर्त्तन्ते तथा ब्रह्मशब्दोऽपि स्वार्थे वर्त्स्यति यदि स्वार्थोऽस्य विवक्षितः स्यात् तथाचेतिपरत्वमनर्थकं तस्मादितिना स्वार्थात् प्रच्याव्य ब्रह्मपदं ज्ञानपरं स्वरूपपरं वा कर्त्तव्यम्। न च ब्रह्मपदमादित्यादिपदार्थ इति प्रतीतिपर एवायमिति परः शब्दो यथा गौरिति मे प्रतीतिरभवदिति। तथाच आदित्यादयो ब्रह्मेति प्रतिपत्तव्या इत्यर्थो भवतीत्याह। "इतिपर-

त्वादपि ब्रह्मशब्दस्य" इति। शेषमतिरोहितार्थम्॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः॥ ६॥

"अथवा नियमेनोद्गीथादिमतयश्चादित्यादिष्वध्यस्येरन्" इति। सत्स्वपि आदित्यादिषु फलानुत्पादादुत्पत्तिमतः कर्मण एव फलदर्शनात् कर्मैव फलवत्तया चादित्यादिमतिभिर्यद्युद्गीथादिकर्माणि विषयीक्रियेरन् तत आदित्यादिदृष्टिभिः कर्मरूपाण्यभिभूयेरन्। एवञ्च कर्मरूपेष्वसत्कल्पेषु कुतः फलमुत्पद्येत। आदित्यादिषु पुनरुद्गीथादिदृष्टावुद्गीथबुद्ध्याऽऽध्यमानानामादित्यादयः कर्मात्मकाः सन्तः फलाय कल्पिष्यन्त इति। अत एव च पृथिव्यग्न्योरृक्सामशब्दप्रयोग उपपन्नो यतः पृथिव्यामृग्दृष्टिरध्यस्ताग्नौ च सामदृष्टिः। साम्नि पुनरग्निदृष्टौ ऋचि च पृथिवीदृष्टौ विपरीतं भवेत्। तस्मादप्येतदेव युक्तमित्याह। "तथा चेयमेव" इति। उपपत्त्यन्तरमाह। "अपि च लोकेषु" इति। एवं खल्वधिकरणनिर्देशो विषयत्वप्रतिपादनपर उपपद्यते यदि लोकेषु सामदृष्टिरध्यस्येत नान्यथेति। पूर्वाधिकरणराद्धान्तोपपत्तिमत्रैवार्थे ब्रूते। "प्रथमनिर्दिष्टेषु च" इति। सिद्धान्तमत्र प्रक्रमते। "आदित्यादिमत एव" इति। यद्युद्गीथादिमतय आदित्यादिषु क्षिप्येरन् तत आदित्यानां स्वयमकार्य्यत्वादुद्गीथादिमतेस्तत्र वैयर्थ्यं प्रसज्येत। नह्यादित्यादिभिः किञ्चित् क्रियते यद्विद्यया वीर्य्यवत्तरं भवेत् आदित्यादिमत्या विद्ययोद्गीथादिकर्मसु कार्य्येषु यदेव विद्यया करोति तदेव वीर्य्यवत्तरं भवतीत्यादित्यमतीनामुपपद्यते उद्गीथादिषु संस्कारकत्वेनोपयोगः। चोदयति। "भवतु कर्मसमृद्धिफले ष्वेवम्" इति। यत्र हि कर्मणः फलं तत्रैव भवतु यत्र तु

गुणात् फलं तत्र गुणस्य सिद्धत्वेनाकार्य्यत्वात् करोतीत्येव नास्तीत्यत्र विद्यायाः क उपयोग इत्यर्थः । परिहरति । "तेष्वपि" इति । न तावद्गुणः सिद्धस्वभावः कार्य्याय फलाय पर्य्याप्तो मा भूत् प्रकृतकर्मानिवेशिनो यत् किञ्चित् फलोत्पादः । तस्मात् प्रकृतापूर्वसन्निवेशितः फलोत्पाद इति । तस्य क्रियमाणत्वेन विद्यया वीर्य्यवत्तरत्वोपपत्तिरिति । "फलात्मकत्वाच्चादित्यादीनाम्" इति । यद्यपि ब्रह्मविकारत्वेनादित्योद्गीथयोरविशेषस्तथापि फलात्मकत्वेनादित्यादीनामस्त्युद्गीथादिभ्यो विशेष इत्यर्थः । द्वितीयानिर्देशादप्युद्गीथादीनां प्राधान्यमित्याह । "अपि चतुर्म्" इति । स्वयमेवोपासनस्य कर्मत्वात् फलवत्त्वोपपत्तेः । ननूक्तं सिद्धरूपैरादित्यादिभिरध्यस्तैः साध्यभूतत्वमभिभूतं कर्मणामित आह । "आदित्यादिभावेनापि दृश्यमानानाम्" इति । भवेदेतदेवं यद्यध्यासेन कर्मरूपमभिभूयेतापि तु माणवक इवाग्निदृष्टिः केनचित्तीव्रत्वादिना गुणेन गौण्यनभिभूतमाणवकत्वात्तथेहापि । नहीयं शुक्तिकायां रजतधीरिव वह्निधीर्येन माणवकत्वमभिभवेत् किन्तु गौणी । तथेयमप्युद्गीथादावादित्यदृष्टिर्गौणीति भावः । "तदेतस्यामृच्यध्यूढं सामेति तु" इति । अन्यथापि लक्षणोपपत्तौ न ऋक्सामत्वाध्यासकल्पना पृथिव्यग्न्योरित्यर्थः । अक्षरन्यासालोचनया तु विपरीतमेवेत्याह । "इयमेव ऋक्" इति । लोकेषु पञ्चविधं सामोपासीतेति द्वितीयानिर्देशात् साम्नामुपास्यत्वमवगम्यते । तत्र यदि सामधीरध्यस्येत ततो न सामान्युपास्येरन् अपि तु लोकाः पृथिव्यादयः । तथा च द्वितीयार्थं परित्यज्य तृतीयार्थः परिकल्प्येत साम्नेति लोकेष्विति सप्तमी द्वितीयार्थे कथञ्चिन्नीयते । अगारे गावो वास्यन्तां प्रावारे कुसुमानीतिवत् । तेनोक्तन्यायानुरोधेन

सप्तम्याश्चोभयथाप्यवश्यं कल्पनीयार्थत्वाद् वरं यथाश्रुतद्वितीयार्थानुरोधाय तृतीयार्थे सप्तमी व्याख्यातव्या। लोकपृथिव्यादिबुद्ध्या पञ्चविधं हिङ्कारप्रस्तावोद्गीथप्रतीहारनिधनप्रकारं सामोपासीतेति निर्णीयते। ननु यत्रोभयत्रापि द्वितीयानिर्देशो यथा खल्वमुमेवादित्यं सप्तविधं हिङ्कारप्रस्तावोङ्कारोद्गीथप्रतीहारोपद्रवनिधनप्रकारं सामोपासीतेति, तत्र को विनिगमनायां हेतुरित्यत आह। "तत्रापि" इति। तत्रापि समस्तस्य सप्तविधस्य साम्न उपासनमिति साम्न उपास्यत्वश्रुतेः। साध्विति पञ्चविधस्य साधुत्वं चास्य धर्मत्वम्। तथाच श्रुतिः 'साधुकारी साधुर्भवति' इति। हिङ्कारानुवादेन पृथिवीदृष्टिविधाने हिङ्कारपृथिवीति प्राप्ते विपरीतनिर्देशः पृथिवीहिङ्कारः॥

आसीनः सम्भवात्॥ ७॥

कर्माङ्गसम्बन्धिषु यत्र हि तिष्ठतः कर्म चोदितं तत्र तत्सम्बन्ध्योपासनापि तिष्ठतैव कर्त्तव्या। यत्र वासीनस्य तत्रोपासनाप्यासीनेनैवेति। नापि सम्यग्दर्शने वस्तुतन्त्रत्वात् प्रमाणतन्त्रत्वाच्च प्रमाणतन्त्रा च वस्तुव्यवस्था प्रमाणं नापेक्षत इति तत्राप्यनियमः। यन्महता प्रयत्नेन विनोपासितुमशक्यम्। यथा प्रतीकादि यथा चासम्यग्दर्शनमपि तत्त्वमस्यादि तत्रैषा चिन्ता। तत्र चोदकशास्त्राभावादनियमे प्राप्ते यथा शक्यत इत्युपपत्त्यादासीनस्यैव सिद्धम्। ननु यस्यामवस्थायां ध्यायतिरुपचर्य्यते प्रयुज्यते किमसौ तदा तिष्ठतो न भवति न भवतीत्याह। आसीनस्याविद्यमानायासो भवतीति। अतिरोहितार्थमितरत्॥

यत्रैकाग्रता तत्राविशेषात्॥ ११॥

समे शुचौ शर्करावह्निवालुकाविवर्जित इत्यादिवचनान्नियमे सिद्धे दिग्देशादिनियममवाचनिकमपि प्राचीनप्रवणे वैश्वदेवेन यजेतिवद्वैदिकारम्भसामान्यात् क्वचित् कश्चिदाशङ्कते। तमनुगृहीतमाचार्य्यः सुहृद्भावेनैव तदाह स्म। तत्रै-काग्रता मनसस्तत्रैव भावनां प्रयोजयेत्। अविशेषात्। नह्य-त्रास्ति वैश्वदेवादिवद्वचनं विशेषकं तस्मादिति॥

आ प्रायणात्तत्रापि हि दृष्टम्॥ १२॥

अधिकरणविषयं विवेचयति। "तत्र यानि तावत्" इति। अविद्यमाननियोज्या या ब्रह्मात्मप्रतिपत्तिस्तस्याः शास्त्रं हि नियोज्यस्य कार्य्यरूपनियोगसम्बन्धमवबोधयति तस्यैव कर्मण्यैश्वर्य्यलक्षणमधिकारं तच्चैतदुभयमतीन्द्रियत्वाद्भवति शास्त्रलक्षणं प्रमाणान्तराप्राप्ते शास्त्रस्यार्थवत्त्वाद् ब्रह्मात्मत्व-प्रतीतिस्तु जीवन्मुक्तेन दृष्टत्वान्नास्तीह तिरोहितमिव किञ्चनेति किमत्र शास्त्रं करिष्यति। नन्वेवमप्यभ्युदयफलान्युपासनानि तत्र नियोज्यनियोगलक्षणस्य च कर्मणि स्वामितालक्षणस्य च सम्बन्धस्यातीन्द्रियत्वात्तत्र सकृत्करणादेव शास्त्रार्थ-समाप्तौ प्राप्तायामुपासनपदवेदनीयावृत्तिमात्रमेव कृतवत उपरमः प्राप्तस्तावतैव कृतशास्त्रार्थत्वादिति प्राप्तेऽभिधीयते। सविज्ञानो भवतीत्यादिश्रुतेर्यत्र स्वर्गादिफलानामपि कर्मणां प्रायणकाले स्वर्गादिविज्ञानापेक्षकत्वं तत्र कैव कथाऽतीन्द्रियफलानामुपासनानाम्। तानि खलु आ प्रायणं तत्त-दुपास्यगोचरबुद्धिप्रवाहवाहितया दृष्टेनैव रूपेण प्रायणसमये तद्बुद्धिं भावयिष्यन्ति। किमत्र फलवत्प्रायणसमये बुद्ध्यपेक्षा नहि दृष्टे सम्भवत्यदृष्टकल्पना युक्ता। तस्मादा प्रायणं प्रवृत्ता वृत्तिरिति। तदिदमुक्तम्। "प्रत्ययास्त्वेते" इति।

तथा च श्रुतिः 'सर्वातीन्द्रियविषया स यथा क्रतुरस्माल्लोकात् प्रैति तावत् क्रतुर्हामुं लोकं प्रेत्याभिसम्भवति' इति। क्रतुः सङ्कल्पविशेषः। स्मृतयश्चोदाहृता इति॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥ १३॥

गतस्तृतीयशेषः साधनगोचरो विचारः। इदानीमेतदध्यायगतफलविषया चिन्ता प्रतन्यते। तत्र तावत्प्रथममिदं विचार्यते किं ब्रह्माधिगमे ब्रह्मज्ञाने सति ब्रह्मज्ञानफलामोक्षाद्विपरीतफलं दुरितं बन्धनफलं क्षीयते न क्षीयत इति संशयः। किं तावत् प्राप्तं, शास्त्रेण हि फलाय यद्विहितं प्रतिषिद्धं चानर्थपरिहारायाश्वमेधादि ब्रह्महत्यादि चापूर्वावान्तरव्यापारं किल्तदपूर्वमुपरतेऽपि कर्मण्यत्र सुखदुःखोपभोगात्प्राक् नाविरन्तुमर्हति। स हि तस्य विनाशहेतुस्तदभावे कथं विनश्येदिति। तस्याकस्मिकत्वप्रसङ्गात् शास्त्रव्याकोपाच्चेति। अदत्तफलञ्चेत् कर्मापूर्वं विनश्यति कर्मण एव फलप्रसवसामर्थ्यबोधकशास्त्रमप्रमाणं भवेत्। न च प्रायश्चित्तमिव ब्रह्मज्ञानमदत्तफलान्यपि कर्मापूर्वाणि क्षिणोतीति साम्प्रतम्। प्रायश्चित्तानामपि तदप्रचयहेतुत्वात्तद्विधानस्य चैनस्विनराधिकारिप्राप्तिमात्रेणोपपत्तावुपात्तदुरितनिबर्हणफलाक्षेपकत्वायोगात्। अत एव स्मरन्ति नाभुक्तं क्षीयते कर्मेति। यदि पुनरपेक्षितोपायतात्मा प्रायश्चित्तविधिर्न नियोज्यविशेषप्रतिलम्भमात्रेण निर्वृणोतीत्यपेक्षिताकाङ्क्षायां दोषसंयोगेन श्रवणात्तन्निबर्हणफलः कल्प्येत। तथाऽपि ब्रह्मज्ञानस्य तत्संयोगेनाश्रवणान्न दुरितनिबर्हणसामर्थ्ये प्रमाणमस्ति। मोक्षवत्तस्यापि स्वर्गादिफलवद्देशकालनिमि-

त्तापेक्षयोपपत्तेः। शास्त्रप्रामाण्यात्सम्भविष्यति। असाववस्था यस्यामुपभोगेन समस्तकर्मक्षये ब्रह्मज्ञानं मोक्षं प्रसोष्यति। योगर्द्धेश्व वा दिवि भुव्यन्तरिक्षे बहूनि शरीरेन्द्रियाणि निर्माय फलान्युपभुञ्जानेन योगसामर्थ्येन योगी कर्माणि क्षपयित्वा मोक्षी सम्पत्स्यते। स्थिते चैतस्मिन्नर्थे न्यायबलाद्यथा पुष्करपलाश इत्यादिव्यपदेशो ब्रह्मविद्यास्तुतिमात्रपरतया व्याख्येय इति प्राप्ते, उच्यते। व्याख्यायेतैवं व्यपदेशो यदि कर्मविधिविरोधः स्यान्न त्वयमस्ति। शास्त्रं हि फलोत्पादनसामर्थ्यमात्रं कर्मणामवगमयति न तु कुतश्चिदागन्तुकान्निमित्ततः प्रायश्चित्तादेस्तदप्रतिबन्धमपि। तस्य तत्रौदासीन्यात्। यदि शास्त्रबोधितफलप्रसवसामर्थ्यमप्रतिबद्धमागन्तुकेन केनचित् कर्मणा ततस्तत्फलं प्रसूत एवेति न शास्त्रव्याघातः। नाभुक्तं कर्म क्षीयत इति च स्मरणमप्रतिबद्धसामर्थ्यकर्माभिप्रायम्। दोषक्षयोद्देशेन चापरविद्यानामस्ति प्रायश्चित्तवद्विधानमैश्वर्य्यफलानामप्युभयसंयोगाविशेषात्। यत्रापि निर्गुणायां परविद्यायां दोषोद्देशो नास्ति तत्रापि तत्स्वभावालोचनादेव तत्प्रक्षयप्रसवसामर्थ्यमवसीयते नहि तत्त्वमसिवाक्यार्थपरिभावनाभुवा प्रसंख्यानेन निमृष्टनिखिलकर्तृभोक्तृत्वादिविभ्रमो जीवः फलोपभोगेन युज्यते। नहि रज्ज्वां भुजङ्गसमारोपनिबन्धना भयकम्पादयः सति रज्जुतत्त्वसाक्षात्कारे प्रभवन्ति, किन्तु संस्कारशेषात् किञ्चित्कालमनुवृत्त्यापि निवर्त्तन्त एव। अमुमेवार्थमनुवदन्तो यथा पुष्करपलाश इत्यादयो व्यपदेशाः समवेतार्थाः सन्तो न स्तुतिमात्रपरतया कथञ्चिद्व्याख्यानमर्हन्ति। ननूक्तं सम्भविष्यति सावस्था जीवात्मनो यस्यां पर्य्यायेणोपभोगाद्वा योगर्द्धेः प्रभावतो युगपन्नैकविधकार्यनिर्माणेनापर्य्यायेणोपभोगा-

हा जन्तुः कर्माणि चपयित्वा मोची सम्पत्स्यत इत्यत आह।
एवमेव च मोच उपपद्यत इति। अनादिकालप्रवृत्ता हि कर्माशया अनियतकालविपाकाः क्रमवता तावद्भोगेन चेतुमशक्याः। भुञ्जानः खल्वयमपरानपि सञ्चिनोति कर्माशयानिति। नाप्यपर्य्यायमुपभोगेनासक्तः कर्मान्तराख्यसञ्चिस्वानः चेष्यतीति साम्प्रतम्। कल्पशतानि क्रमकालभोग्यानां सम्प्रति भोक्तुमसामर्थ्यात्। दीर्घकालफलानि च कर्माणि कथमेकपदे चेष्यन्ति। तस्मान्नान्यथा मोचसम्भवः। ननु सत्स्वपि कर्माशयान्तरेषु सुखदुःखफलेषु मोचफलत्वात् कर्मणः समुदाचरतो ब्रह्मभावमनुभूयार्थलब्धविपाकानां कर्मान्तराणां फलानि भोच्यन्त इत्यत आह। "न च देशकालनिमित्तापेचः" इति। न हि कार्य्यः सन् मोचो मोचो भवितुमर्हति ब्रह्मभावो हि सः। न च ब्रह्म क्रियते नित्यत्वादित्यर्थः। परोचत्वानुपपत्तेश्च ज्ञानफलस्य। ज्ञानफलं खलु मोचोऽभ्युपेयते। ज्ञानस्य चानन्तरभाविनि ज्ञेयाभिव्यक्तिः फलं सैवाविद्योच्छेदमादधती ब्रह्मस्वभावस्वरूपावस्थानलचणाय मोचाय कल्पते। एवं हि दृष्टार्थता ज्ञानस्य स्यात्। अपूर्वाधानपरम्परया ज्ञानस्य मोचफले कल्प्यमाने ज्ञानस्य परोचफलत्वमदृष्टार्थत्वं भवेत्। न च दृष्टे सम्भवत्यदृष्टकल्पना युक्तेत्यर्थः। तस्माद् ब्रह्माधिगमे ब्रह्मज्ञाने सत्यहैतसिद्धौ दुरितचय इति सिद्धम्।

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

अधर्मस्य स्वाभाविकत्वेन रागादिनिबन्धनत्वेन शास्त्रीयेण ब्रह्मज्ञानेन प्रतिबन्धो युक्तः। धर्मज्ञानयोऽस्तु शास्त्रीयत्वेन ज्योतिष्टोमदर्शपौर्णमासवदविरोधान्नोच्छेद्योच्छेत्तृभावो

युज्यते। पाप्मनश्च विशेषतो ब्रह्मज्ञानोच्छेद्यत्वश्रुतेर्धर्मस्य न तदुच्छेद्यत्वम्। विशेषविधानस्य शेषप्रतिषेधनान्तरीयकत्वेन लोकतः सिद्धेः। यथा देवदत्तो दक्षिणेनाक्ष्णा पश्यतीत्युक्ते न वामेन पश्यतीति गम्यते। उभे ह्येवैष एते तरतीति च यथासम्भवं ब्रह्मज्ञानेन दुष्कृतं भोगेन सुकृतमिति। क्षीयन्ते चास्य कर्माणि इति च सामान्यवचनं सर्वे पाप्मान इति विशेषश्रवणात् पापकर्माणीति विशेषे उपसंहरणीयम्। तस्माद् ब्रह्मज्ञानाद् दुष्कृतस्यैव क्षयो न सुकृतस्येति प्राप्ते पूर्वाधिकरणराद्धान्तोऽतिदिश्यते। नो खलु ब्रह्मविद्या केनचिददृष्टेन द्वारेण दुष्कृतमपनयत्यपि तु दृष्टेनैव भोक्तृभोक्तव्यभोगादिप्रविलयद्वारेण तच्चैतत्तुल्यं सुकृतेऽपीति कथमेतदपि नोच्छिन्द्यात्। एवञ्च सति न शास्त्रीयत्वसाम्यमात्रमविरोधहेतुर्नहि प्रत्यक्षत्वसामान्यमात्रादविरोधो जलानलादीनाम्। न च सुकृतशास्त्रमनर्थकमब्रह्मविदं प्रति तद्विधेरर्थवत्त्वात्। एवमवस्थिते च पाप्मश्रुत्या पुण्यमपि ग्रहीतव्यम्। ब्रह्मज्ञानमपेक्ष्य पुण्यस्य निकृष्टफलत्वात्तत्फलं हि क्षयातिशयवत्। नह्येवं मोक्षो निरतिशयत्वान्नित्यत्वाच्च। दृष्टप्रयोगश्चायं पाप्मशब्दो वेदे पुण्यपापयोः। तद्यथा पुण्यपि अनुक्रम्य सर्वे पाप्मानोऽतो निवर्त्तन्त इत्यत्र तस्मादविशेषेण पुण्यपापयोरश्लेषविनाशाविति सिद्धम्॥

अनारब्धकार्य्ये एव तु पूर्वे तदवधेः॥ १५॥

यद्यद्वैतज्ञानस्वभावालोचनयोत्तरपूर्वसुकृतदुष्कृतयोरश्लेषविनाशौ हन्त आरब्धानारब्धकार्य्ययोश्चाविशेषेणैव विनाशः स्यात्। कर्तृकर्मादिप्रविलयस्योभयत्राविशेषात्। तन्निबन्धनत्वाच्च विनाशस्य। न च संस्कारशेषात् कुलालचक्रभ्रमण-

वदनुवृत्तिः। वस्तुनः खल्वनुवृत्तिः। मायावादिनश्च पुण्य-पापयोश्च मायामात्रविनिर्मितत्वेन मायानिवृत्तौ न पुण्या-पुण्ये न तत्संस्कारो वस्तुसन्तीति कस्यानुवृत्तिः। न च रज्जौ सर्पादिविभ्रमजनिता भयकम्पादयो निवृत्तेऽपि विभ्रमे यथानुवर्त्तन्ते तथेहापीति युक्तम्। तत्रापि सर्पासत्त्वेऽपि तज्ज्ञानस्य सत्त्वे तज्जनितभयकम्पादीनां तत्संस्काराणाञ्च वस्तुसत्त्वेन निवृत्तेऽपि विभ्रमेऽनिवृत्तेः। अत्र तु न माया न तज्जः संस्कारो न तद्गोचर इति तुच्छत्वात् किमनुवर्त्तेत। न संस्कारशेषो न कर्मेत्यविशेषेणारब्धकार्य्याणामनारब्धकार्य्याणां च निवृत्तिः। न च तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यत इति श्रुतेर्देहपातप्रतीचारब्धकार्य्याणां युक्ता। नह्येषा श्रुतिरवधिभेदविधायिन्यपि तु चिप्रतापरा। यथा लोक एतावन्मे चिरं यत् स्नातो भुञ्जानश्चेति। नहि तत्र स्नानभोजने अवधित्वेन विधीयेते किन्तु चेपीयस्ता प्रति-पाद्यते। उभयविधाने हि वाक्यं भिद्येतावधिभेदः चिरता चेति प्राप्तेऽभिधीयते। यद्यप्यद्वैतब्रह्मतत्त्वसाक्षात्कारो नाद्य-विद्योपदर्शितप्रपञ्चमात्रविरोधितया तन्मात्रविरोधितया तन्म-ध्यपतितसकलकर्मविरोधी। तथाप्यनारब्धविपाकं कर्मजातं द्रागित्येव समुच्छिनत्ति न त्वारब्धविपाकं सम्पादितजात्यायु-र्वितत्पूर्वापरीभूतसुखदुःखोपभोगप्रवाहं कर्मजातं तद्धि समु-दाचरद्वृत्तितयेतरेभ्यः प्रसुप्तवृत्तिभ्यो बलवदन्यथा देवर्षीणां हिरण्यगर्भमनूद्दालप्रभृतीनां विगलितनिखिलक्लेशजालावरण-तया परितः प्रद्योतमानबुद्धिसत्त्वानां न चोज्जीविता भवेत्। श्रूयते चैषां श्रुतिस्मृतीतिहासपुराणेषु तत्त्वज्ञता च महा-कल्पकल्पमन्वन्तरादिजीविता च। न चैते महाधियो न ब्रह्मविदो ब्रह्मविदस्त्वल्पपुण्यमेधसो मनुष्या इति श्रद्धेयम्।

तस्मादागमानुसारतोऽस्ति प्रारब्धविपाकानां कर्मणां प्रचयाय तदीयसमस्तफलोपभोगप्रतीक्षा सत्यपि तत्त्वसाक्षात्कारे। तावदेव चिरमिति न चिरता विधीयते अपि तु श्रुत्यन्तरसिद्धां चिरतामनूद्य देहपातावधिमात्रविधानं तदेतदभिसन्धायौचित्यमात्रतयाह स्म भगवान् भाष्यकारः। "न तावदनाश्रित्यारब्धकार्य्ये कर्माशयम्" इति। न चेदं न जातु दृष्टं यद्विरोधिसमवाये विरोध्यन्तरमनुवर्त्तत इत्याह। "अकर्त्रात्मबोधोऽपि" इति। यदा लोकेऽपि विरोधिनोः किञ्चित् कालं सहानुवृत्तिरुपलब्धा तदेहागमबलाद्दीर्घकालमपि भवन्तोति न शक्या निवारयितुम्। प्रमाणसिद्धस्य नियोगपर्य्यनुयोगानुपपत्तेः। तदेवं मध्यस्थान् प्रतिपाद्य ये भाष्यकारप्राप्तं मन्यन्ते तान् प्रत्याह। "अपि च नैवात्र विवदितव्यम्" इति। स्थितप्रज्ञश्च न साधकस्तस्योत्तरोत्तरध्यानोत्कर्षेण पूर्वप्रत्ययानवस्थितत्वात्। निरतिशयस्तु स्थितप्रज्ञः। स च सिद्ध एव। न च ज्ञानकार्य्या भयकम्पादयो ज्ञानमात्रादनुत्पादात्। सर्पावच्छेदो हि तस्य भयकम्पादिहेतुः। स चासन्ननिर्वचनीय इति कुतो वस्तुसतः कार्य्योत्पादः। न च कार्य्यमपि भयकम्पादि वस्तु सत्। तस्यापि विचारासहत्वेनानिर्वाच्यत्वात्। अनिर्वाच्याच्चानिर्वाच्योत्पत्तौ नानुपपत्तिः। यादृशो हि यक्षस्तादृशो बलिरिति सर्वमवदातम्॥

अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात् ॥१६॥

यदि पुण्यस्याप्यश्लेषविनाशौ हन्त नित्यमप्यग्निहोत्रादि न कर्त्तव्यं योगमारुरुक्षुणा। तस्यापीतरपुण्यवदविद्यया विनाशात्। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात्। न च विविदिषन्ति यज्ञेन दानेनेति मोक्षलक्षणैककार्य्यं तया

विद्याकर्मणोरविरोधः । सहासम्भवेनैककार्य्यत्वासम्भात् । नह्यतमात्मानं विदुषो विगलिताखिलकर्तृभोक्तृत्वादिप्रपञ्चविभ्रमस्य पूर्वोत्तरे नित्ये क्रियाजन्ये पुण्ये सम्भवतः । तस्माद्विविदिषन्ति यज्ञेनेति वर्त्तमानापदेशो ब्रह्मज्ञानस्य यज्ञादीनां वा स्तुतिमात्रं न तु मोक्षमाणस्य मुक्तिसाधनं यज्ञादिविधिरिति प्राप्ते, उच्यते । सत्यं न विद्ययैककार्य्यत्वं कर्मणां परस्परविरोधेन सहासम्भवात् । विद्योत्पादकतया तु कर्मणामारादुपकारकाणामस्तु मोक्षोपयोगः । न च कर्मणां विद्यया विरुध्यमानानां न विद्याकारणत्वं स्वकारणविरोधिनां कार्य्याणां बहुलमुपलब्धेः । तथा च विद्यालक्षणकार्य्योपायतया कार्य्यविनाश्यानामपि कर्मणामुपादानमर्थवत् । तदभावे तत्कार्य्यस्यानुत्पादेन मोक्षस्यासम्भवात् । एवञ्च विविदिषन्ति यज्ञेनेति यज्ञसाधनत्वं विद्याया अपूर्वमर्थं प्रापयतः पञ्चमलकारस्य नात्यन्तपरोक्षवृत्तितया ज्ञानस्तुत्यर्थतया कथञ्चिद्व्याख्यानं भविष्यति । तदनेनाभिसन्धिनोक्तं "ज्ञानस्यैव हि प्रापकं कर्म प्रणाड्या मोक्षकारणमित्युपचर्य्यते" । यत एव न विद्योदयसमये कर्मास्ति नापि परस्तात् । अपि तु प्रागेव विद्यायाः । अत एव चातिक्रान्तविषयमेतत्कार्य्यैकत्वाभिधानम् । एतदेव स्फोरयति । "नहि ब्रह्मविदः" इति । सूत्रान्तरमवतारयितुं पृच्छति "किं विषयं पुनरिदम्" इति । अस्योत्तरं सूत्रम् ।

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

काम्यकर्मविषयमश्लेषविनाशवचनं शाखान्तरीयवचनं च तस्य पुत्रा दायमुपयन्तीति ॥

यदेव विद्ययेति हि ॥ १८ ॥

अस्ति विद्यासंयुक्तं यज्ञादि य एवं विद्वान् यजेतेत्यादिकम्। अस्ति च केवलम्। तत्र यथा ब्राह्मणाय हिरण्यं दद्यादित्युक्ते विदुषे ब्राह्मणाय दद्यान्न ब्राह्मणब्रुवाय मूर्खायेति विशेषप्रतिलम्भः तत् कस्य हेतोस्तस्यातिशयवत्त्वात्। एवं विद्यारहिताद् यज्ञादेर्विद्यासहितमतिशयवदिति तस्यैव परविद्यासाधनत्वमुपात्तदुरितक्षयद्वारा नेतरस्य। तस्माद्विविदिषन्ति यज्ञेनेत्यविशेषश्रुतमपि विद्यासहिते यज्ञादावुपसंहर्त्तव्यमिति प्राप्तेऽभिधीयते। यदेव विद्यया करोति तदेवास्य वीर्य्यवत्तरमिति तरबर्थश्रुतेर्विद्यारहितस्य वीर्य्यवत्तामात्रमवगम्यते। न च सर्वथाऽकिञ्चित्करस्य तदुपपद्यते। तस्मादस्यस्यापि कयापि मात्रया परविद्योत्पादोपयोग इति विद्यारहितमपि यज्ञादि परविद्यार्थिनाऽनुष्ठेयमिति सिद्धम् ॥

भोगेन त्वितरे क्षपयित्वा सम्पद्यते ॥ १९ ॥

अनारब्धकार्य्ये इत्यस्य नञः फलं भोगेन निवृत्तिं दर्शयत्यनेन सूत्रेणास्य तूपपादनं पुरस्तादपक्रम्य कृतमिति नेह क्रियते पुनरुक्तभयात् ॥

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां चतुर्थस्याध्यायस्य
प्रथमः पादः समाप्तः ॥

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

अथास्मिन् फलविचारलक्षणे वाङ्मनसि सम्पद्यत इत्यादिविचारोऽसङ्गत इत्यत आह। "अथापरासु विद्यासु फलप्राप्तये" इति। अपरविद्याफलप्राप्त्यर्थं देवयानमार्गार्थत्वादुत्-

क्रान्तेस्तद्गतो विचारः पारम्पर्य्येण भवति फलविचार इति नासङ्गत इत्यर्थः। नन्वयमुत्क्रान्तिक्रमो विदुषो नोपपद्यते न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्त इति श्रवणात् तत् कथमस्य विद्याधिकार इत्यत आह। "समाना हि विद्वदविदुषोः" इति। विषयमाह। "अस्ति" इति। विमृशति। "किमिह" इति। विषयः संशयः। पूर्वपक्षमाह। "तत्र वागेव" इति। श्रुतिलक्षणा। विषये संशये। सिद्धान्तसूत्रं पूरयित्वा पठति। "वाग्वृत्तिर्मनसि सम्पद्यते" इति। वृत्त्यध्याहारप्रयोजनं प्रश्नपूर्वकमाह। "कथम्" इति। उत्तराधिकरणपर्य्यालोचनेनैवं पूरितमित्यर्थः। तत्त्वस्य धर्मिणो वाचः प्रलयविवक्षायां त्विह सर्वत्रैव परत्रेह चाविभागसाम्यात् किं परत्रैव विशिंष्यादविभाग इति न त्वत्रापि। तस्मादिहाविभागेनाविशिंषतोऽत्र वृत्त्युपसंहारमात्रविवक्षा सूत्रकारस्येति गम्यते। सिद्धान्तहेतुं प्रश्नपूर्वकमाह। "कस्मात्" इति। सत्यामेव मनोवृत्तौ वाग्वृत्तेरुपसंहारदर्शनात्। वाचस्तूपसंहारमदृष्टं नागमोऽपि गमयितुमर्हति। आगमप्रभवमुक्तिविरोधादागमो हि दृष्टानुसारतः प्रकृतौ हि विकाराणां लयमाह। न च वाचः प्रकृतिर्मनो येनास्मिन् विलीयते तस्माद्वृत्तिमतोरभेदविवक्षया वाक्पदं तद्वृत्तौ व्याख्येयम्। सम्भवति च वाग्वृत्तेर्वागप्रकृतावपि मनसि लयः। तथा तत्र तत्र दर्शनादित्याह। "वृत्त्युद्भवाभिभवौ" इति॥

अत एव च सर्वाण्यनु॥ २॥

यतश्च प्रकृतिविकारभावाभावान्मनसि न स्वरूपलयो वाचोऽपि तु वृत्तिलयः। अत एव सर्वेषां चक्षुरादीनामिन्द्रियाणां सत्येव सवृत्तिके मनसि वृत्तेरनुगतिर्लयो न स्वरूप-

लयः। वाचस्तु पृथक्ग्रहणं पूर्वसूत्रे उदाहरणापेक्षं न तु तदेवेह विवक्षितमित्यर्थः।

तन्मनः प्राण उत्तरात् ॥ ३ ॥

यदि स्वप्रकृतौ विकारस्य लयस्ततो मनः प्राणे सम्पद्यते इत्यत्र मनःस्वरूपस्यैव प्राणे सम्पत्त्या भवितव्यम्। तथाहि मन इति नोपचारतो व्याख्यानं भविष्यति। सम्भवति हि प्रकृतिविकारभावः प्राणमनसोरन्नमयं हि सौम्य मन इत्यन्नात्मतामाह मनसः श्रुतिरापोमयः प्राण इति च प्राणस्याबात्मताम्। प्रकृतिविकारयोस्तादात्म्यात्तथा च प्राणो मनसः प्रकृतिरिति मनसो वृत्तिमतः प्राणे लय इति प्राप्तेऽभिधीयते। सत्यमापोऽन्नमसृजन्त इति श्रुतेरबन्नयोः प्रकृतिविकारभावोऽवगम्यते। न तु तद्विकारयोः प्राणमनसोः स्वयोनिप्रणाडिकया तु मिथो विकारयोः प्रकृतिविकारभावाभ्युपगमे सङ्करादतिप्रसङ्गः स्यात्। तस्माद् यो यस्य साक्षाद्विकारस्तस्य तत्र लय इत्यन्नस्याप्सु लयो न त्वब्विकारे प्राणेऽन्नविकारस्य मनसस्तथा चात्रापि मनोवृत्तेर्वृत्तिमति प्राणे लयो न तु वृत्तिमतो मनस इति सिद्धम्।

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

प्राणस्तेजसीति तेजःशब्दस्य भूतविशेषवचनत्वाद्विज्ञानात्मनि चाप्रसिद्धेः प्राणस्य जीवात्मन्युपगमानुगमावस्थानश्रुतीनां च तेजोद्वारेणाप्युपपत्तेस्तेजसि समापन्नवृत्तिः खलु प्राणस्तेजस्तु जीवात्मन्यवतिष्ठते। तद्द्वारा जीवात्मसमापन्नवृत्तिः प्राण इत्युपपद्यते। तस्मात्तेजस्येव प्राणवृत्तिप्रविलय इति प्राप्तेऽभिधीयते। स प्रकृतः प्राणोऽध्यक्षे विज्ञानात्मन्यवतिष्ठते तत्तन्त्रवृत्तिर्भवति। कुतः। उपगमानुगमावस्थानेभ्यो

हेतुभ्यस्तत्त्वोपगमश्रुतिमाह। एवमेवेयमात्मानमिति। अनुगमनश्रुतिमाह। "तमुत्क्रामन्तम्" इति। अवस्थानश्रुतिमाह। "सविज्ञानो भवतीति च" इति। विज्ञायतेऽनेनेति विज्ञानं पञ्चवृत्तिप्राणसहित इन्द्रियग्रामस्तेन सहावतिष्ठत इति सविज्ञानः। चोदयति। "ननु प्राणस्तेजसीति श्रूयते" इति। अधिकावापोऽशब्दार्थव्याख्यानम्। परिहरति। "नैष दोष इति"। यद्यपि प्राणस्तेजसीत्यतस्तेजसि प्राणवृत्तिलयः प्रतीयते। तथापि सर्वशाखाप्रत्ययत्वेन विद्यानां श्रुत्यन्तरालोचनया विज्ञानात्मनि लयोऽवगम्यते। न च तेजसस्तत्र लय इति साम्प्रतम्। तस्यानिलाकाशक्रमेण परमात्मनि तत्त्वलयावगमात्। तस्मात्तेजोग्रहणेनोपलक्ष्यते तेजःसहचरितदेहवीजभूतपञ्चभूतसूक्ष्मपरिचाराध्यक्षो जीवात्मा तस्मिन् प्राणवृत्तिरप्येतीति। चोदयति। "ननु चैवं श्रुतिः" इति। तेजःसहचरितानि भूतान्युपलक्ष्यन्तां तेजःशब्देनाध्यक्षे तु किमायातं तस्य तद्साहचर्य्यादित्यर्थः। परिहरति। "सोऽध्यक्ष इत्यध्यक्षापि" इति। यदा ह्ययं प्राणोऽन्तरालेऽध्यक्षं प्राप्याध्यक्षसम्पर्कवशादेव तेजःप्रभृतीनि भूतसूक्ष्माणि प्राप्नोति तदोपपद्यते प्राणस्तेजसीति। अत्रैव दृष्टान्तमाह। "योऽपि स्रुघ्नात्" इति। सूत्रान्तरमवतारयितुं पृच्छति। "कथं तेजःसहचरितेषु" इति॥

नैकस्मिन् दर्शयतो हि॥ ६॥

अत्र भाष्यकारोऽनुमानदर्शनमाह। "कार्य्यस्य शरीरस्य" इति। स्थूलशरीरानुरूपमनुमेयं सूक्ष्ममपि शरीरं पञ्चात्मकार्य्यमित्यर्थः। दर्शयत इति सूत्रावयवं व्याचष्टे। "दर्शयतश्चैतमर्थम्" इति। प्रश्नप्रतिवचनाभिप्रायं द्विवचनं श्रुतिस्मृत्या-

भिप्रायं वा। अणवो मात्राः सूक्ष्मा दशार्धानां पञ्चभूताना-मिति। श्रुत्यन्तरविरोधं चोदयति। "ननु चोपसंहृतेष्व-वागादिषु" इति। कर्माश्रयतेति प्रतीयते न भूताश्रयतेत्यर्थः। परिहरति। "अत्रोच्यते" इति। ग्रहा इन्द्रियाणि अतिग्र-हास्तद्विषयाः। कर्मणां प्रयोजकत्वेनाश्रयत्वं भूतानां तूप-दानत्वेनेत्यविरोधः। प्रशंसाशब्दोऽपि कर्मणां प्रयोजकतया प्रकृष्टमाश्रयत्वं ब्रूते सति निकृष्ट आश्रयान्तरे तदुपपत्तेरि-त्याह। "प्रशंसाशब्दादपि तत्र" इति॥

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य॥ ७॥

अत्रामृतत्वप्राप्तिश्रुतिः परविद्या च तं प्रत्येतदिति मन्वा-नस्य पूर्वः पक्षः। विशयानानां सन्दिहानानां पुंसां चोदयति। "ननु विद्याप्रकरणे" इति। परिहरति। "न स्वापादिवत्" इति। परे विद्ययैवामृतत्वे प्राप्त्यवस्थामाख्यातुं तत्सधर्माश्च तद्विधर्माश्चान्या अप्यवस्थास्तदनुगुणतयाख्यायन्ते। साधर्म्य-वैधर्म्याभ्यां हि स्फुटतरः प्रतिपिपादयिषिते वस्तुनि प्रत्ययो भवतीति। न तु विदुषः सकाशाद्विशेषवन्तोऽविद्वांसो विधी-यन्ते येन विद्याप्रकरणव्याघातो भवेदपि तु विद्यां प्रतिपाद-यितुं लोकसिद्धानां तदनुगुणतया तेषामनुवाद इति। एवं प्राप्तेऽभिधीयते। "समाना चैषोत्क्रान्तिर्वाङ्मनसीत्याद्या विद्व-दविदुषोः" कुतः। "आसृत्युपक्रमात्"। सृतिः सरणं देवया-नेन यथा कार्य्यब्रह्मलोकप्राप्तिरासृतेराकार्य्यब्रह्मलोकप्राप्तेः। अयं विद्योपक्रम आरम्भः प्रयत्न इति यावत्। तस्मादेतदुक्तं भवति नेयं परा विद्या यतो न मोक्षनाडीद्वारमाश्रयते। अपि त्वपरविद्येयम्। न चास्यामात्यन्तिकः क्लेशप्रदाहो यतो न

तत्रोत्क्रान्तिर्भवेत्। तस्मादपरविद्यासामर्थ्यादापेक्षिकममाभूतसम्प्लवस्थानममृतत्वं प्रेप्सते पुरुषार्थाय सम्भवत्येष उत्क्रान्तिभेदवान्। सृत्युपक्रमोपदेशः। उपपूर्वादुष दाह इत्यस्मादुपोष्येति प्रयोगः॥

तदापीतेः संसारव्यपदेशात्॥ ८॥

सिद्धां कृत्वा वीजभावावशेषां परमात्मसम्पत्तिं विद्वदविदुषोरुत्क्रान्तिः समर्थिता। सैव सम्प्रति चिन्त्यते। किमात्मनि तेजःप्रभृतीनां भूतसूक्ष्माणां तत्त्वप्रविलय एव सम्पत्तिराहोस्विद्वीजभावावशेषेति। यदि पूर्वः पक्षः, नोत्क्रान्तिः। अथोत्तरः, ततः सेति। तत्राप्रकृतौ न विकारतत्त्वप्रविलयो यथा मनसि न वागादीनाम्। सर्वस्य च जनिमतः प्रकृतिः परा देवतेति तत्त्वप्रलय एवात्यन्तिकः स्यात्तेजःप्रभृतीनामिति प्राप्तेऽभिधीयते।

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥

इत्यविद्यावतः संसारमुपदिशति श्रुतिः सेयमात्यन्तिके तत्त्वलये नोपपद्यते। न च प्रायणस्यैवेष महिमा विद्वांसमविद्वांसं वा प्रतीति साम्प्रतमित्याह। "अन्यथाहि सर्वः प्रायणसमय एव" इति। विधिशास्त्रं ज्योतिष्टोमादिविषयमनर्थकं प्रायणादेवात्यन्तिकप्रलये पुनर्भवाभावात्। मोक्षशास्त्रं वा प्रयत्नलभ्यात् प्रायणादेव जन्तुमात्रस्य मोक्षप्राप्तेः। न केवलं शास्त्रानर्थक्यमयुक्तश्च प्रायणमात्रान्मोक्ष इत्याह। "मिथ्याज्ञाने" इति। नासति निदानप्रशमे प्रशमस्तद्वतो युज्यत इत्यर्थः॥ अथेतरभूतसहितं तेजो जीवस्याश्रयभूतमुत्क्रमाद्देहाद्देहान्तरं वा सञ्चरत् कस्मादस्माभिर्न निरीक्ष्यते।

तद्धि महत्त्वाद्वानेकद्रव्यत्वाद्वा रूपवदुपलभ्यम् । कस्मान्न मूर्त्तान्तरैः प्रतिबध्यत इति शङ्कामपाकर्त्तुमिदं सूत्रम् ।

सूक्ष्मं परिमाणतश्च तथोपलब्धेः ॥ ९ ॥

चकारो भिन्नक्रमः । न केवलमापीतिस्तदवतिष्ठते । तच्च सूक्ष्मं स्वरूपतः परिमाणतश्च स्वरूपमेव हि तस्य तादृशमदृश्यम् । यथा चाक्षुषस्य तैजसो महतोऽपि । अदृष्टवशादनुद्भूतरूपस्पर्शं हि तत् । परिमाणतः सौक्ष्म्यं यतो नोपलभ्यते यथा त्रसरेणवो जालसूर्य्यमरीचिभ्योऽन्यत्र प्रमाणतस्तथोपलब्धिरिति व्याचष्टे । "तथाहि नाडीनिष्क्रमणे" इति । आदिग्रहणेन चक्षुष्टो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्य इति संगृहीतम् । अप्रतिघाते हेतुमाह । "स्वच्छत्वाच्च" इति । एतदपि हि सूक्ष्मत्वेनैव संगृहीतम् । यथा हि काचाभ्रपटलं स्वच्छस्वभावत्वं न तेजसः प्रतिघातकम् । एवं सर्वमेव वस्तुजातमस्येति ।

नोपमर्देनातः ॥ १० ॥

अत एव च स्वच्छतालक्षणात्सौक्ष्म्यादसक्तत्वापरनाम्नः ।

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

उपपत्तिः प्राप्तिः । एतदुक्तं भवति । दृष्टश्रुताभ्यामूष्मणोऽन्वयव्यतिरेकाभ्यामस्ति स्थूलाद्देहादतिरिक्तं किञ्चित् । चागमात् सूक्ष्मं शरीरमिति ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

अधिकरणतात्पर्य्यमाह । "अमृतत्वञ्चानुपोष्येत्यतो विशेषणात्" इति । विषयमाह । "अथाकामयमान" इति । सिद्धान्तमतमाशङ्क्य तन्निराकरणेन पूर्वपक्षी स्वमतमवस्थाप-

यति। "अतः परविद्याविषयात्प्रतिषेधात्" इति। यदि हि प्राणोपवर्चितस्य सूक्ष्मशरीरस्य जीवात्मनः स्थूलशरीरादुत्क्रान्तिं प्रतिषेधेत् श्रुतिः तत एतदुपपद्यते। न त्वेतदस्ति। न तस्मात्प्राणा उत्क्रामन्तीति हि तदा सर्वनाम्ना प्रधानावमर्शिनाभ्युदयनिःश्रेयसाधिकृतो देही प्रधानं परामृश्यते। तथाच तस्माद्देहिनो न प्राणाः सूक्ष्मं शरीरमुत्क्रामन्त्यपि तु तत्सहितः क्षेत्रज्ञ एवोत्क्रामतीति गम्यते। स पुनरतिक्रम्य ब्रह्मनाड्या संसारमण्डलं हिरण्यगर्भपर्य्यन्तं सलिङ्गो जीवः परस्मिन् ब्रह्मणि लीयते तस्मात्परामपि देवतां विदुष उत्क्रान्तिरत एव मार्गश्रुतयः। स्मृतिश्च मुमुक्षोः शुकस्यादित्यमण्डलप्रस्थानं दर्शयतीति प्राप्तम्, एवं प्राप्ते प्रत्युच्यते॥

स्पष्टो ह्येकेषाम्॥१३॥

नायं देह्यपादानस्य प्रतिषेधः। अपि तु देहापादानस्य। तथाह्यार्त्तभागप्रश्नोत्तरे ह्येकस्मिन् पक्षे संसारिण एव जीवात्मनोऽनुत्क्रान्तिं परिगृह्य न तर्ह्येष मृतः प्राणानामनुत्क्रान्तेरिति स्वयमाशङ्क्य प्राणानां प्रविलयं प्रतिज्ञाय तत्सिद्धयेसमुत्क्रान्त्यवधेरुच्छयनाध्माने ब्रुवन्नस्योच्छ्यनाध्माने तस्य तदवधित्वमाह। शरीरस्य च ते इति शरीरमेव तदपादानं गम्यते। नन्वेवमप्यस्याविदुषः संसारिणो विदुषस्तु किमायातमित्यत आह। "तत्सामान्यात्" इति। ननु तदा सर्वनाम्ना प्रधानतया देही परामृष्टः तत्कथमत्र देहावगतिरित्यत आह। "अभेदोपचारेण देहदेहिनोर्देहिपरामर्शिना सर्वनाम्ना देह एव परामृष्टः" इति। पञ्चमीपाठे व्याख्येयम्। षष्ठीपाठे तु नोपचार इत्याह। "येषां तु षष्ठी" इति। अपि च प्राप्तिपूर्वः प्रतिषेधो भवति नाप्राप्ते। अविदुषो हि देहा-

दुपक्रमणं दृष्टमिति विदुषोऽपि तत्सामान्याद्देहादुपक्रमणे प्राप्ते प्रतिषेध उपपद्यते न तु प्राणानां जीवावधिकं क्वचिदुत्क्रमणं दृष्टं येन तन्निषिध्यते। अपि चाद्वैतपरिभावनाभुवा प्रसंख्यानेन निर्मृष्टनिखिलप्रपञ्चावभासजातस्य गन्तव्याभावादेव नास्ति गतिरित्याह। "न च ब्रह्मविदः" इति। अपदस्य हि ब्रह्मविदो मार्गे पदैषिणोऽपि देवा इति योजना। चोदयति। "ननु गतिरपि" इति। परिहरति। "सशरीरस्यैवायं योगबलेन"। अपरविद्याबलेनेति॥

तानि परे तथा ह्याह॥ १५॥

प्रतिष्ठा-विलयनश्रुत्योर्विप्रतिपत्तेर्विमर्शस्तमपनेतुमयमारम्भः। तानि पुनः प्राणशब्दोदितानीन्द्रियाण्येकादश सूक्ष्माणि च भूतानि पञ्च। "ब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि" इति। आरम्भबीजं विमर्शमाह। "ननु गताः कलाः" इति। प्राणमनसोरेकप्रकृतित्वं विवक्षित्वा पञ्चदशत्वमुक्तम्। अत्र श्रुत्योर्विषयव्यवस्थया विप्रतिपत्त्यभावमाह। "सा खलु" इति। व्यवहारो लौकिकः साव्यवहारिकप्रमाणापेक्षेयं श्रुतिः। न तात्त्विकप्रमाणापेक्षा इतरा तु एवमेवास्य परिद्रष्टुरित्यादिका विद्वत्प्रतिपत्त्यपेक्षा तात्त्विकप्रमाणापेक्षा तस्माद्विषयभेदादविप्रतिपत्तिः श्रुत्योरिति॥

अविभागो वचनात्॥ १६॥

निमित्तापाये नैमित्तिकस्यात्यन्तिकापायः। अविद्यानिमित्तश्च विभागो नाविद्यायां विद्यया समूलघातमपहतायां सावशेषो भवितुमर्हति। तथापि प्रविलयसामान्यात् सावशेषताशङ्कामतिमन्दामपनेतुमिदं सूत्रम्॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्या-

सामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥

अपरविद्याविदोऽविदुषश्चोत्क्रान्तिरुक्ता। तत्र किं विद्वानविद्वांश्चाविशेषेण मूर्धादिभ्य उत्क्रामत्याहो विद्वान्मूर्धस्थानादेव। अपरे तु स्थानान्तरेभ्य इति। अत्र विद्यासामर्थ्यमपश्यतः पूर्वपक्षः। तस्योपसंहृतवागादिकलापस्योच्चिक्रमिषितो विज्ञानात्मन ओक आयतनं हृदयं तस्याग्रं तस्य ज्वलनं यत् तत्प्रकाशितद्वारो विनिष्क्रमद्वारो विद्वान्मूर्धस्थानादेव निष्क्रामति नान्येभ्यश्चक्षुरादिस्थानेभ्यः। कुतो विद्यासामर्थ्यात्। हार्दविद्यासामर्थ्यादुत्कृष्टस्थानप्रतिलम्भाय हि हार्दविद्योपदेशः मूर्धस्थानादनिष्क्रमणे च नोत्कृष्टदेशप्राप्तिरथ स्थानान्तरेभ्योऽप्युत्क्रामन् कस्माल्लोकमुत्कृष्टं न प्राप्नोतीत्यत आह। तच्छेषगत्यनुस्मृतियोगाच्च। हार्दविद्याशेषभूता हि मूर्धन्या नाडी गत्यै उपदिष्टा। तदनुशीलनेन खल्वयं जीवो हार्देन सूपासितेन ब्रह्मणानुगृहीतस्तस्यानुस्मरंस्तद्भावमापन्नो मूर्धन्ययैव शताधिकया नाड्या निष्क्रामति। हृदयादुद्गता हि ब्रह्मनाडी भास्वरा तालुमूलं भित्त्वा मूर्धानमेत्य रश्मिभिरेकीभूता आदित्यमण्डलमनुप्रविष्टा तामनुशीलयतस्तयैवान्तकाले निर्गमनं भवतीति॥

रश्म्यनुसारी ॥ १८ ॥

रात्रावहनि चाविशेषेण रश्म्यनुसारी सन्नादित्यमण्डलं प्राप्नोतीति सिद्धान्तपक्षप्रतिज्ञा। पूर्वपक्षमाशङ्कते सूत्रावयवेन।

निशि नेति चेत्

सूत्रावयवान्तरेण निराकरोति।

न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १९ ॥

यावद्देहभावी हि शिराकिरणसम्पर्कः प्रमाणान्तरात्प्रतीयते। दर्शयति चैतमर्थं श्रुतिरप्यविशेषेण। अमुष्मादादित्यात् प्रतायन्ते रश्मयस्ता आसु नाडीषु सृप्ता भवन्ति य आभ्यो नाडीभ्यः प्रतायन्ते विस्तार्य्यन्ते ते रश्मयोऽमुष्मिन्नादित्ये सृप्ताः प्रतापादिकार्य्यदर्शनादिति। आदिग्रहणेन चन्द्रातपः संगृह्यते। चन्द्रमसा खल्वम्मयेन सम्बध्यमानानां सौरीणां भासां चन्द्रिकात्वम्। तस्मादप्यस्ति निशि सौर्य्यरश्मिप्रचार इति। ये त्वाहुः। स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छेदिति निरपेक्षश्रवणाद्रात्रौ प्रेते नास्ति रश्म्यपेक्षेति। तान् प्रत्याह। "यदि च रात्रौ प्रेते" इति। नह्येतद्विशेष्याधीयतेऽध्येतारः। ये तु मन्यन्ते विद्वानपि रात्रिप्रायणापराधेन नोर्ध्वं आक्रमत इति। तान् प्रत्याह। "अथ तु विद्वानपि" इति। नित्यवत्फलसम्बन्धेन विहिता विद्या न पाक्षिकफला युक्तेति। ये तु रात्रौ प्रेतस्य विदुषोऽहरपेक्षां सूर्य्यमण्डलप्राप्तिमाचक्षते तन्मतमाशङ्क्याह। "अथापि रात्रौ वा" इति। यावत्तावदुपसम्बन्धेनानपेक्षा गतिः श्रुता न चापेक्षा शक्यावगमोऽपबन्धविरोधादिति ॥

अतश्चायनेऽपि हि दक्षिणे ॥ २० ॥

अतएवेत्युक्तहेतुपरामर्श इत्याह। "अतएवापेक्षानुपपत्तेः" इति। पूर्वपक्षबीजमाह। "उत्तरायणप्राशस्त्ये" इति। अपनोदमाह। "प्राशस्त्यप्रसिद्धिः" इति। अतःपदपरामृष्टहेतुबलादविदुषो मरणं प्रशस्तमुत्तरायणे विदुषस्तूभयत्राप्य-

विशेषो विद्यासामर्थ्यादिति। विदुषोऽपि च भीष्मस्योत्तरायणप्रतीक्षणमविदुष आचारं ग्राहयति 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायात्। आपूर्य्यमाणपक्षादित्याद्या च श्रुतिर्न कालविशेषप्रतिपत्त्यर्था, अपि त्वातिवाहिकीर्देवताः प्रतिपादयतीति वक्ष्यति। तस्मादविरोधः। सूत्रान्तरावतरणाय चोदयति। "ननु च यत्र काले तु" इति। काल एवात्र प्राधान्येनोच्यते न त्वातिवाहिकी देवतेत्यर्थः॥

योगिनः प्रति स्मर्य्यते स्मार्त्ते चैते ॥ २१ ॥

स्मार्त्तीमुपासनां प्रत्ययं स्मार्त्तः कालभेदविनियोगः प्रत्यासत्तेः न तु श्रौतीं प्रतीत्यर्थः। अत्र यदि स्मृतौ कालभेदविधिः श्रुतौ चाग्निर्ज्योतिरादिविधिस्तत्राग्न्यादीनामतिवाहिकतया विषयव्यवस्थाया विरोधाभाव उक्तः। अथ तु प्रत्यभिज्ञानं तथापि यत्र काल इत्यत्रापि कालाभिधानद्वारेणातिवाहिक्य एव देवता उक्ता इत्यविरोध एवेति॥

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभाष्यविभागे भामत्यां चतुर्थस्याध्यायस्य द्वितीयः पादः॥

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

भिन्नप्रकरणस्थत्वाद्भिन्नोपासनयोगतः।
अनपेक्षा मिथो मार्गास्त्वरातोऽवधृतेरपि॥

गन्तव्यमेकं नगरं प्रति वक्रेणाध्वना गतिमपेक्ष्य ऋजुनाऽध्वना गतिस्त्वरावती कल्पते। एकमार्गत्वे तु किमपरमपेक्ष्य त्वरा स्यात्। अथ तैरेव रश्मिभिरित्यवधारणं नोपपद्यते पथ्यन्तरस्य निवर्त्तनीयस्याभावात् तस्मात्परानपेक्षा

एवैते पन्थान एकब्रह्मलोकप्राप्त्युपाया व्रीहियवाविव विकल्पेरन्निति प्राप्ते, प्रत्युच्यते ।

एकत्वेऽपि पथोऽनेकपर्वसंसर्गसम्भवात् ।
गौरवान्नैव नानात्वं प्रत्यभिज्ञानलिङ्गतः ॥

सपर्वा हि पन्था नगरादिकमेकं गन्तव्यं प्रापयति नाभागः । तत्र किमिति रश्म्यहर्वायुसूर्यादयोऽध्वानः पर्वाणः सन्तोऽध्वनैकेन युज्यन्ते, आहो यथायथमध्वानमपि भिन्दन्त्विति सन्देहेऽभेदेऽप्यध्वनो भागभेदोपपत्तेर्न भागिभेदकल्पनोचिता, गौरवप्रसङ्गात् । एकदेशप्रत्यभिज्ञानाच्च विशिष्टविशेष्यभावोपपत्तेर्नानेकाध्वकल्पना । अथैतैरेव रश्मिभिरित्येवावधारणं न तावदर्थान्तरनिवृत्त्यर्थं तत्प्रापकैरेव वाक्यान्तरैर्विरोधात्, तस्मादन्यानपेक्षामस्यावधारयतीति वक्तव्यम् । न चैकं वाक्यमप्राप्तमध्वानं प्रापयति । तस्य चानपेक्षतां प्रतिपादयतीत्यर्थद्वयाय पर्य्याप्तं, तस्माद्विधिसामर्थ्यप्राप्तमयोगव्यवच्छेदमेवकारो वदतीति युक्तम् । "त्वरावचनं च" इति । न खल्वेकस्मिन्नेव गन्तव्ये पथि भेदमपेक्ष्य त्वराऽवकल्पते किन्तु गन्तव्यभेदादपि तदुपपत्तिः । यथा कश्मीरेभ्यो मथुरां क्षिप्रं याति चैत्र इति तथेहाप्यन्यतः कुतश्चिद्गन्तव्यादनेनोपायेन ब्रह्मलोकं क्षिप्रं प्रयातीति । "भूयांस्त्वर्चिरादिश्रुतौ मार्गपर्वाणि" इति । अयमर्थः । एकत्वात्प्राप्तव्यस्य ब्रह्मलोकस्याल्पपर्वणा मार्गेण तत्प्राप्तौ सम्भवन्त्यां बहुमार्गोपदेशो व्यर्थः प्रसज्यते । तत्र चेतनस्याप्रवृत्तेः । तस्माद्भूयसां पर्वणामविरोधेनाल्पानां तदनुप्रवेश एव युक्त इति ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

श्रुत्याद्यभावे पाठस्य क्रमं प्रति नियन्तृता ।

ऊर्ध्वाक्रमणमात्रे च श्रुता वायोर्निमित्तता ॥

स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमत इति हि वायुनिमित्तमूर्ध्वाक्रमणं श्रुतं न तु वायुनिमित्तमादित्यगमनम्। स आदित्यं गच्छतीत्यादित्यगमनमात्रप्रतीतेर्न च तेनेत्यनन्तरश्रुतोर्ध्वाक्रमणक्रियासम्बन्धि निराकाङ्क्षमादित्यगमनक्रिययापि सम्बन्द्धुमर्हति न चादित्यगमनस्य तेनेति विना काचिदनुपपत्तिर्येनान्यसम्बन्धमप्यनुषज्यते। तत्राग्निलोकमागच्छति स वायुलोकमित्यादिसन्दर्भगतस्य पाठस्य क्वचिन्नियामकत्वेन क्लृप्तसामर्थ्यात्। अग्निवायुवरुणक्रमनियामकत्वश्रुत्याद्यभावादिति प्राप्ते, प्रत्युच्यते।

ऊर्ध्वशब्दो न लोकस्य कस्यचित्प्रतिपादकः।
तद्भेदापेक्षया युक्तमादित्ये न विशेषणम् ॥

भवेदेतदेवं यद्यूर्ध्वशब्दात्कश्चिल्लोकभेदः प्रतीयते स तूपरिदेशमात्रवाची लोकभेदाद्विनाऽपर्य्यवस्यल्लोकभेदवाचिनादित्यपदेनादित्ये व्यवस्थाप्यते। तथा चादित्यलोकगमनमेव वायुनिमित्तमिति श्रौतक्रमनियमे पाठः पदार्थमात्रप्रदर्शनार्थो न तु क्रमाय प्रभवति श्रुतिविरोधादिति सिद्धम्। वाजसनेयिनां संवत्सरलोको न पठ्यते छान्दोग्यानां देवलोको न पठ्यते तत्रोभयानुरोधादुभयपाठे माससम्बन्धात्संवत्सरः पूर्वः पश्चिमो देवलोकः। नहि मासो देवलोकेन सम्बध्यते, किन्तु संवत्सरेण। तस्मात्तयोः परस्परसम्बन्धान्मासारभ्यत्वाच्च संवत्सरस्य मासानन्तर्य्ये स्थिते देवलोकः संवत्सरस्य परस्ताद्भवति। तत्रादित्यानन्तर्य्याय वायोः संवत्सरादित्यस्य स्थाने देवलोकाद्वायुमिति पठितव्यम्। वायुशब्दादिति तु सूत्रमत्रापि वाचकमेव। तथापि संवत्स-

रात्पराञ्चमादित्यादर्वाञ्चं वायुमभिसम्भवन्तीति छान्दोग्यपाठमात्रापेक्षयोक्तं, तदिदमाह। "वायुमब्दादिति तु" इति॥

तडितोऽधिवरुणः सम्बन्धात्॥ ३॥

तडिदन्तेऽर्चिरायेऽध्वन्यप्यतिस्तडितः परः।
तत्सम्बन्धात् तथेन्द्रादिरप्यतेः पर इष्यते॥
आगन्तूनां निवेशोऽन्ते स्थानाभावात् प्रसाधितः।
तथा चेन्द्रादिरागन्तुः पठ्यते चाप्यतेः परः॥

आतिवाहिकास्तल्लिङ्गात्॥ ४॥

मार्गचिह्नसरूपत्वाच्चिह्नान्येवार्चिरादयः।
भर्तृभोगभुवो वा स्युर्लोकत्वान्नातिवाहिकाः॥

अर्चिरादिशब्दा हि ज्वलनादावचेतनेषु निरूढवृत्तयो लोके न चैषां त्वावधिकानामिव नियमवती संवहनस्वरूपा स्वतन्त्रक्रियाबुद्धिपूर्वासम्भवत्यचेतनानाम्। तस्माल्लोकशब्दवाच्यत्वाद्भर्तुर्जीवात्मनो भोगभूमय एवेति मन्यामहे।

अपि चार्चिष इत्यस्मादपादानं प्रतीयते।
न हेतुर्नागणे हेतौ पञ्चमी दृश्यते क्वचित्॥

जाड्याद्बद्ध इत्यादिषु गुणवचनेषु जाड्यादिषु हेतुपञ्चमी दृष्टा। न चार्चिरादिशब्दा गुणवाचिनो येन पञ्चम्या तेषां वहनं प्रति हेतुत्वमुच्यते। अपादानत्वं चाचेतनेष्वप्यस्तीति नातिवाहिकाः। न चामानवस्य पुरुषस्य विद्युदादिषु वोढृत्वदर्शनादर्चिरादीनामपि वोढृत्वमुन्नेयं यावद्वचनं हि वाचनिकं न तदवाच्ये सञ्चारयितुमुचितम्। अपि चार्चिरादीनां वोढृत्वे विद्युदादीनामपि वोढृत्वान्नामानवः पुरुषो वोढा श्रूयेत। यतः श्रूयते ततोऽवगच्छामो विद्युदादिवन्नार्चिरादीनां

वोढृत्वमिति। तस्माद्भोगभूमय एवार्चिरादयो नातिवाहिका इति प्राप्ते, प्रत्युच्यते।

सपिण्डकरणानां हि सूक्ष्मदेहवतां गतौ।
न स्वातन्त्र्यं न चाप्यन्ध्या नेतारोऽचेतनास्तु ते॥

ईदृशी हि नियमवती गतिः स्वयं वा प्रेक्षावतोऽप्रेक्षावतो वा प्रेक्षावत्प्रयुक्तस्य। न तावद्विगलितस्थूलकलेवराः सूक्ष्मदेहवतः सम्पिण्डितकरणग्रामा उत्क्रान्तिमन्तो जीवात्मानो मत्तमूर्च्छितवत्स्वयं प्रेक्षावन्तो यदेवं स्वातन्त्र्येण गच्छेयुस्तद्वदर्चिरादयोऽपि मार्गचिह्नानि वा ग्रामीकारस्कारादिवत् भोगभूमयो वा सुमेरुशैलेलावृत्तादिवदुभयथाप्यचेतनतया न नयनं प्रत्येषामस्ति स्वातन्त्र्यम्। न चैतेभ्योऽन्यस्य चेतनस्य नेतुः कल्पना सति श्रुतानां चैतन्यसम्भवे। न च परमेश्वर एवास्तु नेतेति युक्तम्। तस्यात्यन्तसाधारणतया लोकपालग्रहादीनामकिञ्चित्करत्वात्। तस्माद् व्यवस्थित एव परमेश्वरस्य सर्वाध्यक्षत्वे यथा यथास्वं लोकपालादीनां स्वातन्त्र्यम्। एवमिहाप्यर्चिरादीनामातिवाहिकत्वमेव दर्शनानुसाराच्छब्दार्थ इति युक्तम्। इममेवार्थममानव पुरुषातिवाहनलक्षणं लिङ्गमुपोद्बलयतीत्युक्तम्। "अनवस्थितत्वादर्चिरादीनाम्" इति। अवस्थितं हि मार्गचिह्नं भवत्यव्यभिचारान्नानवस्थितं व्यभिचारादिति। अर्चिष इति च द्वितीया पञ्चमी नापादाने। गुणत्वञ्चार्थाश्रिततया। न च वैशेषिकपरिभाषया नियम आस्थेयो लोकविरोधात्। अपि च तेऽर्चिरभिसम्भवन्तीति सम्बन्धमात्रमुक्तमिति। सामान्यवचने शब्दे विशेषाकाङ्क्षिणि स्फुटम्। यद्विशेषपदं तेन तत्सामान्यं नियम्यते॥ यथा ब्राह्मणमानय भोजयितव्य इति तद्विशेषापेक्षायां यदा तत्सन्निधावुपनिपतति पदं कठादि तदा तेनैतन्नियम्यते। "एवमिहापि" इति।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

विद्युल्लोकमागतो मानवः पुरुषो वैद्युतस्तेनैव न तु वरुणादिना स्वयमुह्यते। तच्छ्रुतेस्तस्यैव स्वयं वोढृत्वश्रुतेः। वरुणादयस्तु तत्साहायके वर्त्तमाना वोढारो भवन्तीति च वैषम्यं न वोढृत्व इति सर्वमवदातम्। पाठक्रमादर्थक्रमो बलवानिति। यथार्थक्रमं पठ्यन्ते सूत्राणि ॥

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

स एतान् ब्रह्म गमयतीति विचिकित्स्यते। किं परं ब्रह्म गमयत्याहोस्विदपरं कार्य्यं ब्रह्मेति।

मुख्यत्वादमृतं प्राप्तेः परप्रकरणादपि।
गन्तव्यं जैमिनिर्मेने परमेवार्चिरादिना ॥

ब्रह्म गमयतीत्यत्र हि नपुंसकब्रह्मपदं परस्मिन्नेव ब्रह्मणि निरूढत्वात् अनपेक्षतया मुख्यमिति सति सम्भवे न कार्य्ये ब्रह्मणि गुणकल्पनया व्याख्यातुमुचितम्। अपि चामृतत्वफलावाप्तिर्न कार्य्यब्रह्मप्राप्तौ युज्यते। तस्य कार्य्यत्वेन मरणधर्मवत्त्वात्। किञ्च तत्र तत्र परमेव ब्रह्म प्रकृत्य प्रजापतिसद्मप्रतिपत्त्यादय उच्यमाना नापरब्रह्मविषया भवितुमर्हन्ति प्रकरणविरोधात्। न च परस्मिन् सर्वगते गतिर्नोपपद्यते प्राप्तत्वादिति युक्तम्। प्राप्तेति हि प्राप्तिफला गतिर्दृश्यते। यथैकस्मिन् न्यग्रोधपादपे मूलादग्रमग्राच्च मूलं गच्छतः शाखामृगस्यैकेनैव न्यग्रोधपादपेन निरन्तरं संयोगविभागा भवन्ति। न चैते तदवयवविषया न तु न्यग्रोधविषया इति साम्प्रतं तथा सति न शाखामृगो न्यग्रोधेन युज्यते। न्यग्रोधावयवस्य तदवयवयोगात्। एवं दृश्यमानानामपि तदवयवानां न योगः। तदवयवयोगात्तदनेन

क्रमेण तदवयवेषु परमाणुषु व्यवतिष्ठते। ते चातीन्द्रिया इति कस्मिन्नु नामायमनुभवपद्धतिमध्यास्तां संयोगतपस्वी। तस्मादकामेनाप्यनुभवानुरोधेन प्राप्त एव प्राप्तिफललावगतिरेषितव्या। तद् ब्रह्म प्राप्तमपि प्राप्तिफलायावगतेर्गोचरो भविष्यति। ब्रह्मलोकेष्विति च बहुवचनमेकस्मिन्नपि प्रयोगसाधुतामात्रेण गमयितव्यम्। लोकशब्दश्चालोकने प्रकाशे वर्त्तयितव्यो न तु सन्निवेशवति देशविशेषे। तस्मात् परब्रह्मप्राप्त्यर्थो गत्युपदेशसामर्थ्यादयमर्थो भवति। यथा विद्याकर्मवशादर्चिरादिना गतस्य सत्यलोकमतिक्रम्य परं जगत्कारणं ब्रह्मलोकमालोकं स्वयं प्रकाशकमिति यावत् प्राप्तस्य तत्रैव लिङ्गं प्रलीयते न तु गतिमवष्टभ्य तां विना लिङ्गप्रविलय इति। अत एव श्रुतिः। पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति। तदनेनाभिसम्बन्धिना परं ब्रह्म गमयत्यमानव इति मेने जैमिनिराचार्य्यः। तत्त्वदर्शी बादरिर्दर्श॥

कार्य्यं बादरिरस्य गत्युपपत्तेः॥ ७॥

कार्य्यमप्राप्तपूर्वत्वादप्राप्तप्रापणी गतिः।
प्रापयेद् ब्रह्म न परं प्राप्तत्वाज्जगदात्मकम्॥

तत्त्वमसिवाक्यार्थसाक्षात्कारात् प्राक्किल जीवात्माऽविद्याकर्मवासनाद्युपाध्यवच्छेदाद्वस्तुतोऽनवच्छिन्नोऽवच्छिन्नमिवाभिन्नोऽपि लोकेभ्यो भिन्नमिवात्मानमभिमन्यमानः स्वरूपादन्यानप्राप्तानर्चिरादीन् लोकान् गत्याप्नोतीति युज्यते। अद्वैततत्त्वब्रह्मसाक्षात्कारवतस्तु विगलितनिखिलप्रपञ्चावभासविभ्रमस्य न गन्तव्यं न गतिर्न गमयितार इति किं केन सङ्गतम्। तस्मादनिदर्शनं न्यग्रोधसंयोगविभागा

न्यग्रोधवानरतद्गतितत्संयोगविभागानां मिथो भेदात्। न
च तत्रापि प्राप्तप्राप्तिः कर्मजेन हि विभागेन निरुद्धायां
पूर्वप्राप्तावप्राप्तस्येवोत्तरप्राप्तेरुत्पत्तेः। एतदपि वस्तुतो विचा-
रासहतया सर्वमनिर्वचनीयविजृम्भितमविद्यायाः समुत्पन्ना-
द्वैततत्त्वसाक्षात्कारो न विद्वानभिमन्यते। विदुषोऽपि देह-
पातात् पूर्वं स्थितप्रज्ञस्य तथाभासमात्रेण सांसारिकधर्मानुवृ-
त्तिरभ्युपेयते एवमालिङ्गशरीरपातात्। विदुषस्तद्धर्मानुवृ-
त्तिस्तथा चाप्राप्तप्राप्तेर्गत्युपपत्तिस्तद्देशप्राप्तौ च लिङ्गदेहनि-
वृत्तेर्मुक्तिः श्रुतिप्रामाण्यादिति चेत्, न। परविद्यावत उत्-
क्रान्तिप्रतिषेधात् ब्रह्मैव सन् ब्रह्माप्येति न तस्मात् प्राणा
उत्क्रामन्ति अत्रैव समवनीयन्त इति। यथा विद्याब्रह्म-
प्राप्त्योः समानकालता श्रूयते। 'ब्रह्म वेद ब्रह्मैव भवति'
'आनन्दं ब्रह्मणो विद्वान्न बिभेति' 'तदात्मानमेव वेदाहं
ब्रह्मास्मीति तत्सर्वमभवत्' तत्र को मोहः कः शोक एकत्वम-
नुपश्यतः' इति पौर्वापर्याश्रवणात् परविद्यावतो मुक्तिं प्रति
नोपायान्तरापेक्षेति लक्ष्यते अभिसन्धिः श्रुतेः। उपपन्नं चैतत्।
न खलु ब्रह्मैवेदं विश्वमहं ब्रह्मास्मीति परिभावनाभुवा
जीवात्मनो ब्रह्मभावसाक्षात्कारेणोन्मूलितायामनवयवेनावि-
द्यायामस्ति गन्तव्यगन्तृविभागो विदुषस्तदभावे कथमयम-
र्चिरादिमार्गे प्रवर्त्तेत। न च छायामात्रेणापि सांसारिक-
धर्मानुवृत्तिस्तत्र प्रवृत्त्यङ्गं यादृच्छिकप्रवृत्तिः श्रद्धाविहीनस्य
दृष्टार्थानि कर्माणि फलन्ति न फलन्ति च। अदृष्टार्थानां
तु फले का कथेत्युक्तं प्रथमसूत्रे। न चार्चिरादिमार्गभा-
वनायाः परब्रह्मप्राप्त्यर्थमविदुषः प्रत्युपदेशस्तथा च कर्मा-
न्तरेष्विव नित्यादिषु तत्रापि श्राद्धस्य प्रवृत्तिरिति साम्प्रतम्।
विकल्पासहत्वात्। किमियं परविद्यानपेक्षा परब्रह्म-

प्राप्तिसाधनं तदपेक्षं वा। न तावदनपेक्षा तमेव विदित्वाति-मृत्युमेति नान्यः पन्था विद्यते अयनायेति परब्रह्मविज्ञा-नादन्यस्याध्वनः साक्षात्प्रतिषेधात् परविद्यापेक्षत्वे तु मार्ग-भावनायाः किमियं विद्याकार्य्यं मार्गभावनासाहायकमाचर-त्यथ विद्योत्पादे। न तावद्विद्याकार्य्यं तया सह तस्याद्वैता-द्वैतगोचरतया मिथो विरोधेन सहासम्भवात्। नापि यज्ञा-दिवद्विद्योत्पादे साक्षाद्ब्रह्मप्राप्त्युपायत्वश्रवणादेतान् ब्रह्म गमयतीति। यज्ञादेस्तु विविदिषासंयोगेन श्रवणाद्विद्योत्पा-दाङ्गत्वम्। तस्मादुपन्यस्तबहुश्रुत्यनुरोधादुपपत्तेश्च ब्रह्मशब्दो-ऽसम्भवन्मुख्यवृत्तिर्ब्रह्मसामीप्यादपरब्रह्मणि लक्षणया नेतव्यः। तथा च लोकेष्विति बहुवचनोपपत्तेः कार्य्यं ब्रह्मलोकस्य। परस्य त्वनवयवतया तद्द्वारेणाप्यनुपपत्तेर्लोकत्वं चेलावृत्ता-दिवत् सन्निवेशविशेषवति भोगभूमौ निरूढं न कथञ्चिद्योगेन प्रकाशे व्याख्यातं भवति। तस्मात् साधुदर्शी स भगवान् बाद-रिरसाधुदर्शी जैमिनिरिति सिद्धम्। अप्रामाणिकानां बहु-प्रलापाः सर्वगतस्य द्रव्यस्य गुणाः सर्वगता एव चैतन्यानन्दा-दयश्च गुणिनः परमात्मनो भेदाभेदवन्तो गुणा इत्यादयो दूषणायानुभाष्यमाणा अपि अप्रमाणिकत्वमावहन्त्यस्माक-मित्युपेक्षिताः। अन्ययोजना तु प्रतिप्रत्यगात्मत्वाच्च गन्तृणाम्। प्रतिप्रति अञ्चति गच्छतीति प्रत्यक् प्रतिभाववृत्ति ब्रह्म तदा-त्मत्वाद्गन्तॄणां जीवात्मनामिति। "गौणी त्वन्यत्र" इति। यौगिक्यपि हि योगगुणापेक्षया गौण्येव। "विशुद्धोपाधिस-म्बन्धम्" इति। मनोमयत्वादयः कल्पनाः कार्य्याः कार्य्य-त्वात्। अविशुद्धा अपि श्रेयोहेतुत्वाद्विशुद्धाः। प्रतिसञ्चरो महाप्रलयः प्रतिप्रत्यभिसन्धिः प्रतिपत्तिर्गतिः। पदेर्गत्यर्थत्वा-दभिसन्धिस्तात्पर्य्यम्। यस्य ब्रह्मणो नामाभिधानं यश्च

इति। "पूर्ववाक्यविच्छेदेन" इति। श्रुतिवाक्ये बलीयसी प्रकरणात्। "सगुणे च ब्रह्मणि" इति। प्रशंसार्थमित्यर्थः। चोदयति। "ननु गतस्यापि पारमार्थिकी गन्तव्यता देशान्तरविशिष्टस्य" इति। न्यग्रोधवानरदृष्टान्त उपपादितः। परिहरति। "न प्रतिषिद्धसर्वविशेषत्वाद् ब्रह्मणः" इति। अयमभिसन्धिः। यथा तथा न्यग्रोधावयवी परिणामवानुपजनापायधर्मभिः कर्मजैः संयोगविभागैः संयुज्यतामयं पुनः परमात्मा निरस्तनिखिलभेदप्रपञ्चः कूटस्थनित्यो न न्यग्रोधवत्संयोगविभागभाग् भवितुमर्हति। काल्पनिकसंयोगविभागस्तु काल्पनिकस्यैव कार्य्यब्रह्मलोकस्योपपद्यते न परस्य। शङ्कते। "जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेः" इति। नह्युत्पत्त्यादिहेतुभावोऽपरिणामिनः सम्भवति तस्मात् परिणामीति। तथा च भाविक्रमस्योपपद्यते गन्तव्यत्वमित्यर्थः। निराकरोति। "न विशेषनिराकरणश्रुतीनाम्" इति। विशेषनिराकरणं समस्तशोकादिदुःखशमनतया पुरुषार्थफलवत्। अफलं तूत्पत्त्यादिविधानम्। तस्मात् फलवतः सन्निधावाम्नायमानं तदर्थमेवोच्यत इत्युपपत्तिः। तद्धि विजिज्ञासस्वेति च श्रुतिः। तस्माच्छ्रुत्युपपत्तिभ्यां निरस्तसमस्तविशेषब्रह्मप्रतिपादनपरोऽयमाम्नायो न तूत्पत्त्यादिप्रतिपादनपरः। तस्मान्न गतिस्तात्त्विकी। अपि चेयं गतिर्न विचारं सहत इत्याह। "गतिकल्पनायां च" इति। अन्योनन्यत्वाश्रयावयवविकारपक्षौ। अन्यो वात्यन्तम्। अथ कस्मादात्यन्तिकमनन्यत्वं न कल्प्यत इत्यत आह। "अत्यन्ततादात्म्ये" इति। मृदात्मतया हि स्वभावेन घटादयो भावास्तद्विकारा व्याप्ताः। तदभावे न भवन्ति शिंशपेव वृक्षत्वाभाव इति विकारावयव-

पचयोश्च तद्वत: सह विकारावयवै: स्थिरत्वादचलत्वाद्ब्रह्मण: संसारलक्षणं गमनं विकारावयवयोरनुपपन्नम्। नहि स्थिरात्मकमस्थिरं भवति। अन्योनन्यत्वेऽपि चैकस्य विरोधादसम्भवतीति भाव:। अथान्य एव जीवो ब्रह्मण:। तथा च ब्रह्मण्यसंसरत्यपि जीवस्य संसार: कल्पत इति। एतद्विकल्पत्रं दूषयति। "सोऽणु:" इति। "मध्यमपरिमाणत्वे" इति। मध्यमपरिमाणानां घटादीनामनित्यत्वदर्शनात्। "न मुख्यैकत्वे" इति। भेदाभेदयोर्विरोधिनोरेकत्वासम्भवाद्बुद्धिव्यपदेशभेदादर्थभेदोऽयुतसिद्धतयोपचारेणाभिन्नमुच्यत इत्यसुख्यमस्यैकत्वमित्यर्थ:। अपि च जीवानां ब्रह्मावयवत्वपरिणामात्यन्तभेदपचेषु तात्त्विकी संसारितेति मुक्तौ स्वभावहानाज्जीवानां विनाशप्रसङ्ग:। ब्रह्मविवर्त्तत्वे तु ब्रह्मैवैषां स्वभाव: प्रतिविम्बानामिव विम्बं तच्चाविनाशीति न जीवविनाश इत्याह। "सर्वेष्वेतेषु" इति। मतान्तरमुन्यस्यति दूषयितुम्। "यत्तु कैश्चिज्जल्पतं विनैव ब्रह्मज्ञानं नित्यनैमित्तिकानि" इति। यथा हि कफनिमित्तो ज्वर उपात्तस्य कफस्य विशोषणादिभि: प्रचये कफान्तरोत्पत्तिनिमित्तदध्यादिवर्जने प्रशान्तोऽपि न पुनर्भवति। एवं कर्मनिमित्तो बन्ध उपात्तानां कर्मणामुपभोगात् प्रचये प्रशाम्यति। कर्मान्तराणाञ्च बन्धहेतूनामननुष्ठानात्कारणाभावे कार्य्यानुपपत्तेर्बन्धाभावात् स्वभावसिद्धो मोच आरोग्यमिवोपात्तदुरितनिवर्हणाय च नित्यनैमित्तिककर्मानुष्ठानात् दुरितनिमित्तप्रत्यवायो न भवति। प्रत्यवायानुत्पत्तौ च स्वस्थस्तान्तो न निषिद्धान्याचरेदिति। तदेतद्दूषयति। "तदसत् प्रमाणाभावात्" इति। शास्त्रं खल्वस्मिन् प्रमाणं तच्च मोचमाणस्यात्मज्ञानमेवोपदिशति न तूक्तमाचारम्। न चात्रोपपत्ति: प्रभवति संसार-

स्यानादितया कर्माशयस्याप्यसंख्येयस्यानियतविपाककालस्य भोगेनोच्छेत्तुमशक्यत्वादित्याह। "न चैतत्तर्कयितुमपि" इति। चोदयति। "स्यादित्येतन्नित्य" इति। परिहरति। "तत्र विरोधाभावात्" इति। यदि हि नित्यनैमित्तिकानि कर्माणि सुकृतमपि दुष्कृतमिव निर्वहेयुस्ततः काम्यकर्मोपदेशाद्दत्तजलाञ्जलयः प्रसज्येरन्। नह्यस्ति कश्चिच्चातुर्वर्ण्ये चातुराश्रम्ये वा यो न नित्यनैमित्तिकानित्यकर्माणि करोति। तस्मान्नैषां सुकृतविरोधितेति। अभ्युच्चयमात्रमाह। "न च नित्यनैमित्तिकानुष्ठानात्" इति। "न चासति सम्यग्दर्शने" इति। सम्यग्दर्शी हि विरक्तः काम्यनिषिद्धे वर्जयन्नपि प्रमादादुपनिपतिते तेनैव सम्यग्दर्शनेन क्षपयति। ज्ञानपरिपाके च न करोत्येवाज्ञस्तु निपुणोऽपि प्रमादात् करोति। कृते च न क्षयितुं क्षमत इति विशेषः। "न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे" इति। कर्तृभोक्तृत्वं समाचिम्मक्रियाभोगे ते चेदात्मनः स्वभावावधारिते न त्वारोपिते ततो न शक्यावपनेतुम्। नहि स्वभावाद्भावोऽवरोपयितुं शक्यो भावस्य विनाशप्रसङ्गात्। न च भोगोऽपि सत्स्वभावः शक्योऽसत्कर्तुं, नो खलु नीलमनीलं शक्यं शक्रेणापि कर्तुं, तदिदमुक्तं "स्वभावस्यापरिहार्यत्वात्" इति। समारोपितस्य त्वनिर्वचनीयस्य तत्स्वभावस्य शक्यस्तत्त्वज्ञानेनावरोपः कर्तुं सर्पस्येव रज्जुतत्त्वज्ञानेनेति भावः। भावमिममविद्वान् परिचोदयति। "स्यादेतत् कर्तृत्वभोक्तृत्वकार्य्यम्" इति। अप्रकाशितभावो यथोक्तमेव समाधत्ते। "तच्च न" इति। कर्तृभोक्तृत्वयोर्निमित्तसम्बन्धस्य च शक्तिद्वारेण नित्यत्वाद्भविष्यति कदाचिदेषां समुदाचारो यतः सुखदुःखे भोज्येते इति सम्भावनातः कुतः कैवल्यनिश्चय इत्यर्थः। भूयो निरस्तमपि मतिद्रढिम्ने पुन-

रुपन्यस्य दूषयति। "परस्मादनन्यत्वेऽपि" इति। शेषमतिरोहितार्थम्॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च॥ १५॥

अब्रह्मक्रतवो यान्ति यथा पञ्चाग्निविद्यया।
ब्रह्मलोकं प्रयास्यन्ति प्रतीकोपासकास्तथा॥

सन्ति हि मनो ब्रह्मेत्युपासीतेत्याद्याः प्रतीकविषया विद्यास्तद्वन्तोऽप्यर्चिरादिमार्गेण कार्य्यब्रह्मोपासका इव गन्तुमर्हन्त्यनियमः सर्वासामित्यविशेषेण विद्यान्तरेष्वपि गतेरवधारणात्। न चैषां परब्रह्मविदामिव गत्यसम्भव इति। न च ब्रह्मक्रतव एव ब्रह्मलोकभाजो नातत्क्रतव इत्यप्येकान्तः। अतत्क्रतूनामपि पञ्चाग्निविदां तत्प्राप्तेः। न चैते न ब्रह्मक्रतवो मनो ब्रह्मेत्युपासीतेत्यादौ सर्वत्र ब्रह्मानुगमेन तत्क्रतुत्वस्यापि सम्भवात्। फलविशेषस्य ब्रह्मलोकप्राप्तावपि उपपत्तेः, तस्य सावयवतयोत्कर्षनिकर्षसम्भवादिति प्राप्ते, प्रत्युच्यते॥

उत्तरोत्तरभूयस्त्वादब्रह्मक्रतुभावतः।
प्रतीकोपासकान् ब्रह्मलोकं नामानवो नयेत्॥

भवतु पञ्चाग्निविद्यायामब्रह्मक्रतूनामपि ब्रह्मलोकनयनं वचनात्। किमिव हि वचनं न कुर्य्यात् नास्ति वचनस्यातिभार इह तु तदभावात्। तं यथायथोपासते तदेव भवतीति श्रुतेः। औत्सर्गिक्यां नासति विशेषवचनेऽपवादो युज्यते। न च प्रतीकोपासको ब्रह्मोपास्ते सत्यपि ब्रह्मेत्यनुगमे किन्तु नामादिविशेषब्रह्मरूपतया तथा खल्वयं नामादितत्त्वो न ब्रह्मतत्त्व आश्रयान्तरप्रत्ययस्याश्रयान्तरे प्रक्षेपः प्रतीक इति

हि दृष्टाः । ब्रह्माश्रयश्च प्रत्ययो नामादिषु प्रक्षिप्त इति नामतन्त्रः । तस्मान्न तदुपासको ब्रह्मक्रतुः किन्तु नामादिक्रतुः । न च ब्रह्मक्रतुत्वे नामाद्युपासकानामविशेषादुत्तरोत्तरोत्कर्षः सम्भवो । न च ब्रह्मक्रतुस्तदवयवक्रतुः । येन तदवयवापेक्षयोत्कर्षो वर्ण्येत । तस्मात्प्रतीकालम्बनान्विदुषो वर्जयित्वा सर्वानन्यान्विकारालम्बनान्नयत्यमानवो ब्रह्मलोकं न ह्येवमुभयथाभाव उभयथार्थत्वे कांश्चित्प्रतीकालम्बनान्न नयति विकारालम्बनान्विदुषस्तु नयतीत्यभ्युगमे कश्चिद्दोषोऽस्ति अनियमः सर्वेषामित्यस्य न्यायस्येति सर्वमवदातम् ॥

इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादभाष्यविभागे भामत्यां चतुर्थस्याध्यायस्य
तृतीयः पादः ॥

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

प्रागभूतस्य निष्पत्तौ कर्तृत्वं न सतो यतः ।
फलत्वेन प्रसिद्धेश्च मुक्तेरूपान्तरोद्भवः ॥

अभूतस्य घटादेर्भवनं निष्पत्तिर्न पुनरत्यन्तसतोऽसतो वा न जातु गगनतत्कुसुमे निष्पद्येते । स्वरूपावस्थानं चेदात्मनो मुक्तिर्न सा निष्पद्येत । तस्य गगनवदत्यन्तसतः प्रागसत्त्वाभावान्न चास्य बन्धाभावो निष्पद्यते तस्य तुच्छस्वभावस्य कार्यत्वे नातुच्छत्वप्रसङ्गात् । फलत्वप्रसिद्धेश्च मोक्षस्याकाङ्क्ष्यस्य फलत्वानवकल्पनादागन्तुना रूपेण केनचिदुत्पत्तौ स्वेनेति प्राप्तमनूद्यत इति प्राप्तेऽभिधीयते ।

सम्भवत्यर्थवत्त्वे हि नानर्थक्यमुपेयते ।
बन्धस्य सदसत्त्वाभ्यां रूपमेकं विशिष्यते ॥

अनधिगतावबोधनं हि प्रमाणं शाब्दमगत्या कथञ्चिद-नुवादतया वर्ण्यते। सकलसांसारिकधर्मार्पितं तु प्रसन्नमा-त्मरूपमप्रसन्नात्तस्मादेव रूपाद्व्यावृत्तमनधिगतमवबोधयन्ना-नुवादो युज्यते। न चास्य निष्पत्त्यसम्भवः सत इव घटादेः सांव्यवहारिकेण प्रमाणेन बन्धविगमस्यापि निष्पत्तेर्लोकसिद्ध-त्वात्। विचारासहतया त्वसिद्धिरुभयत्रापि तुल्या न च्चस-दुत्पत्तुमर्हतीति असकृदावेदितम्। अन्धो भवतीति स्वप्ना-वस्था दर्शिता। बाह्येन्द्रियव्यापाराभावाद्रोदितीव जाग्रद-वस्था दुःखशोकाद्यात्मकत्वाद्विनाशमेवापीत इति सुषुप्तिः। एवकारश्चेवार्थे नावधारणे।

आत्मा प्रकरणात्॥ ३॥

ननु ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति पौर्वापर्यश्रवणात् स्वरूपनिष्पत्तेरन्या ज्योतिरुपसम्पत्ति-स्तथा च भौतिकत्वेऽपि न मोक्षव्याघातः। भवेदेतदेवं यदि ज्योतिरुपसम्पद्य तत् परित्यजेदिति श्रूयेत। तदध्याहारेऽपि तत्प्रतिपादनवैयर्थ्यं तदपरित्यागे च ज्योतिषैव स्वेन रूपेणेति गम्यते। तस्य च भूतत्वे विकारत्वान्मरणधर्मकत्वप्रसिद्धेरमु-क्तित्वमिति प्राप्ते प्रत्युच्यते।

ज्योतिष्पदस्य मुख्यत्वं भौतिके यद्यपि स्थितम्।
तथापि प्रक्रमाद् वाक्यादात्मन्येवात्र युज्यते।

परं ज्योतिरिति हि परपदसमभिव्याहारात् परत्वस्य चानपेक्षस्य ब्रह्मण्येव प्रवृत्तेर्ज्योतिषि चापरे किञ्चिदपेक्ष्य परत्वात्परं ज्योतिरिति वाक्यादात्मैवात्र गम्यते प्रकरणञ्चो-क्तम्। यत् सम्पद्य निष्पद्यत इति तन्मुखं व्यादाय स्वपितीति-वत्। तस्माज्ज्योतिरुपसम्पन्नो मुक्त इति सूक्तम्।

अविभागेन दृष्टत्वात् ॥ ४ ॥

यद्यपि जीवात्मा ब्रह्मणो न भिन्न इति तत्र तत्रोप पदितं तथापि स तत्र पर्य्येतीत्याधाराधेयभावव्यपदेशस्य सम्पत्तृसम्पत्तव्यभावव्यपदेशस्य च समाधानार्थमाह ।

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

उपन्यास उद्देशो ज्ञातस्य यथा य आत्माऽपहतपाप्मेत्यादिः । तथाऽज्ञातज्ञापनं विधिः । यथा स तत्र पर्य्येति जक्षत् रममाण इति तस्य सर्वेषु लोकेषु कामचारो भवतीत्येतदज्ञातज्ञापनं विधिः । सर्वज्ञः सर्वेश्वर इति व्यपदेशः । नायमुद्देशो विधेयान्तराभावात् । नापि विधिरप्रतिपाद्यत्वात् । सिद्धवदव्यपदेशात्तन्निर्वचनसामर्थ्यादयमर्थः प्रतीयत त एते उपन्यासादयः । एतेभ्यो हेतुभ्यः ।

भावाभावात्मकै रूपैर्भाविकैः परमेश्वरः ।
मुक्तः सम्पद्यते स्वैरित्याह स्म किल जैमिनिः ॥

न च चित्स्वभावस्यात्मनोऽभावात्मानोऽपहतपाप्मत्वादयो भावात्मानश्च सर्वज्ञत्वादयो धर्मा अद्वैतं घ्नन्ति । नो खलु धर्मिणो धर्मा भिद्यन्ते । मा भूद्गवाश्ववद्धर्मिधर्मभावाभाव इति जैमिनिराचार्य्य उवाच ॥

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

अनेकाकारतैकस्य नैकत्वान्नैकता भवेत् ।
परस्परविरोधेन न भेदाभेदसम्भवः ॥

न ह्येकस्यात्मनः पारमार्थिकानेकधर्मसम्भवः । ते चेदात्मनो भिद्यन्ते द्वैतापत्तेरद्वैतश्रुतयो व्यावर्त्तेरन् । अथ न भिद्यन्ते तत एकस्मादात्मनोऽभेदाभ्भिन्नयोऽपि न भिद्येरन् ।

आत्मरूपवत्। आत्मरूपं वा भिद्येत। भिन्नेभ्योऽनन्यत्वा-न्नीलपीतरूपवत्। न च धर्मिण आत्मनो न भिद्यन्ते मिथस्तु भिद्यन्त इति साम्प्रतम्। धर्म्यभेदेन तदनन्यत्वेन तेषामप्य-भेदप्रसङ्गात्। भेदे वा धर्मिणोऽपि भेदप्रसङ्गादित्युक्तम्। भेदाभेदौ च परस्परविरोधादेकत्राभावन्न सम्भवत इत्युपपा-दितं प्रथमे सूत्रे। अभावरूपाणामद्वैताविहन्तृत्वेऽपि तस्य पाप्मादेः काल्पनिकतया तदधीननिरूपणतया तेषामपि काल्पनिकत्वमिति न तात्त्विकी तद्धर्मता स्थिष्यते। एतेन सत्यकामसर्वज्ञसर्वेश्वरत्वादयोऽप्यौपाधिका व्याख्याताः। तस्मा-न्निरस्ताशेषप्रपञ्चेनाव्यपदेशेन चैतन्यमात्रात्मनाभिनिष्पद्यमा-नस्य मुक्तावात्मनोऽर्थशून्यैरेवापहतपाप्मसत्यकामादिशब्दैर्व्य-पदेश इत्यौडुलोमिर्मेने। तदिदमुक्तं "शब्दविकल्पजा एवेति" अपहतपाप्मत्वादयो न तु सांव्यवहारिका अपीति॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः॥ ७॥

तदेतदतिशौण्डीरमौडुलोमेर्न सृष्यते।
बादरायण आचार्य्यो सृष्यन्नपि हि तन्ममम्॥

एवमपीत्यौडुलोमिमतमनुजानाति। शौण्डीरं तु न सह-त इत्याह। "व्यवहारापेक्षया" इति। एतदुक्तं भवति। सत्यं तात्त्विकानन्दचैतन्यमात्र एवात्मापहतपाप्मसत्यकामत्वादय-स्त्वौपाधिकतायाऽतात्त्विका अपि व्यावहारिकप्रमाणोपनीत-तया लोकसिद्धा नात्यन्तासन्तो येन तच्छब्दा राहोः शिर इतिवदवास्तवा इत्यर्थः॥

सङ्कल्पादेव च तच्छ्रुतेः॥ ८॥

यत्नानपेक्षः सङ्कल्पो लोके वस्तुप्रसाधनः ।
न दृष्टः सोऽत्र यत्नस्य लाघवादवधारितः ॥

लोके हि कश्चिदर्थं चिकीर्षुः प्रयतते प्रयतमानः समीहते समीहानस्तमर्थमाप्नोतीति क्रमो दृष्टः । न त्विच्छानन्तरमेवास्येप्समाणमुपतिष्ठते । तेन श्रुत्यापि लोकवृत्तमनुरुध्यमानया विदुषस्तादृश एव क्रमोऽनुमन्तव्यः । अवधारणं तु सङ्कल्पादेवेति लौकिकं यत्नगौरवमपेक्ष्य विद्याप्रभवतो विदुषो यत्नलाघवात् । यल्लघु तदसत्कल्पमिति । स्यादेतत् । यथा मनोरथमात्रोपस्थापिता स्त्री स्त्रैणानां चरमधातुविसर्गहेतुः । एवं पित्रादयोऽप्यस्य सङ्कल्पोपस्थापिताः कल्पिष्यन्ते स्वकार्य्यायेत्यत आह । "न च सङ्कल्पमात्रसमुत्थाना" इति । सन्ति हि खलु कानिचिद्वस्तुरूपसाध्यानि कार्य्याणि यथा स्त्रीवस्तुसाध्यानि दन्तक्षतमणिमालादीनि । कानि चित्तु ज्ञानसाध्यानि यथोक्तचरमधातुविसर्गरोमहर्षादीनि । तत्र मनोरथमात्रोपनीते पित्रादौ भवन्तु तज्ज्ञानमात्रसाध्यानि कार्य्याणि न तु तत्साध्यानि भवितुमर्हन्ति । न हि स्त्रैणस्य रोमहर्षादिवद्भवन्ति स्त्रीवस्तुसाध्या मणिमालादयस्तदिदमुक्तं पुष्कलभोगमिति प्राप्तेऽभिधीयते ।

पित्रादीनां समुत्थानं सङ्कल्पादेव तच्छ्रुतेः ।
न चानुमानबाधोऽत्र श्रुत्या तस्यैव बाधनात् ॥

प्रमाणान्तरानपेक्षा हि श्रुतिः स्वार्थं गोचरयन्ती न प्रमाणान्तरेण शक्या बाधितुम् । अनुमानमेव तु स्त्रीत्यादाय पक्षधर्मत्वादिरूपमानान्तराबाधितविषयत्वं स्वसामग्रीमध्यपातेनापेक्ष्यमाणं सामग्रीखण्डनेन तद्विरुद्धया श्रुत्या बाध्यते । अत एव नरशिरःकपालादिशौचानुमानमागमबाधितविषयतया नोपपद्यते । तस्माद्विद्याप्रभावाद्विदुषां सङ्कल्पमात्रादेव

पित्राद्युपस्थानमिति साम्प्रतम्। तथाहुरागमिनः। को हि योगप्रभावाद्दृतेऽगस्त्य इव समुद्रं पिबति स इव दण्डकारण्यं सृजति। तस्मात्सर्वमवदातम्॥

अभावं बादरिराह ह्येवम्॥ १०॥

अन्ययोगव्यवच्छित्त्या मनसेति विशेषणात्।
देहेन्द्रियवियोगः स्याद्विदुषो बादरेर्मतम्॥

अनेकधाभावश्रद्धिप्रभावभुवो मनोभेदाद्वा स्तुतिमात्रं वा कथञ्चिद्भूमविद्यायां निर्गुणायां तदसम्भवात् असतापि हि गुणेन स्तुतिर्भवत्येवेति॥

भावं जैमिनिर्विकल्पामननात्॥ ११॥

शरीरेन्द्रियभेदे हि नानाभावः समञ्जसः।
न चार्थसम्भवे युक्तं स्तुतिमात्रमनर्थकम्॥

न हि मनोमात्रभेदे स्फुटतरोऽनेकधाभावो यथा शरीरेन्द्रियभेदे। अत एव सौभरेरभिविनिर्मितविविधदेहस्यापर्य्यायेण मान्धातृकन्याभिः पञ्चाशता विहारः पौराणिकैः स्मर्य्यते। न चार्थसम्भवे स्तुतिमात्रमनर्थकमवकल्पते। सम्भवति चास्यार्थवत्त्वम्। यद्यपि निर्गुणायामिदं भौमविद्यायां पठ्यते तथापि तस्याः पुरस्तादनेन सगुणावस्थागतेनैश्वर्य्येण निर्गुणैव विद्या स्तूयते। न चान्ययोगव्यवच्छेदेनैव विशेषणम्। अयोगव्यवच्छेदेनापि विशेषणात्। यथा चैत्रो धनुर्धरः। तस्मान्मनःशरीरेन्द्रिययोग ऐश्वर्य्यशालिनां नियमेनेति मेने जैमिनिः॥

द्वादशाहवदुभयविधं बादरायणोऽतः॥ १२॥

मनसेति केवलमनोविषयां च स एकधा भवति त्रिधा भवतीति शरीरेन्द्रियभेदविषयां च श्रुतिमुपलभ्यानियमवादी

खलु बादरायणो नियमवादी पूर्वयोर्न सहते। द्विविधश्रुत्यनुरोधात्। न चायोगव्यवच्छेदेनैवंविधेषु विशेषणमवकल्पते। कामेषु हि रमणं समनस्केन्द्रियेण शरीरेण पुरुषाणां सिद्धमेवेति नास्ति शङ्का मनोयोगस्येति तद्व्यवच्छेदो व्यर्थः सिद्धस्य तु मनोयोगस्य तदन्यपरिसंख्यानेनार्थवत्त्वमवकल्पते। तस्माद्दामिनाच्छा पश्यतीतिवद्वान्ययोगव्यवच्छेद इति साम्प्रतम्। "द्वादशाहवत्" इति।

द्वादशाहस्य सत्वमासनोपायिचोदने।

अहीनत्वं च यजतिचोदने सति गम्यते॥

द्वादशाहमृद्धिकामा उपेयुरित्युपायिचोदनेन य एवं विद्वांसः सत्रमुपयन्तीति च द्वादशाहस्य सत्रत्वं बहुकर्तृकस्य गम्यते। एवं तस्यैव द्वादशाहेन प्रजाकामं याजयेदिति यजतिचोदनेन नियतकर्तृपरिमाणत्वेन द्विरात्रेण यजेतेत्यादिवदहीनत्वमपि गम्यत इति सम्प्रति शरीरेन्द्रियाभावेन मनोमात्रेण विदुषः स्वप्नवत् सूक्ष्मो भोगो भवति। कुतः। उपपत्तेः। मनसैतानिति श्रुतेः। यदि पुनः सुषुप्तवदभोगो भवेत्। नैषा श्रुतिरुपपद्येत। न च स शरीरवदुपभोगः शरीराद्युपादानवैयर्थ्यात्। सशरीरस्य तु पुष्कलो भोग इहाप्युपपत्तेरित्यनुषञ्जनीयम्। तदिदमुक्तं सूत्राभ्याम्॥

तन्वभावे संध्यवदुपपत्तेः॥ १३॥

भावे जाग्रद्वत्॥ १४॥

इति॥

प्रदीपवदावेशस्तथा हि दर्शयति॥ १५॥

वस्तुतः परमात्मनोऽभिन्नोऽप्ययं विज्ञानात्माऽनाद्यविद्याकल्पितप्रादेशिकान्तःकरणावच्छेदेनानादिजीवभावमाप-

य: प्रादेशिक: स च देहान्तराणि स्वभावनिर्मितान्यपि नाना-प्रदेशवर्त्तीनि सान्त:करणो युगपदाविष्टुमर्हति। न चात्मान्तरं स्रष्टमपि सृज्यमानस्य स्रष्टृतिरेकिणात्मत्वादात्मत्वे वा कर्तृकर्मभावाभावाद्देदाश्रयत्वादस्य। नाप्यन्त:करणान्तरं तत्र सृजति सृज्यमानस्य तदुपाधित्वाभावात्। अनादिना खल्वन्त:करणेनौत्पत्तिकेनायमवरुद्धो नेदानीन्तनेनान्त:-करणेनोपाधितया सम्बद्धुमर्हति। तस्माद् यथा दारुयन्त्रं तत्प्रयोक्त्रा चेतनेनाधिष्ठितं सकृदिच्छामनुरुध्यते। एवं निर्माणशरीराण्यपि सेन्द्रियाणीति प्राप्ते प्रत्यभिधीयते।

शरीरत्वं न जातु स्याद्भोगाधिष्ठानतां विना।
स त्रिधेति शरीरत्वमुक्तं युक्तं च तद्विभौ॥

स त्रिधा भवति पञ्चधा सप्तधा नवधेत्यादिका श्रुति-र्विदुषो नानाभावमाचक्षमाणा भिन्नशरीरेन्द्रियोपाधिसम्बन्धे-ऽवकल्पते। नादेहहेतुभेदे न हि यन्त्राणि भिन्नानि निर्माय वाहयन्यन्त्रवाहो नानात्वेनापदिश्यते। भोगाधिष्ठानत्वञ्च शरीरत्वं नाभोगाधिष्ठानेषु यन्त्रेष्विव युज्यते। तस्माद्दे-हान्तराणि सृजति। न चानेनाधिष्ठितानि देहपक्षे वर्त्तन्ते। न च सर्वगतस्य वस्तुतो विगलितप्रायाविद्यस्य विदुष: पृथग्-जनस्येवौत्पत्तिकान्त:करणवश्यता येन तदौत्पत्तिकमन्त:-करणमागन्तुकान्त:करणान्तरसम्बन्धमस्य वारयेत् तस्माद्वि-द्वान् सर्वस्य वशी सर्वेश्वर: सत्यसङ्कल्प: सेन्द्रियमनांसि शरी-राणि निर्माय तानि चैकपदे प्रविश्य तत्तदिन्द्रियमन्त:करणै-स्तेषु लोकेषु मुक्तो विहरतीति साम्प्रतम्। प्रदीपवदिति तु निदर्शनं प्रदीपैक्यं प्रदीपव्यक्तिषूपचर्य्यते भिन्नवर्त्तिवर्त्ति-नीनां भिन्नव्यक्तीनां भेदात्। एवं विद्वान् जीवात्मा देहभेदेऽप्येक इति परामर्शार्थ:। एकमनोवर्त्तीनीत्येका-

भिप्रायवर्त्तीनीत्यर्थः । सम्पन्नः केवली मुक्त इत्युच्यते। न चैतस्यैत्यन्भावसम्भवः श्रुतिविरोधादित्युक्तमर्थजातमाचिपति। "कथं पुनर्मुक्तस्य" इति। "सलिल" इति। सलिलमिव सलिलः सलिलप्रातिपदिकात्सर्वप्रातिपदिकेभ्य इत्युपमानादाचारे क्विपि कृते पचाद्यचि च कृते रूपम्। एतदुक्तं भवति। यथा सलिलमम्भोनिधौ प्रचिप्तं तदेकीभावमुपयाति। एवं द्रष्टापि ब्रह्मणेति। अत्रोत्तरं सूत्रम् ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥

अासु काश्चिच्छ्रुतयः सुषुप्तिमपेक्ष्य काश्चित्तु सम्पत्तिं तदधिकारात्। ऐश्वर्य्यश्रुतयस्तु सगुणविद्याविपाकावस्थापेक्षा मुक्त्यभिसन्धानन्तु तदवस्थासत्त्वे यथाऽरुणदर्शने सन्ध्यायां दिवसाभिधानम् ॥

जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

स्वाराज्यकामचारादिश्रुतिभ्यः स्यान्निरङ्कुशः ।
स्वकार्य्ये ईश्वराधीनसिद्धिरप्यत्र साधकः ॥

आप्नोति स्वाराज्यं सर्वेऽस्मै देवा बलिमावहन्ति। सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुतिभ्यो विदुषः परब्रह्मण इवान्यानधीनत्वमैश्वर्य्यमवगम्यते। नन्वस्य ब्रह्मोपासनालब्धमैश्वर्य्यं कथं ब्रह्मानधीनं न तु स्वभावो न हि कारणाधीनजन्मानो भावाः स्वकार्य्ये स्वकारणमपेक्षन्ते। किं त्वत्र ते स्वतन्त्रा एव। यथाहुः।

मृत्पिण्डदण्डचक्रादि घटो जन्मन्यपेक्षते।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते॥

न च विदुषां परमेश्वराधीनैश्वर्य्यसिद्धित्वाद्धतमैश्वर्य्यं येन

लौकिका एव राजानो महाराजाधीनाः स्वव्यापारे विद्वांसः परमेश्वराधीना भवेयुर्न खलु यदधीनोत्पादं यस्य रूपं तत्तद्रूपादूनं भवतीति कश्चिन्नियमः। तत्समानां तदधिकानाञ्च दर्शनात्तथा ह्यन्तेवासी गुर्वधीनविद्यः तत्समस्तदधिको वा दृश्यते। दुष्टसामन्ताश्च पार्थिवाधीनैश्वर्य्याः पार्थिवाः स्पर्धमानास्तान्विजयमाना वा दृश्यन्ते तदिह निरतिशयैश्वर्य्यत्वात् परमेश्वरस्य मा नाम भूवत् विद्वांसस्ततोऽधिकास्तत्समास्तु भविष्यन्ति। तथा च न तदधीनाः। न हि समप्रधानभावानामस्ति मिथोऽपेक्षा। तदेते स्वतन्त्राः सन्तस्तद्व्यापारे जगत्सर्जनेऽपि प्रवर्त्तेरन्निति प्राप्ते प्रत्यभिधीयते।

नित्यत्वादनपेक्षत्वात् श्रुतेस्तत्प्रक्रमादपि।
ऐकमत्याच्च विदुषां परमेश्वरतन्त्रता॥

जगत्सर्गलक्षणं हि कार्य्यं कारणैकस्वभावस्यैव हि भवतु आहो कार्य्यकारणस्वभावस्य। तत्रोभयस्वभावस्य स्वोत्पत्तौ मूलकारणापेक्षस्य पूर्वसिद्धः परमेश्वर एव कारणमभ्युपेतव्य इति स एवैकोऽस्तु जगत्कारणम् तस्यैव नित्यत्वेन स्वकारणानपेक्षस्य क्लृप्तसामर्थ्यात्। कल्प्यसामर्थ्यास्तु जगत्सर्जनं प्रति विद्वांसः। न च जगत्स्रष्टृत्वमेषां श्रूयते श्रूयते त्वभवतः परमेश्वरस्यैव। तमेव प्रकृत्य सर्वासां तच्छ्रुतीनां प्रवृत्तेः। अपि च समप्रधानानां हि न नियमवदैकमत्यं दृष्टमिति यदैकः सिसृक्षति तदैवेतरः सञ्जिहीर्षतीत्यपर्य्यायेण सृष्टिसंहारौ स्याताम्। न चोभयोरपीश्वरत्वव्याघातादेकस्य तु तदाधिपत्ये तदभिप्रायानुरोधिनां सर्वेषामैकमत्योपपत्तेरदोषः। तत्रागन्तुकानां कारणाधीनजन्मैश्वर्य्याणां तच्छ्यमाणाविशेषतया समत्वान्नित्यैश्वर्य्यशालिनो गृह्यते तेभ्यो विशेष इति स एव तेषामधीश इति तत्तन्त्रा विद्वांस इति परमेश्वर-

व्यापारस्य सर्गसंहारस्य नेशते। पूर्वपक्षिणोऽनुशयबीजमाशङ्का निराकरोति ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

यतः परमेश्वराधीनमैश्वर्य्यं तस्मात्ततो न्यूनमणिमादिमात्रं स्वाराज्यं न तु जगत्स्रष्टृत्वम्। उक्तान्न्यायात् ॥

विकारावर्त्ति च तथा हि स्थितिमाह ॥ १९ ॥

एतावानस्य महिमेति विकारवर्त्ति रूपमुक्तम्। ततो ज्यायांश्चेति निर्विकारं रूपम्। तथा पादोऽस्य विश्वा भूतानीति विकारवर्त्ति रूपं त्रिपादस्यामृतं दिवीति निर्विकारमाह रूपं दर्शयतश्चापरे श्रुतिस्मृती निर्विकारमेव रूपं भगवतस्ते च पठिते। एतदुक्तं भवति। यदि ब्रूषे सगुणे ब्रह्मण्युपास्यमाने यथा तद्गुणस्य निरवग्रहत्वमपि वस्तुतोऽस्तीति निरवग्रहत्वञ्च विदुषा प्राप्तव्यमिति तदनेन व्यभिचारयते यथा सविकारे ब्रह्मण्युपास्यमाने वस्तुतः स्थितमपि निर्विकाररूपं न प्राप्यते तत्कस्य हेतोरतत्क्रतुत्वादुपासकस्य। तथा तद्गुणोपासनया वस्तुतः स्थितमपि निरवग्रहत्वं नाप्यते। तत्त्वोपासासनासु पुरुषक्रतुत्वात्। उपासकस्य तदक्रतुत्वञ्च निरवग्रहत्वस्योपासनविध्यगोचरत्वाद्विध्यधीनत्वाच्चोपासनासु पुरुषस्वातन्त्र्याभावात् स्वातन्त्र्ये वा प्रातिभत्वप्रसङ्गादिति।

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

न केवलं स्वाराज्यस्येश्वराधीनतया जगत्सर्जनम् साक्षाद्भोगमात्रेण तेन परमेश्वरेण साम्याभिधानादपि व्यपदेशलिङ्गादिति। भूतान्यवन्ति प्रीणयन्तीति भोजयन्तीति यावत्। सूत्रान्तरावतारणाय शङ्कते। "नन्वेवं सति सातिशयत्वात्"

इति। सह परमेश्वरस्यातिशयेन वर्त्तत इति विदुष ऐश्वर्य्यं सातिशयम् यच्च सातिशयं तच्च कार्य्यं यथा लौकिकमैश्वर्य्यम् तदनेन कार्य्यत्वमुक्तम्। तथा च कार्य्यत्वादन्तवत्प्राप्तमिति तच्च न युक्तमानन्त्ये न तद्विदुषां तत्र प्रवृत्तिरिति। अत उत्तरं पठति॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात्॥ २२॥

किमर्चिरादिमार्गेण ब्रह्मलोकप्राप्तानामैश्वर्य्यस्यान्तवत्त्वं त्वया साध्यते। आहोस्विच्चन्द्रलोकादिवद् ब्रह्मलोकादेतल्लोकप्राप्तिर्मुक्तेरन्तवत्त्वम्। तत्र पूर्वस्मिन् कल्पे सिद्धसाधनम्। उत्तरत्र तु श्रुतिस्मृतिविरोधः। तद्विधानां च क्रममुक्तिप्रतिपादनादिति। तत्त्वमसिवाक्यार्थोपासनापरान् प्रत्याह। "सम्यग्दर्शनविध्वस्ततमसाम्" इति। द्विधाविद्यातमः निरुपाधिब्रह्मसाक्षात्कारस्तत्त्वदर्शनम्। न चैतन्निर्वाणं स्वरूपावस्थानलक्षणं कार्य्यं येनानित्यं स्यादित्याह। "नित्यसिद्ध" इति॥

इति श्रीवाचस्पतिमिश्रविरचिते शङ्करभगवत्पादभाष्यविभागे भामत्यां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः।

समाप्तश्चायं चतुर्थोऽध्यायः॥

भङ्क्त्वा वाद्यसुरेन्द्रवृन्दमखिलाविद्योपधानातिगं
येनाम्नायपयोनिधेर्नयमथा ब्रह्मामृतं प्राप्यते ।
सोऽयं शाङ्करभाष्यजातविषयो वाचस्पतिः सादरं
सन्दर्भः परिभाव्यतां सुमतयः स्वार्थेषु को मत्सरः ॥ १ ॥
अज्ञानसागरं तीर्त्वा ब्रह्मतत्त्वमभीप्सताम् ।
नीतिनौकर्णधारेण मयाऽपूरि मनोरथः ॥ २ ॥
यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः ।
यन्न्यायसांख्ययोगानां वेदान्तानां निबन्धनैः ॥ ३ ॥
समचैषं महत् पुण्यं तत्फलं पुष्कलं मया ।
समर्पितमथैतेन प्रीयतां परमेश्वरः ॥ ४ ॥
नृपान्तराणां मनसाप्यगम्यां
भ्रूक्षेपमात्रेण चकार कीर्त्तिम् ।
कार्त्तस्वरासारसुपूरितार्थ-
सार्थः स्वयं शास्त्रविचक्षणश्च ॥ ५ ॥
नरेश्वरा यच्चरितानुकार-
मिच्छन्ति कर्त्तुं न च पारयन्ति ।
तस्मिन् महीपे महनीयकीर्त्तौ
श्रीमन्नृगेऽकारि मया निबन्धः ॥ ६ ॥

ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

